# संस्कृत प्रतिभा

## SAMSKRITA PRATIBHA

द्वितीय उन्मेषः
द्वितीयो विलासः
अक्टोबर् - १९६०

साहित्य अकादेमी, नवदेहली

Samskrita Pratibha, a Half-yearly Journal

Editor: Dr. V. Raghavan

Annual Subscription: Rs. 4 (inclusive of postage). U. K. sh. 10; U. S. A. $ 1.50

Single copy: Rs. 2 (inclusive of postage)

Send your literary contributions to the Editor.

Send your subscriptions and advertisements to the Secretary, Sahitya Akademi, 74, Theatre Communication Buildings, Connaught Circus, New Delhi-1. For individual copies, agency terms, etc., write to the Business Manager, Publications Division, Old Secretariat, Delhi-8.

Advertisement Rates

| | | | |
|---|---|---|---|
| Inside Full Page: | General Rs. 100; | for Books Rs. | 50. |
| Inside Half Page: | General Rs. 50; | for Books Rs. | 25. |
| 3rd Cover: | General Rs. 150; | for Books Rs. | 75. |
| 4th Cover: | General Rs. 200; | for Books Rs. | 100. |

Mechanical Data
Size: Demy Octavo ($8\frac{1}{2}'' \times 5\frac{1}{2}''$)
Print Area: $7'' \times 4''$
Line Measure: 24-ems

Edited and Published by Dr. V. Raghavan for Sahitya Akademi, Connaught Circus, New Delhi at 7, Sri Krishnapuram Street, Royapettah, Madras-14; and Printed by K. Ramanathan, at the Vasanta Press, The Theosophical Society, Adyar, Madras - 20

# संस्कृत प्रतिभा

SAMSKRITA PRATIBHA

द्वितीय उन्मेषः
द्वितीयो विलासः
अक्टोबर् - १९६०

साहित्य अकादेमी, नवदेहली

## PROF. SARMA'S BOOKS

THE HINDU STANDPOINT
Rs. 2-50

GANDHI SUTRAS
Rs. 2-25

LECTURES ON BHAGAVAD GITA
Rs. 2-25

BHAGAVAD GITA
(With English Translation)
Re. 1

PRIMER OF HINDUISM
Re. 1

THE KATHOPANISHAD
Re. 1

UPASANA GITA
50 nP

M. L. J. Office, Madras-4

**M. L. J. OFFICE, MYLAPORE, MADRAS-4**

*Ideal for Parayanam*

**Srimad**

**Valmiki Ramayanam**

Price Rs. 12

**Sundara Kandam**

Price Rs. 3

★

PUBLISHED BY

M L J OFFICE, MADRAS 4



## सरलानि, सुन्दराणि, स्वल्पमूल्यानि, सचित्राणि धार्मिकपुस्तकानि

श्रीमद्वाल्मीकीयरामायणम्—भागद्वयात्मकम्, हिंदीभाषान्तरसहितम्, १७.५०; स्थूलाक्षरं मूलम्, ७.५०; तस्य सुन्दरकाण्डम्—मूलमात्रम्, स्थूलाक्षरम्, .७५, सुबद्धम्, १.५०; श्रीमद्भगवद्गीता—शांकरभाष्यसंवलिता, हिंदीभाषान्तरसहिता, २.७५; श्रीमद्भगवद्गीता—रामानुजभाष्यभूषिता, हिंदीभाषान्तरसहिता, २.५०; श्रीमद्भागवतम्—खण्डद्वयात्मकम्, हिंदीभाषानुवादसहितम्, १५.००; तदेव—मूलमात्रम्, स्थूलाक्षरम्, ६.००; तदेव—मूलमात्रम्, सूक्ष्माक्षरम्, ३.००; महाभारतम्—षट्खण्डात्मकम्, हिंद्यनुवादेन सहितम्, ६५.००; तदेव—खण्डचतुष्टयात्मकम्, मूलमात्रम्, २२.५०; हरिवंशः—(हिंदीभाषान्तरेण सह), ११.५०; जैमिनीयाश्वमेधपर्व—(हिंद्यनुवादेन सह), ५.००; विष्णुपुराणम्—(हिंद्यनुवादेन सह), ४.००; अध्यात्मरामायणम्—(हिंद्यनुवादेन सह), ३.००; वेदान्तदर्शनम्—(हिंदीव्याख्यया सह), २.००; उपनिषद्भाष्यखण्डः, शांकरभाष्यहिंदीभाषान्तरसहितः प्रथमो भागः, २.६२; द्वितीयो भागः, २.७०; शांकरभाष्यहिंदीभाषान्तरसहितं छान्दोग्यम्—३.७५; तथा बृहदारण्यकम्—५.५०; तथा श्वेताश्वतरम्—०.८७ [डाक्-व्ययः पृथक्]

प्राप्तिस्थानम्—गीताप्रेसं, पो० गीताप्रेस् (गोरखपुरं)

*Gita Press, P. O. Gita Press (Gorakhpur, U.P.)*


---

## Statement of ownership and other particulars about SAMSKRITA PRATIBHA

Form IV

*(As required by Rule 8 of Press Registrar's Act)*

| | | |
|---|---|---|
| *Place of Publication* | .. | 7, Sri Krishnapuram Street, Royapettah, Madras 14. |
| *Periodicity of Publication* | .. | Half-yearly. |
| *Printer's Name* | .. | K. Ramanathan, |
| *Nationality* | | Indian, |
| *Address* | | The Vasanta Press, The Theosophical Society, Adyar, Madras 20. |
| *Publisher's Name* | .. | Dr. V. Raghavan, |
| *Nationality* | | Indian, |
| *Address* | | 7, Sri Krishnapuram Street, Royapettah, Madras 14. |
| *Editor's Name* | .. | (Same as above) |
| *Nationality* | | ( ,, ) |
| *Address* | | ( ,, ) |
| *Owner's Name* | .. | Sahitya Akademi, |
| *Address* | | 74, Theatre Communication Buildings, Connaught Circus, New Delhi 1. |

I, V. Raghavan, hereby declare that the particulars given above are true to the best of my knowledge and belief.

23 - 3 - 1960

V. RAGHAVAN
*Publisher*

*IN PRESS* मैकडॉनल रचित *TO BE OUT SHORTLY*

# VEDIC MYTHOLOGY

का

## हिन्दी अनुवाद

# वैदिक देवशास्त्र

अर्थात्

## वेदों के आधार पर देवताओं का विशद विवेचन

अनुवादक

डा० सूर्यकान्त शास्त्री, एम.ए., एम.ओ.एल., डी.लिट., डी.फ़िल.

*Principal, College of Indology and Head of the Deptt. of Sanskrit and Pali, Banaras Hindu University.*

विशेषता:—मैकडॉनल महोदय ने वैदिक माइथॉलोजी में अपने अनुसन्धानों की पुष्टि के लिए अनेक ग्रंथों तथा वेदों के जो संकेत (References) दिये हैं, उन सबको विद्वान् अनुवादक ने अनुसंधाताओं (Research Scholars) की सुविधा के लिए मूलरूप में प्रस्तुत ग्रन्थ के फुटनोटों में देकर परम प्रशंसनीय और महत् परिश्रमसाध्य कार्य कर दिया है, जिसके फलस्वरूप स्कॉलरों को अब वैदिक माइथॉलोजी में संकेतित उद्धरणों का मूल अनेक संकेतित ग्रंथों में से ढूंढन नहीं पड़ेगा।

विदित हो कि अंग्रेज़ी ग्रंथ बहुत वर्षों से दुर्लभ हो चुका हुआ है। वह अब कसी भी मूल्य पर प्राप्य नहीं है।

साधारण संस्करण ३० रुपया लाइब्रेरी संस्करण ४० रुपया

प्रकाशक

श्री भारत भारती (प्राइवेट) लिमिटेड

*१ अनसारी रोड, नया दरियागंज,*

दिल्ली-६

संस्कृतप्रतिभा द्वितीय उन्मेषः द्वितीयो विलासः
साहित्य-अकादेमी नवतेरणी अक्टोबर १९९०

## विषयानुक्रमणिका

१. संपादकीयम्—वे. राघवः

खण्डकाव्यानि—

२. आलोकतिमिरवैरम्—३—कालीपदतर्काचार्यः

३. कामः—विजयशङ्कर कानज़ी

४. काकान्योक्तयः—जग्गु वेङ्कटाचार्यः

५. अन्योक्तिदशकम्—श्रीकान्तपाण्डेयः

६. श्लिष्टप्रकीर्णकम्—वे. राघवः

गद्यबन्धाः—

७. अश्वपालस्याञ्जनस्य कथा—य. महालिङ्गशास्त्री

८. पराजयः—टी. ए. सरस्वती

रूपकाणि—

९. नागराजविजयम्—हरिहरत्रिवेदी

१०. सोपानशिला—दे. ति. तातार्याचार्यः

अनुवादाः—

११. वसन्तविजयः—कवि 'कान्त' मणिशङ्कररत्नजिभट्ट [अनु० गौरीप्रसाद चु. झाला]

१२. विवरणम्—कृ. चन्द्रशेखरः [अनु० वा. ह. सुब्रह्मण्यशास्त्री]

१३. 'परभृतं प्रति'—चि. द्वा. देशमुखः

१४. "हसत"—को. ल. व्यासराजशास्त्री

१५. भारतम्-अद्यतनं श्वस्तनं च—जवाहर्लाल् नेहरू [अनु० वे. राघवः]

निकषोपलः (पुस्तकविमर्शः)—

गुरुवायुपुरेशाक्षरमालादिस्तवत्रयम् (पै. गणपतिशास्त्री), अष्टप्रासशतकत्रयम् (ए. रामस्वामिशास्त्री), श्रीबोधिसत्त्वचरितम् (सत्यव्रतः), कणः क्षुद्रः गृहं दहति (के. कृ. सोमयाजी), मनुचरित्रम् (को. य. ना. दीक्षितः), सरोजिनीसौरभम् (म. वे. शास्त्री), सौमित्रिसुन्दरीचरितम् (भवानीदत्तशर्मा), निष्किञ्चनयशोधरम् (ज. वि. चौधुरी), काव्यावलिः (शि. सं. सूर्यनारायणशास्त्री), जवाहरवसन्तसाम्राज्यम् (जयरामशास्त्री), आत्मदानम् (विजयसारथिः), शौरिराजस्तवः (ति. एस्. श्रीनिवासाचार्यः), शबरीचरितम् (सुन्दरेशशर्मा), भारतीयसांस्कृतिकनिधिः (रामजी उपाध्यायः), जीवनज्योतिः, प्रबन्धप्रकाशः (मङ्गलदेवशास्त्री), दीक्षान्तभाषणम् (रामकृष्णराव्), शारदा (व. अ. गाडगीळ), मालवसूयूरः (रुद्रदेवत्रिपाठी), गुरुकुलपत्रिका (धर्मदेवः), उद्भातृदशाननम् (य. महालिङ्गशास्त्री), आदर्शराघवः (सोमनाथशर्मा), सङ्गीतसौभद्रम् (वेल्णुकर्), आह्निकस्तवः (कपालिशास्त्री), साम्राज्यलहरी (बुद्धिसागरः), धर्मरक्षणम् (भू. लक्ष्मीनारायणः), दुर्गास्तोत्रम् (अरविन्दः—जगन्नाथः), कथामञ्जरी (माता), सन्मार्गः (के. एस्. नरसिंहशास्त्री), मातृमुक्तावलिः (माता—कपालिशास्त्री).

लेखकपरिचयः

"संस्कृतप्रतिभा"—सम्पादकः (तुरीयावरणपृष्ठे)

## सम्पादकीयम्—

अस्यास्तुरीयायास्सञ्चिकाया अयं विशेषः यदत्रान्ते प्रधानमन्त्रिणो 'भारतम्-अद्यतनं श्वस्तनं च' इति ख्याता उपन्यासमाला अनूद्य प्रकाशिता सञ्चिकाया मुकुटायमाना विराजते। अत्रास्या अनुवादस्य प्रकाशनमनुज्ञातवद्भ्यः राष्ट्रियपुस्तकप्रकाशसंस्थाधिकृतेभ्यः श्री चि० देशमुखप्रमुखेभ्यः प्रतिभा स्वमाधमर्ण्यमाविष्करोति।

द्वितीयवार्षिकसञ्चिकयोः पत्रसंख्या अधिकीभूता प्रतिभाप्रणयिभ्यः प्रमोदमाधास्यति। पूर्वतः समधिका लेखा अद्य प्रतिभायाः पत्रेषु प्रकटयितुं शक्या इति नूनमभिनन्दनीयोऽयं विषयः। प्रकाशनार्थं प्रेष्यमाणानि विरचनानि प्रतिपदं बहुलीभवन्ति। यावत्संभवं तानि प्रकाशयिष्यन्ते।

अस्मिन्नवसरे लेखकेभ्यो द्वित्रा अवधेया विषया निवेदनीया भवन्ति। तत्र प्रथममिदं वक्तव्यं यत् प्रतिभायां केवलं प्रकाशार्थं प्रेषिता लेखा एव प्रकाशमत्र प्राप्स्यन्ति, न तु पत्रिकान्तरेभ्योऽपि वितीर्णाः लेखाः। प्रतिभायां प्रकाशयितुमिष्टेन लेखेन प्रायो विषये प्रतिपादने शैल्यां वा कमपि नूतनमंशं मार्गं वा विवृण्वता भाव्यम्। परिमाणतः, यावच्छक्यम् एकस्यामेव सञ्चिकायाम्, अथवा परमावधिकतया सञ्चिकाद्वये समाप्तिं यास्यता च भवितव्यम्। पद्यबन्धेषु जागरूकैः निबन्धृभिः संयुक्ताक्षरात्पूर्वस्यादैर्घ्यं, कुत्रचिदयुग्मपादान्तस्य ह्रस्वता इत्यादिका दोषाः परिहरणीयाः। कथाश्च खण्डकथाः, रूपकाणि च एकाङ्कानि यदि स्युः ततः शोभनं भवेत्। सर्वथा एतानि लघूनि नातिदीर्घाणि च यथा स्युः तथा लेखकैः प्रयतितव्यम्। सर्वत्र च व्याकरणदृष्ट्या अपभ्रंशानां स्थानं न दातव्यम्; तदर्थं च शब्दज्ञैः सुहृद्भिः पण्डितैः परिशोध्य लेखाः प्रेषणीयाः। हिन्द्यादिप्रान्तीयभाषावासनानुपातिनी आङ्ग्लवासनावासिता च शब्दरचना तत्र तत्रानिवार्यतया आयात्येव लेखेषु; तत्र अवहितचेतोभिः प्रबन्धृभिः, यथा व्याकरणे तथा वाक्यप्रयोगे रीत्यां च या संप्रतिपन्ना महाकविपरम्पराप्रसाधिता अभिजाता सुन्दरी च संस्कृतशैली सा

समादर्तव्या, यद्यपि तत्रापि क्तान्त-कर्मणिप्रयोग-दीर्घसमासादिबहुला घटना पृथक्पद-साक्षात्क्रियापदादिप्रचुरैः प्रयोगैः परिष्कारमद्य अर्हत्येव। तादृशः परिष्कारश्च प्राचीनभाष्यकारादिशैलीमेव पुनरवतारयिष्यन् प्रयोगावबोधयोराञ्जस्यमापादयन् भाषायास्सरलसुभगतामुन्मीलयिष्यति। तथाविधेन प्रतिसंस्कारेणैव संस्कृतप्रतिभायाः कृतार्थतापि भवेत्।

# आलोकतिमिरवैरं नाम खण्डकाव्यम्

कालीपदतर्काचार्यः

(३)

## चरमवैरम्

दुर्वाचमुद्वीर्य गिरीन्द्रदर्यां प्रविष्टमालोक्य तमो विशङ्कम् ।
प्रविश्य बाह्यं विवरं कथञ्चिदालोक उच्चैः कथयाञ्चकार ॥ १ ॥
रे ध्वान्त! विभ्रान्त सदोषवृत्ते नादर्शतामेषि यदिद्धरूपः ।
गुणी न ते सम्मुखतः स्थितोऽपि तथा त्वयीह प्रतिबिम्बितोऽहम् ॥ २ ॥
आत्मन्यसन्तं गुणमप्यवैषि स्वबुद्धिदोषेण विमूढ! सन्तम् ।
अविद्यया ब्रह्मणि मूढजीवो यथा प्रपञ्चं शिवबुद्धिबाध्यम् ॥ ३ ॥
न कृष्णरूपे त्वयि कृष्णदोषाः प्रयान्ति दृश्यत्वमिदं न चित्रम् ।
समाकृतिर्माषचयेऽतिकृष्णे स्थिता सुकृष्णा गुटिका न दृश्या ॥ ४ ॥
युक्त्या सुधीभिः किल तेऽनुमेया न धीदरिद्रैरभिमानसारैः ।
विद्मो वयं येन तवापराधानवैषि न त्वं च धिया वियुक्तः ॥ ५ ॥
दोषास्तवोक्ता मयका पुरा ये सर्वे हि ते निश्चलयुक्तिसिद्धाः ।
तेषां निषेधाय वृथा श्रमस्ते त्वदुक्तिभारो बत भार एव ॥ ६ ॥
तथा स्वरूपं मयका तवोक्तं प्राप्तं यथा सूक्ष्मधिया पुरस्तात् ।
तदन्यथोक्तौ वद सत्यनिष्ठा भ्रष्टा न किं, सत्यपरा हि सन्तः ॥ ७ ॥
उद्घाटिते दुष्टजनस्य दोषे कदापि दोषं स धिया प्रजह्यात् ।
नैव स्वदोषः सुगमः सदोषैः स ज्ञायते यंद्यपरे वदन्ति ॥ ८ ॥
परे न पश्यन्ति मदीयदोषं मत्वैवमेके वृजिनं चरन्ति ।
प्राप्तप्रचाराद् विरमन्ति तस्मात् त्यजन्ति सर्वे न समाजलज्जाम् ॥ ९ ॥
प्रख्यापिते हेयतया च दोषे निन्दाभयात्तं न परेऽपि दध्युः ।
इत्थं समाजस्य हिता स्थितिः स्यात् समाजभव्यं हि सतामभीष्टम् ॥ १० ॥

अतो मयोक्तं तव दोषजातं न शात्रवान्नापि यशोऽभिलाषात् ।
नेयं ततः सौम्य! विकत्थना मे किं मां वृथा निन्दसि वैरबुद्ध्या ॥ ११ ॥
मम स्थितिर्यत्र जहासि तत् पदं यथा त्वमेवं किमहं तथा न हि ।
तदेवमन्योन्यविरोध आयते साम्यं न किं मूढ! निरूढभावयोः ॥ १२ ॥
दोषे समाने सति किं किलैकको दधात्यहो कापि परेण गर्ह्यताम् ।
किं कोकिलं कृष्णतयाधमं वदन् न हास्यतामेति परस्य वायसः ॥ १३ ॥
नरा यथा जीवगणास्तथापरे क्षुधादिभाजो विधिनैव निर्मिताः ।
हितं न तेषामपि किं न भाव्यतामित्युक्तिरत्यायतमोहशंसिनी ॥ १४ ॥
अदृष्टभेदेन विभिन्नयोनिषु स्रष्टा नियुङ्क्ते खलु जीवसंहतिम् ।
सुखस्य दुःखस्य च भोगहेतवे तत्तद्दशा तद्विधिसम्मतेक्ष्यते ॥ १५ ॥
पुरा कृताद् दुष्कृतराशिदोषाद् व्रजन्ति लोके पशुजन्म जीवाः ।
संभुञ्जते तत्र च दुःखमुग्रं किं तद्विरोधान्न विधेर्विरोधः ॥ १६ ॥
तद्दुःखभोगे विधिकाम्यभूते त्वं यासि वैरं सुहृदस्मि चाहम् ।
विधेर्विधानस्य निरोधकारी नैति प्रशस्तिं भुवने हितं वा ॥ १७ ॥
मां मन्यसे चेन्नृषु पक्षपातिनं तदीयंकल्याणकरं समं तदा ।
न मन्यसे किं वद पुण्यकारिणे सुखप्रदं सौम्य! विधिं तथाविधम् ॥ १८ ॥
ददाति धाता सितकर्मणे सुखं दुःखं तथा दुष्कृतकर्मकारिणे ।
व्यतिक्रमो नास्ति कदापि तन्नये कर्मैव मूलं सुखदुःखभोगयोः ॥ १९ ॥
अचेतनं वस्तु सचेतनेरितं तनोति कृत्यं न तदन्यथा क्वचित् ।
विधेरधिष्ठातृतया निदानिता स्थिता ततः कर्मफलेषु यौक्तिकी ॥ २० ॥
भूताः प्रसिद्धा अणिमादिशालिनः शिवस्य काम्याश्च सहायतावशात् ।
तेषां विधेया महतानुकूलता न जातु बाधेत्यपि नो मतं सहे ॥ २१ ॥
मायाविनो लोकसमक्षमेव प्रदर्शयन्तो बहुवस्तु तुच्छम् ।
किं देववद् बुद्धिमता प्रपूज्या न भूतिदृष्ट्या महिमानुमेयः ॥ २२ ॥

अस्थि श्मशानं भुजगो विषं तथा शिवस्य काम्यान्यखिलान्यमूनि किम् ।
हृदानुकूलेन विदः प्रवृण्वते तत्प्रातिकूल्यं मम तत् कुतो विषम् ॥ २३ ॥
आलोकजालेन महत्त्वभाजा स्वल्पत्विषां भूरिपराभवेऽपि ।
ताराघनाधेयभवोपकारान्मुक्तोऽस्मि निन्दापदलक्ष्यभावात् ॥ २४ ॥
शीतोऽस्मि चन्द्रेऽहमहो तथापि दोषाद् वियोगी मयि वेत्ति तापम् ।
दोषः स कामो विरहश्च बन्धोर्मदूष्मणा तन्नहि तद्विनाशः ॥ २५ ॥
रम्याणि वस्तूनि वियोगभाजामौत्सुक्यमन्तः प्रदिशन्ति भूयः ।
तद्गोचरानास्तिकृतव्यलीकाद् विपत्तिमायान्ति कदाचिदेते ॥ २६ ॥
ये संयमासादितचित्तसारास्ते नैव तत्रापदमाप्नुवन्ति ।
असंयता दुर्बलमानसा ये तेषां विपत्तौ मम कोऽपराधः ॥ २७ ॥
निहन्मि नाहं कमलं विधुं श्रितो रविं गतो वा कुमुदं मुदाकरम् ।
तयोः प्रकाशे समयौ व्यवस्थितौ दिनं त्रियामा च यथार्कचन्द्रयोः ॥ २८ ॥
कुहूनिशायास्तिमिरानुषङ्गतो न कालिकाभ्यर्चनयोग्यकालता ।
तस्यां परं तत्प्रथमप्रकाशनाद् विमुञ्च तस्मान्निजगौरवभ्रमम् ॥ २९ ॥
तमोव्यपेक्ष्यं यदि तत्समर्चने कथं नु दीपालिरिह प्रदीप्यते ।
उल्का-खधूपैरपि पूर्यतेऽम्बरं यतो विपर्यस्यति तामसी वृतिः ॥ ३० ॥
एकोऽपि जीवो वपुषः प्रभेदाद् विमिश्ररूपो बहुयोनिजातः ।
रूपैरनेकैर्जनकैरगण्यैर्यथा न गर्ह्यः किमहं न तद्वत् ॥ ३१ ॥
सूर्यात् सुधांशोः क्वचिदन्यतैजसाज्जातस्य मे रूपशरीरयोर्भिदा ।
रूपैरनेकैर्भवता तथाप्यहं किमित्यगण्यैर्जनकैश्च दूषितः ॥ ३२ ॥
गुणा हि यस्मिन् वयसाल्पकेऽधिकास्तस्य प्रशस्तिः सुधियानुमन्यते ।
बालस्य कृष्णस्य गुणैरलौकिकैः पितामहाद्यैरपि साधितार्चना ॥ ३३ ॥
तत् सृष्टिपूर्वं प्रलयात्तथोत्तरं किं सत्त्वमात्रेण वहस्यहङ्कृतिम् ।
चिरस्थिरत्वेऽपि गुणेन वर्जिते कथं नु युज्येत जयोदयस्त्वयि ॥ ३४ ॥

उद्बन्धनादौ त्वयकात्मदूषणं प्रकीर्तितं यत् सह दूषणेन मे ।
तस्यांशमात्रेण सहे प्रमाणतां यत्तत्र हेतुत्वमयुक्तिकं मयि ॥ ३५ ॥
उपायमिच्छन्ति फलेच्छया बुधा न तं विना कार्यमिति व्यवस्थितेः ।
उद्बन्धनादौ मरणाभिलाषतस्तमः किलेच्छन्ति जना न तु प्रभाम् ॥ ३६ ॥
न वाच्यमेवं यदितो निबन्धनं नोद्बन्धनाद्येव हि तन्निबन्धनम् ।
यदन्यथासिद्धमिदं नये विदामनन्यथासिद्धगतैव हेतुता ॥ ३७ ॥
उद्बन्धनादि प्रमितं मनीषिभिर्द्वारं न तत् कोपि निहन्ति हेतुताम् ।
अतस्त्वमत्रासि मतं निबन्धनं मुमूर्षुणा नाहमनिष्टसन्निधिः ॥ ३८ ॥
कथञ्चिदेवान्तरतः प्रयोजकात् तदा विशेषोऽस्ति फलोपकारिणः ।
तदा तदा तन्मरणोत्थपातके किं तारतम्यं न हि युक्तमावयोः ॥ ३९ ॥
नास्त्येव वा लङ्घ्यपि मेऽत्र पातकं किमन्यथा पापकृतः पिता तथा ।
पितामहाद्याः स इवाघशान्तये न कुर्वतां पापहरक्रियां पुरः ॥ ४० ॥
मोहात्मकं सुप्तिगतं तमो न सत् सहैव सौख्यानुभवस्य वर्जनात् ।
सुखानुभूतिः खलु जीववाञ्छिता न येन सा तत् कथमस्तु मङ्गलम् ॥ ४१ ॥
परस्परस्पर्द्धिविरोधिपक्षयोरेकस्य भव्ये न हि भव्यमन्यतः ।
युद्धे त्वयैकस्य हिते सुरक्षिते कथं तदन्याहितमन्ध! वार्यते ॥ ४२ ॥
निष्पक्षपातं प्रकृतस्य वीक्षणे तव प्रभावो न हि तत्र शस्यते ।
ममाधिकारे तु विरोधिनोर्द्वयोः सदुक्तया वीर्यपरीक्षणं क्षमम् ॥ ४३ ॥
श्रुतौ त्वयोत्प्रेक्ष्य निषेधबोधकं मा-शब्दमिद्धा प्रतिभा व्यतानि या ।
श्रुत्यन्तरैरत्र विरोधमुद्धतं कथं न सा पश्यति नेदमूह्यते ॥ ४४ ॥
वैरेण मय्यर्पितदोषसंहतेः प्रमार्जनं तावदकारि पूर्वतः ।
अथो किमप्यात्ममहत्त्वसाधकं वदामि वैरेण विनावधीयताम् ॥ ४५ ॥
जगत्यभीष्टोत्सवयामिनीमुखे तमोलवं नो बहुमन्यते जनः ।
अतस्तदुत्सारणहेतवे भवे समिद्धमालोककुलं तनोत्यलम् ॥ ४६ ॥

नवीनजायापतियोगयामिनीशुभक्षणेऽन्योन्यमुखावलोकने ।
शिवप्रचारे वरकन्ययोर्नवे मदीयसाहायकमेव सम्बलम् ॥ ४७ ॥

आरात्रिके धूपजधूमतामसं भृशं घनं हन्तुमनन्तरं न किम् ।
विधीयते दैवतपूजनान्तरे नीराजनं दीप्ततमप्रदीपकैः ॥ ४८ ॥

निशागमे यानमुखप्रदीपिका निजान्यदीयव्यसनापसारिका ।
न चेदसौ सम्मुखवस्तुदर्शिका पदे पदे हन्त विपद् विभीषिका ॥ ४९ ॥

वितत्य चित्रं विपणीषु सुक्रमं वणिग्जनाः पण्यगणं निशागमे ।
न यान्ति चेद् दीपसहायतां तदा जनं समाकर्षुमलं न कञ्चन ॥ ५० ॥

न यत्र गेहे खलु बाधकादृते दोषच्युतालोकसमीरसङ्गतिः ।
न तत्र वासो जनमङ्गलप्रसूरस्वास्थ्यमेवात्र चिरं निवासिनाम् ॥ ५१ ॥

लतास्तथा वृक्षगणा निरन्तरं सुदीप्तमालोकमुशन्ति शर्मणे ।
स यत्र नास्ते न हि तत्र तादृशी वृद्धिर्न वा तत्र तथा फलादिकम् ॥ ५२ ॥

सञ्जीवयाम्योषधिजातमात्मना सुधामयेनाहमितः सुधाकरम् ।
येनौषधीशः स निरुच्यते बुधैः शिवानि सूते जगतां किलौषधिः ॥ ५३ ॥

चन्द्रार्धमौलिर्विबुधो महेश्वरो दधाति शीर्षेण कलां कलानिधेः ।
तया समं तेन ममापि धारणान्नालोककीर्त्तिः किमु युज्यते भवे ॥ ५४ ॥

आलोकजाले मनसश्चिरं रतिर्मृत्योः परस्तादपि तत्प्रभावतः ।
चन्द्रे मनो दीप्तिमये निलीयते सर्वं जगद्वाञ्छति मामिति स्फुटम् ॥ ५५ ॥

आकर्णयोत्कर्ण ! ममान्त्यवर्णान् न विस्तरस्यावसरोऽस्ति भूयान् ।
मित्रेण साकं दिवसः प्रयाति प्रवर्त्तते च त्वरितं त्रियामा ॥ ५६ ॥

अथार्धकालं भज भूतिमात्मनो निष्पक्षपातं कुरु पाशवं जयम् ।
चौरान् समानन्दय चात्मघातिनः प्रतिष्ठते दूरपदं रिपुस्तव ॥ ५७ ॥

उक्त्वालोकः परुषमृदुलां वाचमेवं सगर्वं
त्यक्त्वा क्षोणीधरमुखदरीं क्वापि दूरे प्रतस्थे ।
मत्वा दूरं गतमथ रिपुं दृप्तसिंहादिनादैः
स्वं साम्राज्यं तिमिरमभितो घोषयामास हर्षात् ॥ ५८ ॥

अस्तव्यस्तस्तम इव दिवा दैववैगुण्ययोगाद्
राज्याद् भ्रष्टो नरपतिरिव त्यक्तनैजाधिकारः ।
दीनालोको विचयनपरः प्राप्य गेहप्रदीपान्
भूयो भूतिं दिनसमुदये भावयन्नास्त सुस्थः ॥ ५९ ॥

इत्यालोकतिमिरवैरे चरमवैरं (३) समाप्तम् ।
समाप्तं चेदं खण्डकाव्यम् ।

## कामः

विजयशङ्कर कानजी

जडविभवविलासान्लोष्टवद्यो विहाय
स्वयमविरतचिन्ताक्लेशमङ्गीकरोति ।
विधिबलविजयी यो विघ्नदुर्गावभेत्ता
स जयतु विमलानां सत्यकामः प्रयत्नः ॥ १ ॥

पद्मं यतः त्यजसि पीतरसं नवार्थी
वाणिज्यकार्यकुशलोऽसि पुनर्न कामी ।
कामस्तु काम्यविषये हि सदा निमज्ज-
न्नन्यं न पश्यति कुतो गमनावकाशः ॥ २ ॥

एतत्तु दुर्भगमिदं ननु लोकनिन्द्यं
यत्नैरलं विपुलविघ्नमयेप्सितार्थैः ।
एवं विचारयति तुच्छमना न कामी
कामः स एव विधिनापि न रुध्यते यः ॥ ३ ॥

नृत्यं गीतं स्वादुलावण्यकान्ति-
र्दिव्यामोदो भोगरम्यो विरामः ।
नो रोचन्ते तीव्रकामातुरेभ्यः
स्वेष्टैकाग्रो रुद्धवृत्तिर्हि कामः ॥ ४ ॥

यदीप्सितार्थेष्वसि सिद्धिकामो
यथाबलं त्वं सततं यतस्व ।
आरम्भशूरा न न विघ्नभीता
अभिन्नयत्ना हि जयं लभन्ते ॥ ५ ॥

दुराग्रहं मानमदं मलं च
त्यक्त्वाभिमानं सकलं च शान्त्या ।
विचार्य निश्चित्य सुखं ध्रुवं च
कार्यः प्रयत्नस्सततं हि तस्मै ॥ ६ ॥

व्यर्थं हि तद् यत्खलु हेतुशून्यं
भावेन किं तस्य वरोऽप्यभावः ।
न यस्य हेतुर्न हि कश्चिदर्थः
व्यर्थेन किं तेन तु जीवितेन ॥ ७ ॥

हृदयरसविलासबुद्धिहीनो जडविभवेषु सुखानि तानि पश्यन् ।
भवतु निजसुखेन गर्वितोऽसौ हृदयसुखं हि सुखं सुखं किमन्यद् ॥ ८ ॥

स्नेहार्थि शान्तहृदयस्य विशुद्धभावः
शान्तं कृतं हि हृदयं यदिदं मदीयम् ।
आनन्दसान्द्रहृदयो नु वहामि नित्य-
मानन्दभारमिव मित्र तवोपकारम् ॥ ९ ॥

ज्ञानं विद्या महैश्वर्यं वीर्यं शास्त्राणि शक्तयः ।
अस्त्वार्याणां हि सकलं विजयाय शुभाय च ॥ १० ॥

## काकान्योक्तयः

जग्गु वेङ्कटाचार्यः[1]

दृष्टिर्वक्रा गतिरपि तथा वाक् च वक्त्रात्प्रवृत्ता
मैत्री श्रोत्रे तनुरपि मषीकान्तिहारिण्यरिष्ट ।
वृत्तिस्सत्त्वैरतिशमपरैर्यच्च गेहं विशेस्त्वं
तत्त्याज्यं स्याच्चिरमपि ततश्चान्त्यजोऽसि द्विजेषु ॥ १ ॥

गत्वाऽज्ञातस्तुदसि शनकैस्सुस्थितांस्त्वं द्विजातीन्
पुष्टान्स्वेन श्रुतिसुखरवान्द्रावयंस्याम्रकुञ्जात् ।
आहूतस्त्वं सुलभ इतरैस्साकमागत्य भुंक्षे
पिण्डं पित्र्यं ह्यपचितिरियं नान्यसाधारणी ते ॥ २ ॥

गृध्रैर्मत्तैर्वियति च हठाधिष्ठितैरुह्यसे त्वं
सुप्तानां त्वं तुदसि नयने पायुदेशं पशूनाम् ।
नैका रीतिर्वियति च गतेः किन्तु नैकापि तूच्चैः
मृत्युस्तुष्टस्तव वरमदात्पैतृकीं ते तु तृप्तिम् ॥ ३ ॥

तावत्पिक इति विदितस्साम्यादाकारवर्णयोः काक ।
विवृते तुण्डे भाग्यादस्माकं काक एवाभूः ॥ ४ ॥

कुसुमपल्लवरम्यरसालके पिककुलैस्सह कोमलकूजितैः ।
स्थितिरियं यदि दैवबलादभूत्तव रुतेन हि नो भवति व्यथा ॥ ५ ॥

प्रासादशिखरवासादात्मानं मन्यसे पूज्यम् ।
उच्चैरितोऽपि गच्छेर्न हि गरुडः काक एव स्याः ॥ ६ ॥

कतिकतिविधानि लोके फलानि नो सन्ति काक मधुराणि ।
निम्बान्येव तु तेऽमून्यतीव तिक्तानि भोम्यानि ॥ ७ ॥

---

[1] नातिचिरात्कीर्तिशेषतां गतमेनमधिकृत्य गतायां सञ्चिकायां द्रष्टव्यम् ।

चित्रा मैत्री कदा दृष्टा लोकेऽस्मिन्काकघूकयोः ।
तत एव हतः काको नाऽभव्यं भूतये भवेत् ॥ ८ ॥

यद्गृहच्छदिमधिष्ठितवांस्त्वं काक रौषि विकृतेन रुतेन ।
तस्य बन्धुमचिरादुपयन्तं शंससीति कथयन्ति पुराणाः ॥ ९ ॥

द्विजेभ्यस्सर्वेभ्यः प्रथमतरमुत्थाय विरुव-
न्प्रभाते च स्नानं क्वचिदपि जले काक कुरुषे ।
अमेध्यानां खण्डान्यथ च तनुषे तुण्डपुटयोः
इदं ते शौचं नः प्रथयति हि चित्ते बहुरसान् ॥ १० ॥

दोषेष्वनेकेष्वपि सत्सु काक! श्लाघ्यस्तवैको विदितो गुणोऽयम् ।
कार्यस्य सिद्धिः प्रकृतस्य सद्यो दाक्षिण्यतस्ते गमने प्रयातुः ॥ ११ ॥

सकृत्प्रसूतिस्तव जातिरेषा न चेद्विधात्रा विहिताऽभविष्यत् ।
अतीव हिंसामभजिष्यदेव जगत्ययं जन्तुगणः पिकारे ॥ १२ ॥

# अन्योक्तिदशकम्

श्रीकान्तपाण्डेयः

प्रातः समीरण हरन् यदमन्दगन्धं
गर्वं वहन् वियति गच्छसि मन्दमन्दम् ।
तस्यैव युज्यत इदं विनिपातनं किं
शाखाचयात्तव सखे कुसुमावलीनाम् ॥ १ ॥

रे मौकुलेय ! तव भाति मनोविमोहो
यत्त्वं मदीयमिति रक्षसि कोकिलेयम् ।
सञ्जातपक्षतिरयं चपलः पुनस्त्वां
त्यक्त्वैति किं न विदितः परवञ्चकस्ते ॥ २ ॥

धाराधरो ध्वनति वर्षति च प्रकामं
तीव्रः प्रभञ्जनचयोऽप्यनिशं प्रवाति ।
देदीप्यते कटकटासहिता च विद्युद्
धन्यो नगेश्वर यतो न हि कम्पितोऽसि ॥ ३ ॥

धन्यासि वल्लरि ! पयोमुचि वर्षमाणे
वृक्षः प्रभञ्जनरयेण विशीर्णशाखः ।
आन्दोल्यमानवपुषा सहसा त्वया तु
स्वाधारभूततरुरेष न मुच्यते यत् ॥ ४ ॥

सिक्त्वा यदा खलु पयोद वसुन्धरां त्वं
नीहारपुञ्ज इव गच्छसि पाण्डिमानम् ।
तस्मिन् क्षणे कथय स प्रियचातकोऽपि
किंते सकाशमुपसर्पति चाटुकारः ॥ ५ ॥

कुचावपि नितम्बश्च यस्यास्ते गुरवस्त्रयः ।
कथं तस्या न नम्रत्वं कथं नानुद्धता गतिः ॥

★

प्राप्तुं ते वक्त्रलक्ष्मीं क्षपितनिजवपुश्चन्द्र आकाशवासी
पद्मं चाकण्ठमम्भस्यभितरणि हठात्तप्यतेऽलं तपांसि ।
लब्धुं दृग्विभ्रमं ते भ्रमति च मधुकृद्वृत्तिमाश्रित्य भृङ्गः
हंसीभूयापि हंसो व्रजति हिमगिरिं गत्यभावाद्विरक्तः ॥

# अश्वपालस्याञ्जनस्य कथा

य. महालिङ्गशास्त्री

आसीत् कस्यचित् प्रभोरञ्जनो नाम अश्वपालः। स ग्रामान्तरं जिगमिषोः प्रभोः पर्याणितमश्वं गृहद्वार्युपस्थापयामास। प्रभुरश्वमारूढः प्रास्थित। अञ्जनः कविकाप्रसक्तहस्तोऽन्वधावत्। गच्छतोस्तयोरंशुमाली पश्चिमदिशि व्यलम्बत। प्रभुर्बभाषे—अञ्जन, कियानध्वाऽवशिष्यते।

स्वामिन् क्रोशपञ्चकमात्रं गन्तव्यमस्माकम्।

मूर्ख, क्रोशपञ्चकं किं गोप्रतरं मन्यसे। अस्तं गतश्चांशुमाली। न च रजनीसंचारः सुकरः अस्मिन् पथि। कुतश्च ह्यो मारयिष्यते। तच्चिन्तय कुत्र सतुरगावावाम् आप्रभातं विश्रमिष्यावः।

स्वामिन् व्यतिलङ्घित इदानीमेव कश्चिन्मठः मार्गनिविष्टः। तत्किं परावर्त्यतामश्वः।

तथा कुरु।

अथ निवृत्येतस्ततश्च अन्विष्य प्राप्तमठौ तौ मठकौटुम्बिकस्य अनुमत्या तत्र रात्रिं वस्तुं प्रासज्येताम्।

**प्रभुः**—आर्य, किमावयोर्भोजनं संपादयिष्यसि।

**कौटुम्बिकः**—महामान्य, इयं मे प्रार्थनीया वरिवस्या, यदागन्तुका भोजयितव्या इति। तन्न किमपि हास्यते। संपन्नं भोजनं निर्वर्तयिष्यामि।

**प्रभुः**—परं मे प्रियम्। पारितोषिकं ते दास्यामि। अथ शयनीयं कुत्र मे कल्प्यते।

**कौटुम्बिकः**—बहिर्वेदिकायामेव सुभगो मारुतसंचारः। परं तु यत्प्रभुवर्याणां चित्तं तदेवानुष्ठास्यते।

**प्रभुः**—मयापि मारुतसंवीत एव स्थले सुखशयनमिष्यते। अश्वः पुनः कुत्र स्थापयितव्यः। अस्ति काचिन्मन्दुरा, गोष्ठं वा। अथवा काऽप्यन्या गुप्ता शाला।

**कौटुम्बिकः**—प्रभो नात्र मन्दुरायाः प्रसक्तिः । न च वयं गाः केतयामः । यदस्मिन् मार्गपरिसरे प्रचुरप्रचाराश्चोराः । एतेषु अध्वसु दैनन्दिन एष आक्रोशः—मदीयः पशुरपहृतः, मदीयः बलीवर्दः मुषितः, मदीया धेनुश्चोरिता इति । तदश्वरक्षणमेव दुष्करम् । रात्रिं जागरितव्यं युष्मत्सेवकेन । पुरस्तात् दृश्यमानेऽस्मिन् निम्बतरौ अश्वं सन्नह्य तदन्तिक एवासौ स्वपितु ।

**प्रभुः**—जागर्तु किल ।

**कौटुम्बिकः**—आम् आम् । जागर्तु ।

**प्रभुः**—अञ्जन, श्रुतं त्वया अस्यार्यस्य भाषितम् । अस्मिन् निम्बतरौ अश्वं सन्नह्य त्वया आप्रभातं जागरितव्यम् । व्याघ्राः किल तस्कराः अस्मिन् देशे । अहमपि इहैव बहिरलिन्दे शयानः त्वां तदा तदा शब्दापयामि ।

**अञ्जनः**—स्वामिन् एवं क्रियते ।

अथ प्रभुर्भुक्त्वा अञ्जनस्यापि भोजनं दापयित्वा शयनाय मतिं चक्रे । अञ्जनोऽपि अश्वमुपकल्पितघासं वृक्षस्कन्धे संयम्य तरोर्मूल एव शिश्ये । अत्रान्तरे शयानो निद्रया परिबाध्यमानः प्रभुरात्मानमक्षिप्रमृज्यादिभिः संस्कृत्य अञ्जनम् आहूयोवाच—"अपि जागर्षि । निद्रा नाम बलीयसी कदर्थना मनुष्याणाम् । मा तस्याः अवकाशं देहि । सा किल विप्रलंभवित्तका ईषत्प्रसरन्त्यपि चेतनासर्वस्वं मुष्णीयात् ।

**अञ्जनः**—स्वामिन् न दास्ये निद्राया अवकाशम् । जानामि तत्र युक्तिम् ।

**प्रभुः**—कीदृशी सा ।

**अञ्जनः**—न किल स्वामिनं शिक्षयामि तथापि अञ्जनवराकोऽपि कार्ययुक्तिष्वभिज्ञ एव । जानातु स्वामी । यत्किंचिद् दुर्घटवस्तुविचारक्लेशेन अपसारयामि निद्राम् ।

प्रभुः—(आत्मगतम्) न हीयते खल्वस्य मीमांसकत्वम्। (प्रकाशम्) साधु अञ्जन, साधु मां पुनः निद्रा बाधते। यदा जागर्मि तदा त्वां शब्दापयामि। वक्ष्यसि मह्यं किं वस्तु चिन्तितम् इति।

प्रभुः—सुखम् आप्रभातं स्वपितु स्वामी। क्लेशानर्हं स्वामिनः शरीरम्। अहं निरन्तरं जागर्मि। मास्तु वश्चिन्ता।

स्वामी वाक्यावसानमनाकलयन्नेव निद्रापहृतचेतनो बभूव। अञ्जनः पुनर्ध्यायन्ननिमिषलोचनः तस्थौ।

अथ प्रथमयामस्य विरामे प्रभुर्मशकबाधया प्रबुद्धः। तुरगापायशंकातंककातरः अञ्जन अञ्जन इति तारतरं रुराव।

अञ्जनः किं किम् अत्याहितं स्वामिनः इति सत्वरमुत्थितः पार्श्वमभ्यधावत्।

प्रभुः—अस्ति तुरगः।

अञ्जनः—अस्ति कुशली।

प्रभुः—अपि च जागर्षि सर्वां वेलाम्।

अञ्जनः—बाढं जागर्मि।

प्रभुः—किं त्वया दुर्घटवस्तु चिन्तितमासीत् येन जागरणं साधितवानसि।

अञ्जनः—स्वामिन् निरवसानोऽयं मे वितर्कः। यदा सागरमखानीत् तदा मृत्तिकां क्व प्राक्षैप्सीदिति।

प्रभुः—स्थाने खलु मीमांसा। अञ्जन, खातमृत्तिकां दवीयसि पारे प्राक्षिपत्। तावदन्यां विचिकित्साम् आलंब्य याप्यताम् अपरो यामः।

अञ्जनः—यथा स्वामी आदिशति।

प्रभुरुपबर्हं समीकृत्य प्रावारकमाशिरःपदाङ्घ्रि परिकर्षन् पुनरविशन्निद्रापारवश्यम्।

अथ क्षीणप्राये द्वितीये यामे मत्कुणदंशदुर्दशया संमुत्सारित-निद्रः प्रभुरश्वमनुस्मरन् ररास । अञ्जन, अञ्जन, किमरे, जागर्षि ।

**अञ्जनः**—स्वामिन् । जागर्ति ते भृत्यः संजातसर्पशंको गृहजन इव । स्वस्ति च हयस्य ।

**प्रभुः**—अहो ते स्वाधीनजागरणता । साधु अञ्जन साधु । अचिराद् द्रक्ष्यस्यस्य मत्प्रसादप्रसरम् । अथ किं वस्तु विचारमार्गगोचरीकृतमिदानीम् ।

**अञ्जनः**—अस्ति किल उच्चैः गगनवितानम् ।

**प्रभुः**—अस्ति ।

**अञ्जनः**—अस्मिन् कथं नामैतानि तारकाख्यानि उज्ज्वलवर्णकचित्रकाणि संयोजितानि ।

**प्रभुः**—सुष्ठु मीमांसितम् । तानि खलु निश्रेणीपरंपरामवस्थाप्याधिरूढैः संयोजितानि ।

अथ तृतीयो यामः किमपि अन्यद् वस्तु चिन्तयता यापयितव्यः । निर्व्यूढप्रायः तव भारः । दिष्ट्या नात्र संचारस्तस्कराणाम् ।

**अञ्जनः**—मयि जाग्रति संचरन्तोऽपि किं करिष्यन्ति ।

**प्रभुः**—साधु अञ्जन साधु । मां भूयो निद्रा विभ्रमयति । त्वं सावधानो भव ।

**अञ्जनः**—सुखं स्वपितु स्वामी ।

सुप्ते प्रभौ चिरजागरणम्लानेन्द्रियः स्थण्डिलशयनखिन्नगात्रः परिणतायां निशायां सुभगशीतलेन मारुतेन समाश्वासितः पुनर्मीमांसनीयवस्तुविचयनेन जडीकृतः शनैरवशविस्रस्तहस्तपादः घूर्णन् अचिरात्सुषुप्तिमवजगाहे ।

तस्मिन्नन्तरे कश्चन चोरः तदवस्थं तं प्रेक्ष्य अश्वस्थानेऽनियन्त्रणं परिभ्रमन्तं कमपि महोक्षं रज्जुसंयमनेनावस्थाप्य अश्वम् उन्मुच्यापवाहयामास ।

ततश्च यावत् सन्निहिता प्रभातवेला तावत् प्रबुद्धः प्रभुः अञ्जनं शब्दापयामास। अञ्जन अञ्जन जागर्षि खलु। अये अञ्जन किं सुप्तः। हा धिक् अञ्जन मदाशाभञ्जन!

**अञ्जनः**—(सत्वरं प्रबुध्यमानः सभयम्) स्वामिन्, स्वामिन्, आदिशतु स्वामी।

**प्रभुः**—अस्त्यश्वः।

**अञ्जनः**—अथ किम्।

**प्रभुः**—अपि जागर्षि।

**अञ्जनः**—आम्। सुष्ठु जागर्मि।

**प्रभुः**—अञ्जन, किम् इदानीं त्वया पर्यालोचयता जागरः स्थापितः।

**अञ्जनः**—(अश्वस्थाने महोक्षं निर्वर्ण्य) स्वामिन् अत्याश्चर्यं चिन्त्यते।

**प्रभुः**—कीदृशम्।

**अञ्जनः**—पश्यत एव मम कथं विधात्रा अस्मदश्ववरस्य शृङ्गयुगलम् आरोपितम् इति। विवेचयतु स्वामी।

**प्रभुः**—किमिति किमिति। (इति ससंभ्रममुत्थाय प्रधाव्य दृष्ट्वा) उक्षा किल। अथ कुत्राश्वः।

**अञ्जनः**—स्वामिन् अयमुक्षा, नायमश्वः संजातशृङ्गयुगलः?

**प्रभुः**—धिङ्मूर्ख, कुत्राश्वः। न खलु मृगयसे। (इति ताडयति।) कुत्र अश्वः। किं हारितश्वोरैः। (इति परिभ्रमति।)

एतेनारवेण जातप्रबोधः कौटुम्बिकः कवाटमुद्घाट्य अभिपतन् अन्वयुंक्त-'स्वामिन् किमिदमापतितम्। किमत्याहितम्'।

**प्रभुः**—अश्वो हारितोऽनेन वैधेयेन।

**कौटुम्बिकः**—भणितमेव मया चोरप्रचुरोऽयं देशः । रात्रिं जागरितव्यमिति ।

**प्रभुः**—भणितम् । मयापि शिक्षितोऽयं जाल्मः ।

**कौटुम्बिकः**—(दृष्ट्वा) कुतोऽयं देव, कुलबलीवर्दः निम्बतरौ निबद्धस्तिष्ठति ।

**प्रभुः**—अयेमेव किल अस्मद्भृत्यहतकस्य मते शृङ्गोत्पत्तिमनोहरोऽस्मदश्वः । (इति सासूयं हसति ।)

**कौटुम्बिकः**—(विहस्य) अये चोरहतकानां प्रतारणवैदग्ध्यम् ।

**प्रभुः**—आर्य, किमत्र प्रतिपत्तव्यम् ।

**कौटुम्बिकः**—अनेन वाहनभ्रंशेन महामान्यस्य भृशं व्यथितोऽस्मि । अतिधृष्टाः एते चोरपाशाः । किमतः करणीयम् । न मे धीः प्रसरति ।

**प्रभुः**—किमस्य हताशस्य धीः प्रसरति ।

**अज्ञनः**—प्रभो, मम वक्तव्यमस्ति । हयेऽपि नष्टे पल्याणकविकादयः अश्वसंयोगाः शेषमध्वानं वोढव्याः । तच्च कर्म नैकेन साध्यम् । को नु स्यान् मेऽत्र सहायः ।

**प्रभुः**—(सवैलक्ष्यहसितम् ) ईदृशभृत्यभाग्यभरितोऽहं किं नाभियुज्ये अश्वेऽपि हारिते त्वया सह पल्याणभारवहनकर्मणि ।

# पराजयः

टी. ए. सरस्वती

बालं ममैकं पुत्रं कथं पाठशालां प्रेषयामि इति चिन्ता बहूनि दिनानि यावत् मामपीडयत् । स प्रकृत्या प्रतिभाशाली क्षिप्रग्रहणपटुश्च । किन्तु अन्यैर्बालैः सह कदापि न क्रीडितवान् । अस्माकं गृहे विंशतिवर्षानन्तरं जातोऽयं शिशुः, परं सर्वैर्लाल्यमानोऽपि तुल्यवयस्कानां साहचर्यस्य अभावात् चिन्ताशीलो लज्जालुश्च । अन्यैर्बालिकाबालकैः सह क्रीडेत् इति कृत्वा चतुर्वर्षमात्रः स अस्मद्गृहसमीपवर्ति शिशुमन्दिरं प्रेषित आसीत् । पञ्चषाणि दिनानि परमप्रीत्या विना कस्यापि चोदनेन स तत्रागच्छत् । किन्तु अकस्मादेकस्मिन् दिने प्रातराशवेलायां स भोक्तुं नागतः । "गमनसमये अयमेकाकी क्रीडन्नास्ते, आह्वयामि तावत्" इति अवरजा मे बहिरङ्गणं गत्वा द्वित्रवारम् उच्चैराक्रोशत् "कुट्ट, कुट्ट" इति । कुट्टः प्रतिवचनं नादात्, नाप्यदृश्यत ।

अनुजा मे अन्वेष्टुं गता प्रत्यागत्य अवदत् "भगिनि, स तिष्ठति पल्यङ्कस्याधस्तात्, आहूतोऽपि न निष्क्रामति, नापि किंचिद् वक्ति । त्वमेव गत्वा आनय तमिति" । "इदं किमस्य नूतनं चापलम्" इति ईषद् हसन्ती अहं तत्र सत्वरमगच्छम्, अवदं च "वत्स, आगच्छ, भुक्त्वा शिशुमन्दिरं गच्छ, वेला अतिक्रामति" इति ।

न किंचित् प्रत्युत्तरम् । तमहं बलादुद्धृत्य क्रोडेऽकरवम् ।

"किं ते अद्य गमनेच्छा नास्ति" ।

"न" ।

"अपि किंचिदनिष्टं ह्यः संवृत्तं तत्र ?"

मौनम् ।

"तुभ्यं तत्र गमनं सुष्ठु रोचते स्म । अद्येयं अनिच्छा कुतः ?"

मौनम् ।

"जानाम्यहं वीरपुरुषस्त्वं तत्रत्याभ्यो बालिकाभ्यो बिभेषि। किं तास्त्वां धावने पराजितवत्यः।"

मौनम्। परिहासोऽपि अद्य निष्फलः संवृत्तः। अन्ते इयमेव बुद्धिर्मामासीत्।

"अस्तु अद्य मा गमः, श्वोऽवश्यं गन्तव्यम्।"

सहसा स वाणीमविन्दत इव।

"नाहं कदापि तत्र गच्छामि।"

परतः शिशुमन्दिराध्यक्षायाः मया ज्ञातं कुट्टः कदापि मन्दिरान्तर्न गच्छति, न वा शिशुभिः समं क्रीडति। द्वारपाल इव द्वारे तिष्ठन् अन्तर्बहिश्च प्रवर्तमानं सर्वं पश्यति। शिशुमनोभावज्ञाननिपुणा शिशुमन्दिराध्यक्षा कतिपयदिनानि तस्य यथेष्टकरणं सर्वमनुमेने। क्रमेण सा अलोकयत् तत्रागमने शिशूनां विविधप्रवर्तनानां निरीक्षणे च तस्य मनः पर्याप्तं प्रीतिमदिति। अनन्तरं एकस्मिन् दिने गृहप्रत्यागमनवेलायां सा तमवदत् "कुट्ट, यदि त्वं बहिरेव तिष्ठसि इहागमनेन किं प्रयोजनम्? श्वः प्रभृति त्वया नागन्तव्यं यदि अन्तर्नागमिष्यसि"। अनेनायं शीघ्रतरमन्तरागच्छेत्, अस्यापरिचितभीरुता अपसरेच्च इत्येवमासीत्तस्याः बुद्धिः। किन्तु फलं चिन्तितात् दूरं विप्रकृष्टम्। तदैव तेन निश्चितं नाहम् अत्रागमिष्यामि इति।

अत एव सुकुमारप्रकृतिर्मानी अयं कथं पाठशालां गच्छेत्, कथं वा मत्सरसम्मर्दपूर्णेऽस्मिन् लोके जीवेत्, विशेषतः पुरुषो भूत्वा, इति सदाहं चिन्ताकुला आसम्।

विद्यमाने एतादृशे व्यतिकरे तस्य विद्यालयगमनस्य द्वितीयवर्षे प्रथमदिन एव मध्याह्नभोजनार्थं तस्मिन्नागते सर्वे वयं भृशमुद्विग्नाः। अतीते वत्सरे आसन्नायां वार्षिकपरीक्षायामेव स विद्यालयं प्रथमं प्रेषितः। परीक्षाया त्रिष्वपि विषयेषु उच्चाङ्कान् प्राप्य विद्यालयगमनेन स परं सन्तुष्टोऽदृश्यत च। तत्किं पूर्वं शिशुमन्दिर इव स पुनरपि प्रतिलोमः संवृत्तः इति चिन्तयत्सु अस्मासु,

प्रतिवेशगृही रामचन्द्रः, येन सह कुट्टः पाठशालां गच्छति, आगत्य कथयति "कुट्टः विद्यालयाङ्गणे रुदन्नास्ते, आहूतोऽपि वारं वारं, मया सह नागत" इति ।

वेला मध्याह्नः । गृहे अस्मत् स्त्रीभ्यः ऋते कोऽपि नासीत् । आवां भगिन्यौ एव विद्यालयं प्रस्थिते ।

कुट्टः कैश्चित् बालैः परिवृतः विद्यालयाङ्गणे तिष्ठति । असकृदावृत्तं अश्रुप्रमार्जनं अक्ष्णोरधस्तात् पाटलिम्ना ख्याप्यते । केचिद् बालास्तं तूष्णीं निध्यायन्ति, केचित्तं करयोराकृष्य ततोऽपसारयितुं प्रयतन्ते । किन्तु स पदमात्रमपि न चलति । आवां वीक्ष्य सहसा स धावन्नागत्य मम जानुनी परितः स्वहस्तौ प्रक्षिप्य मुखं दृढं गूहितवान् । वारं वारम् आवृत्तानां प्रश्नानाम् उत्तरम् अलभमाना विषण्णा अहं समीपस्थैः तस्य समानवयस्कैर्बालैः शनैरुक्ता यत् प्रथमकक्ष्याया उत्तीर्णानां बालकानां नाम्नां मध्ये कुट्टस्य नाम न पठितम्, अत एव वराकः स रोदिति" इति । व्यक्तमासीत् कुट्टस्य दीर्घस्थायिना निश्शब्दरोदनेन तेषां कोमलहृदयेषु अपूर्वः सहतापातिरेक उद्भूत आसीत् ।

इदं कथं स्यात्? कुट्टेन पुनः परीक्षायाम् उच्चाङ्काः प्राप्ताः, कश्चिद् व्यतिक्रमोऽस्ति अत्र इति कुट्टं गृहीत्वा आवां प्रधानाध्यापकस्य समीपमगच्छाव, सर्वं वृत्तं विस्तरेण अश्रावयं च । सोऽपि तत्क्षणमेव कार्यालयात् प्रथमकक्ष्याया उत्तीर्णानां बालकानां नामावलीमानाय्य, तां निरीक्षमाणः पप्रच्छ "वत्स, किं ते नाम, ब्रूहि ।" "कुट्टः" ।

तमाक्षिप्याहं "न हि, तत्तु अस्य गृहे वात्सल्यनाम, विद्यालये तु सि. बालकृष्ण इति" ।

"सि. बालकृष्णस्य नाम अत्र वर्तत एव । वत्स, कथं तव नाम न पठितं न श्रुतं वा?"

"अम्ब, त्वं किं ब्रवीषि? नाहं कुट्टः किम्?"

सद्यः समस्तं दुर्घटितमस्माभिर्बुद्धं, स्वस्य साक्षान्नाम न जानन्नयं भ्रान्तो नाहंमुत्तीर्ण इति। सर्वे वयमुच्चैर्हसितुं प्रवृत्ताः। प्रधानाध्यापकः लज्जावनतं कुट्टं पृष्ठे संवाहयन् अवदत् "वत्स, मा भैषीः, त्वं कदापि अनुत्तीर्णो न भवेः। मात्रा सह गत्वा क्षिप्रं भुक्त्वा अपराह्णीयाय अध्ययनाय आगच्छ"।

बहिरौत्सुक्येन स्थिताः बालकाः सर्वे कुट्टादप्यधिकं प्रमुदिता अदृश्यन्त। स तु अन्तः प्रमुदितोऽपि स्वारोपितमौख्र्येण लज्जित इतस्ततोऽनवलोकयन्, तैः सममालपन्त्यौ नौ पश्चात्त्यक्त्वा द्रुतपदं गतः।

तथापि तदानीमेव अन्यैर्बालैः सह सहतापरूपया शृङ्खलया स बद्ध इव, अनया अनुभूत्या च तस्य हृदये नूतन आत्मविश्वासः संजात इव। अधुना स समवयस्कानां नेता सदा आह्लादपूर्णश्च।

# नागराज-विजयम्

हरिहरत्रिवेदी

## नान्दीपाठः

अवतु सदा वसुधां वृषकेतुः ।
मालवादिगणपूजितपादः,
भारशिवैश्च विवर्धितनादः ।
आततायिरिपोरवसादः,
भस्मचर्चितोऽप्यखिलचराचर-
जन्मस्थितिलयहेतुः ॥
अवतु सदा . . . . . ॥

**सूत्रधारः**—एषोऽहं सूत्रधारः आर्यमिश्रान् विज्ञापयामि यत् इदानीम् आधुनिकेन कविना हरिहरेण रचितं नागराजविजयं नाम नवीनं नाटकं प्रयोक्तुम् उद्यता वयमिति । अस्यां कृतौ शान्तिप्रियाः भारतवासिनो जनाः स्वतंत्रतां प्राणेभ्योऽपि गरीयसीं मन्यन्ते इति प्रदर्शितमस्ति ।

धन्योऽस्य प्रतिभान्वितः कविवरः स्वातंत्र्यदीक्षाप्रदं
लोके हारि च नागराजचरितं वीर्यान्वितं स्फूर्तिदम् ।
धन्या भारतपुण्यभूमितनयाः सेवाव्रते दीक्षिताः
धन्या चोज्जयिनी यदत्र मिलिताः सर्वे रसज्ञा इमे ॥

तत्, आर्ये, आरभ्यताम् संगीतकम् ।

अथ च—

यासां स्वातंत्र्यवेला मुखरितककुभां मङ्गलानां विधात्री
प्रध्वस्तारिप्रमादा विदलिततिमिरा कौमुदीव स्फुरन्ती ।

दत्तोल्लासा बुधानां प्रगतिपथजुषामुन्नतिं चादधाना
तामेवाश्रित्य तौर्यत्रिकमधुररसं सुभ्रु, गीतं विधेहि ॥

**नटी**— आर्यपुत्र, भवदादेशानुरूपं गायामि ।

सुभगः स्वतंत्रतायाः समयः सततं सुधारसस्रावी ।
आर्यावर्तविपक्षम्लेच्छानां द्रावणेऽनुकूलोऽयम् ॥

**सूत्रधारः**—आर्ये, रसिकजनमनोविनोदकरेण सुधास्यन्दिना तव गीतेन स्मारितोऽस्म्यहमतीतस्य, यदा—

शान्तिप्रियायामिह पुण्यभूमावशान्तिमुत्पादयितुं सकामाः ।
साम्राज्यमास्थापयितुं यतन्ते युद्धैकतन्त्रा रिपवोऽस्मदीयाः ॥

यदा च आक्रमणकारिणः कुषाणान्, पह्लवान्, शकांश्च गणराज्य-सेविताद् भारतात् बहिर्निष्कासयितुम् अस्मद्देशीयानां प्रयत्नाः प्रावर्तन्त ।

**नटी**—अथ कानि च तानि गणराज्यानि, अन्ये च राजानः ?

**सूत्रधारः**—आर्ये, शृणु—

मघा भद्राश्च यौधेयाः कुणिन्दाः अर्जुनायणाः ।
मालवाः नागराजश्च शत्रुसम्मर्दने रताः ॥

**नटी**—अस्मिन्नाटके शतद्रुप्रान्तवासिनां यौधेयानां राज्यपालस्य भूमिका भवतैव संपाद्या ।

**सूत्रधारः**—आम्, ज्ञातम् । एषोऽस्मि यौधेयः संवृत्तः ।

**(नेपथ्ये)**—जयति महतां यौधेयानां गणो बलशालिनां
तरणितनुजातीरोपान्ते जयेत् स मघेश्वरः ।
जयति सततं मद्राधीशोऽर्जुनायणमालवाः
जयतु रुचिरा श्रीसम्पन्ना सदा भरतावनिः ॥

**यौधेयः**—यावद्देशोऽयमाक्रान्तः कुषाणशकपह्लवैः ।
प्रगतिर्न भवेत्तावत् परराज्यं न सौख्यदम् ॥

तस्मात्

अरातिहतकानां नः स्वातंत्र्यपरिपन्थिनाम् ।
शल्यस्यारुन्तुदस्येवोन्मूलनं स्यात् सुखावहम् ॥

कथं च तत् संभवेत् इति सततं चिन्तातुरोऽहम् । अहो, पराभूत-शकबलः मालवगणप्रमुख इत एवाभिवर्तते । तत् संभावयाम्येनम् । विजयतां मालवगणप्रमुखः ।

कुषाणैस्सार्धमामन्त्र्य दक्षिणां दिशमाश्रितान् ।
शकांस्तद्विक्षतेः पार्श्वं तूर्णं प्रेषितवान् भवान् ॥
पराभूतशकानीकविक्रमाक्रान्तमालव ।
प्रीयतामनुना देवो महाकालो जयेन ते ॥

तव च विजयेन महाकालवासपूता उज्जयिनी स्वातन्त्र्यमवलम्बते । वर्धतां महाभागः ।

**मालवः**—पञ्चनदप्रदेशे शतद्रुप्रान्तं स्वतंत्रं कुर्वतां यौधेयानामेव अनुकरणमेतत् ।

**यौधेयः**—शकानां पराभवेनानेन तेषां मित्रत्वमापन्नाः कुषाणाः प्रभञ्जनोद्धूततरव इव निर्बलाः संजाताः । ते च सुदूरं बाल्हीकदेशे निवसन्तः अस्माकं भारते चाधिपत्यं कुर्वन्ति आयुक्तस्कन्धनिहितराज्यतंत्रभाराः । तैश्च नियुक्ताः अधिकारिणः अत्र निरङ्कुशाः समजायन्त । तेषामप्युन्मूलनस्य एष एवानुकूलः समयः । यतः

लघीयानप्यरिर्जातु नोपेक्ष्यो भूतिमिच्छता ।
स्फुलिङ्गः काष्ठयोगेन दहत्येव महावनम् ॥

**मालवः**—अपि च

उन्मूलनमरातीनां सुकरं व्यसने श्रुतम् ।
नदीवेगक्षीणमूलः सुखमुत्पाट्यते तरुः ॥

तस्मात् संभूय समुत्थितैरस्माभिः युगपदेव कुषाणानां पराभवः कार्यः । तथा च यतनीयं यथा ते अस्माकं देशं संत्यजेयुरिति अस्माकं संप्रधारणा ।

**यौधेयः**—युक्तमभिहितम् । अये, सिन्धुपारासंगमस्थितायाः पद्मावत्याः स्वामी इत एवायाति । तत् प्रत्युपगमनेन संभावयाव एनम् । विजयते पद्मावतीशः ।

**मालवः**—स्वागतं ते मित्र । यथावसरमेव दर्शनं जातम् ।

**नागराजः**—जयोऽस्तु जयमंत्रधराणां यौधेयानाम् । अपि च विजयतां मालवाधीशः । भवता शकाः पराजिता उज्जयिन्यामेवेत्यवगम्य त्वाम-भिनन्दितुं स्वयमेवात्रायातोऽहम् । दिष्ट्या वर्धसे अनेन विजयेन । अहं तु तावत्—

सेवायै मातृभूम्याः पुण्यसंभारमूर्त्याः ।
आत्मानं स्वेच्छयाहं भक्तिनम्रोऽर्पयामि ॥
उत्पाट्यारिप्ररोहान् आहवे बद्धरागान् ।
उच्चैः सिंहासनस्थां कर्तुकामोऽहमेनाम् ॥

शकानां मित्राणि कुषाणा अपि भारतं कथं संत्यजेयुरित्येव विचारः सततं मामुद्वेजयति । यौधयेन पूर्वं विजिता अपि ते भारते निवसन्त्येव । यावच्चार्यावर्तसंस्कृतिविघातकानामेषां न क्रियते निष्कासनं तावत् सुखं स्थातुं न शक्यतेऽस्माभिः ।

अत एवाहम्—

हित्वा स्वां विदिशामतिक्रमपरैः पद्मावतीमाश्रितैः
सद्यः कान्तिपुरीं तथा च मथुरामाक्रम्य मे पूर्वजैः ।
या कीर्तिः समुपार्जितेन्द्रभवने जेगीयमाना भृशम्
सा स्थैर्यं कथमाप्नुयादविजिते देशद्रुहां सञ्चये ॥

**मालवः**—भवांस्तु एकाकी एव कुषाणान् पराभवितुं निःशेषमुत्सादयितुं च समर्थः ।

**यौधेयः**—युक्तमाह । यतः—

आर्यावर्तविवर्तसंकटततिं स्वातंत्र्यविध्वंसिनीं
कोऽन्यो वारयितुं क्षमोऽस्ति बलिनं नागाधिप, त्वां विना ।
वीराशंसनसेविनः करधृतो यच्चंडकौक्षेयकः
श्यामीभूतसपत्नकीर्तिबिरुदो धत्ते विसंवादिताम् ॥

अपि च

न हिनस्ति न नैशमन्धकारं द्युमणिर्व्योमगतोऽद्वितीय एव ।
समदद्विपकुम्भदारणेऽसौ न हि साहाय्यमपेक्षते मृगेन्द्रः ॥

तदस्मिन् स्वतंत्रतासंग्रामे समरनायकपदं स्वीकृत्य अनुगृह्णातु भवान-स्मान् । संभाव्यते एतत् भवत्येव ।

**नागराजः**—अनुगृहीतोऽस्मि ।

अन्येषु सत्स्वपि भटेषु बलोत्कटेषु
प्रत्यर्थिसैन्यमवमर्दयितुं क्षमेषु ।
आयोजिता रणमहे वयमेव मुख्याः
साध्यं भवेत्तदखिलं भवतां बलेन ॥

तस्मादेवं योज्यम् । कुषाणानां प्रमुखः अधिकारी मथुरायां निवसति । तत्र दक्षिणतो मम सेना प्रविशतु, उत्तरतश्च यौधेयानाम् । मध्ये च धृतः अरातिः अन्येषां गणराज्यानां चमूभिः सम्मर्दनीयः । एवं च कृते कुषाणाः आर्यावर्तं विहाय पलायन्ते एव नूनम् । अपि च

मोघीकृतारातिविचेष्टितानां
तनुत्रशीर्षण्यधनुर्धराणाम् ।
ऊर्जस्वलानां गणवाहिनीनां
क्ष्वेडाः प्रसह्य प्रचरन्तु लोके ॥

अथ च अस्य शुभकार्यस्य सिद्धयै भगवन्तं महाकालं प्रार्थयामः । (सर्वे मिलित्वा)

नमामि चन्द्रशेखरं वृषध्वजं पुरान्तकं
ललाटनेत्रनिर्गताग्निदग्धपुष्पसायकम् ।
अकिंचनं स्वसेविनामशेषसौख्यदायकं
हिमाद्रिराजकन्यकापतिं नटेश्वरं भजे ॥

**नागराजः**—हे पिनाकिन्, हे खंडपरशो,

तव प्रसादादरयः पुरापि नष्टा इति श्रूयत इन्दुमौले ।
वरं तथा देहि, भव, प्रसीद, निष्कण्टकं भारतमाशु भूयात् ॥

**यौधेयः**—विजयतामसद्रणनीतिः । अथ सपद्येव—

भेरीदुन्दुभिशंखनादपटहध्वानैर्दिशः पूरयन्
हस्त्यारोहिपदातिवर्गचलनैर्विश्वंभरां कम्पयन् ।
धावद्वाजिखुराहतावनिरजोव्रातैः खमाच्छादयन्
विद्राणारिबलः प्रसर्पतु रणे संशप्तकानां गणः ॥

**नागराजः**—एवमेव वयं सर्वे सन्नद्धाः ।

**यौधेयः**—तदधुना गन्तुकामोऽहम्, मालवाधीशेन सार्धम्, स्वकार्यमनुसन्धातुम् ।

**नागराजः**—सत्वरमेव साधयितव्यं भवद्भ्याम् । शुभमस्तु ।

**यौधेयः**—एतौ गच्छावः । मालवाधीश, आगम्यताम् ।

**मालवः**—एष आगच्छामि ।

**नागराजः**—एतावुभावपि प्रस्थितौ । किं चाधुना मया कर्तव्यमिति विचारयामि । आम्, ज्ञातम् । प्रयाणात् पूर्वकम् राजमहिषी द्रष्टव्या । राजधानीं पद्मावतीं प्रति गमनमप्यावश्यकमेव । तत् तत्रैव गच्छामि । अहो, किमेतत् । महच्चित्रम् । देवी इत एवोपसर्पति । जाने युद्धाभिमुखं मां ज्ञात्वा सा स्वयमेवात्रागता । एषा सा । देवि, स्वागतं ते । इत आस्यताम् । कस्मावत् सहसात्रागमने हेतुः ? अतर्कितमेतत् । ननु विस्मितोऽस्मि भवतीमत्रावलोक्य ।

**देवी**—विजयतां महाराजः । युद्धैकरसो भवान् कदाचिन्मां विस्मरेदित्याशङ्क्याहमेवात्रगता देवं द्रष्टुं, प्रोत्साहयितुं च । अपि च, नाथ, जानामि ते दृढं संकल्पमपरिमितं बलं च । किन्तु, स्त्रीस्वभावकातरं वेपते मे हृदयम् ।

**नागराजः**—आर्ये, मङ्गलवेलायामलं शङ्कया । युद्धं खलु उत्सवः क्षत्रियाणां, विशेषतश्च सर्वाभ्युदयहेतुकम् । अधुना प्रत्यासीदति प्रयाणकालः । तदनुजानीहि मां प्रस्थातुम् ।

**देवी**—हृदय, धैर्यमवलंबस्व । ननु सततं सन्निहित एव ते स्वामी । नाथ, विजयलक्ष्मीपरिवृतं त्वां सपद्येव द्रष्टुमीहे ।

**नागराजः**—ननु, विजयलक्ष्मीः सन्निहितैव मे ।

(नेपथ्ये शंखध्वनिः)

**नागराजः**—किमेतत्? शंखध्वनिः! मन्ये, यथा मित्रं मे यौधेयगणाधीश एव शंखमाध्मातवानिति । देवि, चिरादितः प्रस्थितः स तवागमनात् पूर्वमेव । तेनाधुना युद्धोद्यमे रतेन भाव्यं सुदूरम् । ध्वनिस्तु उपान्त एव । कथमेतत् ।

**देवी**—एतत् विस्माययति नूनं मामपि । भवतु, क्षणं प्रतिपाल्य ज्ञास्याव एव ।

**यौधेयः**—एषोऽहं यौधेयः सुहृद्वरं नागराजं द्रष्टुं पुनरायातः । एष प्रविशामि । पद्मावतीश, दिष्ट्या वर्धसे । अहो, नांगमहिषी अपि अत्रैव । अभिवादये भवतीम् । अहं प्रत्यावृत्तः श्रवणसुखदां वार्तां श्रावयितुम् ।

**देवी**— विजयेतां सुहृदौ । मुदावहमुदन्तमवगन्तुमुत्सुकाहम् । किं तत्?

**यौधेयः**—आकर्ण्यतां कुतूहलेन मुदा च । एवमेतत्

प्रस्थातुकामानथ भारतीयान् सैन्यान् विदित्वैव, विहाय देशम् ।
सर्वेऽरयो दूरतरं प्रयाताः मृगा यथा केसरिनादभीताः ॥

तदा सिद्धमभीष्टम्, संपादितश्च मनोरथः ।

**नागराजः**—किं कथयसि? ननु कुषाणाः भारतात् पलायिताः! अपि सत्यम्?

**यौधेयः**—अथ किम्?

**नागराजः**—नातः परं किञ्चित् विस्मयावहम् । सुहृद्वर, कथय कथय,

दृढं समभिघातिनः प्रहरणैकदीक्षाभृतः
विहाय किमु भारतावनितलं कुषाणाः गताः?

**यौधेयः**—सत्यमेव ।

**नागराजः**—विनष्टविषपादपं किमुत भारतप्रांगणम्?

**यौधेयः**—एवमेव।

**नागराजः**—अथो भरतभूतलात् किमुत विद्रुता ईतयः? ॥

**यौधेयः**—एतदपि अवितथम्।

**नागराजः**—मित्र, प्रियं नः। अपि तु सुतरामाश्चर्यावहमेतत् सर्वम्। कथं ते कुषाणाः सुवर्णप्रसवामवनिमेनां सहसैव विहाय त्वरिततरं पलायिताः?

**यौधेयः**—नात्र विस्मयस्यावकाशः। यतः

अभ्यर्णवर्तिभिररातिगणैः समन्तात्
युद्धे धृते युगपदेव कुषाणराजे।
मित्रे च निर्जितबले शकनायकेऽथ
तैरुज्झिता सपदि भारतभूमिरेषा ॥

**नागराजः**—युज्यते एतत्। तदा विनैव युद्धं महान् विजयलाभोऽस्माकमिति महत्प्रीतिकरमेतत्।

**देवी**—दिष्ट्या वर्धते मे स्वामी पद्मावतीशः। यौधेयगणाधीश, वर्धतां भवानपि।

**नागराजः**—महाराज्ञ्यैव कृतमभिनन्दनं बहु मन्ये।

**यौधेयः**—देवि, एतत् सर्वं भारतलक्ष्मीस्वरूपायाः तवैव प्रसादः यदस्मिन् स्वतंत्रतासंग्रामे विनैव रक्तपातमस्माकं विजयलाभः। यतः

आयोधने शत्रुबलं निहत्य पराक्रमेणासिबलेन लब्धात्।
नूनं गरीयान् विजयस्स एकः शस्त्रप्रयोगेण विना य आप्तः ॥

अपि च

अहिंसया सत्यबलेन काम्यं सम्पादनीयं सकलं च यत्र।
स पुण्यदेशो जयतादमर्त्यसेव्यस्त्रिलोक्यां ननु भारताख्यः ॥

भगवति, इदमप्यस्तु तव प्रसादात् —

अपगतरिपुशंकं भारतं देवि भूयात्
दिशि दिशि गणराज्ये मोदमायान्तु लोकाः ।
अविरलसुखमूलं सर्वशान्तिप्रदायि
द्रुततरमभितः स्वाराज्यमीयात् समृद्धिम् ॥

अपि च

जयतुतरां भरतावनिरस्या
ईतिभीतयो यान्तु विनाशम्,
सिद्धिरविकला यातु सकाशम्,
गणराज्यं सुतरां च विकासम्,
सस्यरसैः परिपूरितभागा प्रतिपदमेतु विलासम् ॥
सत्यामोघमंत्रतरुशोभितसर्वोदयफलभूषा ।
पूर्णा भवतु मनीषा ॥
रम्यवनैर्निर्झरतरुकुसुमावलिभिः कृतबहुवेषा ।
जयतुतरां भरतावंनिरेषा ॥

# सोपानशिला

दे. ति. ताताचार्यः

कुशलं दिशतादेवो विपुलं कमलेक्षणः।
स्मृतिविच्छेदतो यस्य क्षुत्सतां नोपवासतः ॥

(१)

**कापिलः**—अये पश्यसि तस्य अविवेकम्, अस्मदीयां सोपानशिलां स्वोपयोगाय अपेक्षते!

**जाजी**—कोऽत्र विस्मयः? स्वोपयोगार्हे वस्तुनि अपेक्षा सर्वस्य स्वतो जायते।

**का०**—प्रिये, एषा ते अक्षोभ्या शान्तिः अतीव नाम बहुमतिमर्हति, मम तु तद्वार्ताश्रवणात् प्रभृति ज्वलति चेतः, न केवलं विस्मयते। परेषां वस्तु तैरुपयुज्यमानं कश्चित् स्वयं जिहीर्षति चेत् स किं मनुष्यः?

**जा०**—कामं न मनुष्यः। मृग एव। लोके एवंविधाः सुबहवो मृगा वर्तन्ते। लीलारसिकस्य सर्वेश्वरस्य विचित्राः सृष्टयः। तत्र परितापो निष्फलः। कर्तव्यं तु चिन्तनीयम्।

**का०**—योगिनामपि दुर्लभा इयं ते निस्सङ्गता मम मनोव्यथां वर्धयति। तमाहूय तूष्णीं तत्प्रदानमेव वरं मन्यस इव।

**जा०**—नाहं कदाचिदपि आर्यपुत्राभिप्रायस्य प्रतीपगामिनी भवेयम्। वस्तुतत्त्वं तु निवेदयामि, आर्यपुत्रस्य अवसादकारिणीम् इमां मानसीं विक्रियां शमयितुकामा।

**का०**—मम आर्तिं चिकित्सितुमीहसे। न पुनस्तस्य दौरात्म्यमनुशोचसि।

**जा०**—अनुशोचनेन किं भविष्यति?

का०—केवलं बालभावं दर्शयसि। न वयसोऽनुरूपं भाषसे। परकीयाय वस्तुने कथं परः स्पृहां कर्तुमर्हति? इदं सम्यक् परामृश। किमेषा नीतिः? किमयं धर्मः?

जा०—(उत्थितं हासं नियच्छन्ती) मृगाणां का नीतिः? को धर्मः?

का०—न स मृगः। अपि तु मनुष्यः।

जा०—न। चतुष्पादो मृगा अन्ये। द्विपादोऽन्ये। द्वितीयराशिगतः सः।

का०—अलं ते उपचारोक्तिभिः। द्विपादो मनुष्याः। ते विवेकिनः, न मृगवन्मूढाः। मनुष्येण सता तेन "इदमेषां स्वम्। अनेन ते स्वकार्यं निर्वर्तयन्ति। तस्मिन् असाकमभिलाषो न युक्तः।" इति विजानता स्ववस्तुभोगमात्रसन्तुष्टेन भाव्यम्।

जा०—प्रकृत्या सात्त्विकस्य सात्त्विकजनैकसंसर्गशीलस्य आर्यपुत्रस्य खलस्वभावपरिचयावकाशो नैव भूतपूर्वः। अतः आत्मौपम्येन मनुष्याः सर्वे आर्जवनिधय इति दृढां प्रतिपत्तिं कुर्वन् अद्य ग्रामण्यो दुरभिलाषेण इयन्तमुद्वेगम् आर्यपुत्रो भजति।

का०—"लोकवृत्तान्तमजानतः तवैव बालभावः। न तु तत्र सुव्युत्पन्नाया मम" इति ब्रवीषि।

जा०—क्षन्तुमर्हत्यार्यपुत्रः। नाहं तथा उद्धता, यथा आर्यपुत्रं प्रति अविनयव्यञ्जिकां वाचं विसृजेयम्।

का०—न न। नाहं त्वामपराधिनीं प्रतिपद्ये। किमहं न जानामि, मद्धितैकपरा त्वं तत्तद्वदसीति। तदास्ताम्। इदं तु पश्य। प्राच्योऽस्मत्कुलपुरुषाः प्रदेशान्तरवासिन आसन्। कुतोऽपि निर्बन्धात् तत् स्थलं विहाय स्थिरवासहेतोः अत्र आगच्छन् मे पिता किल इह अभिनवं निर्मितस्यास्य गृहस्य पूर्वपुरुषाध्युषितगृहारम्भकिञ्चिद्वस्तूपयोगेन तत्सम्बन्धः

कश्चन कथञ्चित् सम्पाद्य इत्यभिनिविष्टः। महता श्रमेण इमां सोपानशिलां तत आनीय मुखद्वारसोपानमिदं बबन्ध। इदं भित्त्वा उद्धृत्य इयं सोपानशिला अन्यस्मै देयेति कथमेतत् सह्यम्?

जा०—कोऽयमागच्छति?

(प्रविश्य)

पुरुषः—महन्, नमस्ते।

का०—को नु सौम्य त्वम्?

पु०—लेपकारः ग्रामणीस्वामिनः अभिनवं गृहं निर्मिमाणः।

का०—किं ते अस्मदभ्यागमप्रयोजनम्?

पु०—स्वामिना किल प्रेषितोऽस्मि।

का०—(क्रोधसंरक्तमुखः पत्नीं वीक्ष्य ततः पुरुषं प्रति) केन कार्येण?

पु०—स्वामी किल अभिनवं एकं गृहं निर्माति।

का०—लोके बहवो बहूनि कार्याणि कुर्वन्ति।

पु०—तत् अवसितप्रायम्।

का०—अद्य नावसितं चेत् श्वोऽवसितं भविष्यति।

पु०—बहिर्द्वारसोपानपङ्क्तिरिदानीं बध्यते।

का०—कामं बध्यताम्।

पु०—तत्र चत्वारि सोपानानि।

का०—तावन्ति वा न्यूनानि वा अधिकानि वा यावदपेक्षं बन्धव्यानि।

पु०—शिलामयानि सोपानानि बन्धुमिष्टानि।

क०—कामं तथा भवतु। स्वेच्छानुसरणे कः प्रतिबन्धः?

पु०—तिस्रः शिलाः सन्ति।

**का०**—ग्रामणीः प्रभवति । चतुर्थ्यपि तस्य अत्यन्तं सुलभा ।

**पु०**—बहुप्रयतितवताऽपि न लब्धा ।

**का०**—भवतु । न वयं परगृहवृत्तान्तश्रवणकुतूहलिनः । अस्ति नः कर्तव्यम् । साधयामस्तावत् । त्वमपि गत्वा स्वकर्म कुरु ।

**पु०**—न, महन्! श्रोतव्यम् । तदर्थमेव स्वामिनाऽहं भवत्सकाशं प्रेषितः ।

**का०**—शिलार्थम्?

**पु०**—आम् ।

**का०**—न वयं शिलावणिजः । ये ते, तान् प्रति त्वया गन्तव्यम् ।

**पु०**—किमिदं ग्रामणीस्वामिनो न विदितम्?

**का०**—विदन् कथं त्वां मत्सकाशं प्रेषयंति?

**पु०**—इयं भवद्गृहसोपानपङ्क्तौ स्थिता श्लक्ष्णा शिला अत्रभवता दातव्येति स प्रार्थयते ।

**का०**—अये! सम्यक् तावदेतत् । नूनं श्वः स्वगृहवत्सस्य दृष्टिवैकल्यपरिहाराय असच्चक्षुरपि उत्पाट्य दीयमानमपेक्षेत । ग्रामाधिकारे हि वर्तते । तेन स एको मनुष्यः अन्ये सर्वे पशवः तदुपकरणभूताः । स यथा वर्तयति तथा तैर्वर्तितव्यम् ।

**जा०**—आर्यपुत्र, अलं वार्ताहरेऽस्मिन् क्रोधं प्रदर्श्य । अयं तपस्वी किं कुर्यात्? सौम्य, त्वं याहि । स्वामिनं ब्रूहि तं विषयम् आवां चिन्तयन्तौ वर्तावहे इति ।

**पु०**—तथा । (निष्क्रान्तः)

**का०**—अयि, सुकृतिनी त्वम् । शान्तिमनुप्लुतां रक्षसि । मम तु किमपि कल्लोलवान् क्रोधप्रवाहः अनुकूलं वर्धते । किं कुर्याम्?

जा०—आत्मनः कुलं विद्यां वृत्तं चानुचिन्त्य अन्तःशत्रुरयं नियन्तव्यः। अथ वा काऽहमार्यपुत्रमुपदेष्टुम्।

का०—न तथा वक्तव्यम्। काले प्राप्ते सर्वे उपदेष्टारो भवितुमर्हन्ति। परन्तु तस्य दौरात्म्यस्मरणं पदेपदे जायमानं मां परवशीकरोति। नाहमात्मन ईशे।

जा०—कामं तथा। किन्तु लोकस्वभावस्य यथावदवगमः क्रमेण शान्तिं फलिष्यति। तथा मे मतिः। पश्यत्वार्यपुत्रः—

परकीयं जिघृक्षन्ति कामनिर्दग्धचेतसः।
तान् परे निजिघृक्षन्ति सदैवं दुःस्थितं जगत्॥

का०—आं, प्रिये। एवमेतत्। किन्तु अस्मिन् विषये को निश्चयः? तं ब्रूहि।

जा०—किमहं ब्रवाणि? यदि दीयतामिति वदेयं तदार्यपुत्राय न रोचेत। यदि न दीयतामिति, तर्हि बलवद्विरोधमनुमतवती स्याम्। स कुपितः किं किं न कुर्यात्?

का०—तथ्यमात्थ त्वम्। अतिसङ्कटा स्थितिः। सर्वेश्वरः शरणम्।

(२)

ग्रामणीः—कलम्ब, कच्चित् तमन्वयुङ्क्थाः? किमाह स्म?

कलम्बः—यथापूर्वं "अद्यापि पर्यालोचना वर्तते" इति वदति। दातुं नेच्छतीति भाति।

ग्रा०—ममापि तथा मतिः। उपायेन प्रवर्तमानानां अर्थाः सिद्ध्यन्ति। अत्र साम नोपायः। अतः अगत्या उपायान्तरमवलम्बनीयम्। जानासि?

तथा कृत्वा निर्वर्तय कार्यं, अविलम्बितं च, अनन्यविदितं च। सूर्योदयात् प्राक् सर्वं निष्पन्नं भवितुमर्हति। समग्रं पारितोषिकं लप्स्यसे।

क०—प्रभौ प्रसन्ने किं मे न सुलभम्? तदास्तां प्रभो। अभ्युपगतस्य कार्यस्य सम्यङ् निर्वर्तने मे दृष्टिः, नान्यत्र।

ग्रा०—तद्विजानन्नहं त्वामन्विष्य आनाय्य अस्मिन् कर्मणि नियुञ्जे। गच्छ तावत् कार्यसिद्धये। देवी आगच्छति। (कलम्बो निष्क्रामति। देवी सुमतिः प्रविशति)।

**सुमतिः**—कोऽयं पुरुषः इतो निर्गच्छति?

ग्रा०—असद्ग्रामवास्येव।

सु०—अदृष्टपूर्वः। किं खलु तस्य इहागमनप्रयोजनम्?

ग्रा०—(सम्भ्रान्तोऽपि सावहित्थम्) न खलु किञ्चित्। केवलं मां द्रष्टुमागतः।

सु०—आर्यपुत्रस्य दर्शनमात्रेण तस्य तदीयानां च उदरं पूर्यत इव।

ग्रा०—भवत्याः साम्प्रतमत्र आगमनप्रयोजनमहं जिज्ञासे।

सु०—मन्ये तदागमनप्रयोजने ज्ञाते मदागमनप्रयोजनं ज्ञातं भविष्यति।

ग्रा०—कोऽनयोः सम्बन्धः?

सु०—सुनिबिडः सम्बन्धः।

ग्रा०—नूनं मया विनोदाभिलाषिणी त्वम्।

सु०—सन्तप्यमाने मनसि विनोदस्य कोऽवसरः?

ग्रा०—तर्हि कलहमिच्छसि।

सु०—आर्यपुत्रेण कलहायिता क्व गच्छेयम्? किमियता कालेन कलहरुचिं मामार्यपुत्रो निश्चितवान्?

ग्रा०—(उच्चैः) अलमधिकमुक्त्वा । किमुद्दिश्यात्र आगताऽसि ?

सु०—आर्यपुत्रं किमपि विज्ञापयितुकामा ।

ग्रा०—तदर्थं समयप्रतीक्षा कार्या ।

सु०—अयं समय इति निश्चित्य आगमम् ।

ग्रा०—यन्मे अनभिमतं तत्करणे प्रवणाऽसि ?

सु०—कामं तद्ब्रवेत् । किन्तु आर्यपुत्रस्य अहितनिराकरणे हितकरणे च प्रावण्यं मे धर्मः । अतः प्रवणाऽस्मि ।

ग्रा०—(सक्रोधम्) अपसर तावदितः । हितमहितं च बहु त्वं जानासि ।

सु०—जडानामपि वचनं कदाचित् पथ्यं भवति । अतस्तत् बुद्धिमद्भिरपि श्रोतव्यम् ।

ग्रा०—(स्वगतम्) अये, रूक्षमधिक्षेपमपि सहमाना किञ्चिद् वक्तुमभिनिविष्टेयम् । श्रोष्यामि तावत् । (प्रकाशं) प्रलप, शृणोमि ।

सु०—जनापवादभीरुता महापुरुषलक्षणम् ।

ग्रा०—यत् किमपि प्रति भीरुत्वं कापुरुषलक्षणम् । कुतो मया भेतव्यम् ? मां प्रति कः किं वदति, ब्रूहि तम् । तस्य शिरो भेत्स्यामि ।

सु०—(विषण्णा स्वगतम्) अहो बत अधिकारविषवेगमूर्छा आर्यपुत्रस्य । (प्रकाशम्) न यः कश्चिदेको जनः, कृत्स्नः पौरजनो वदति ।

ग्रा०—किमिति ?

सु०—"वृतिरेव यदि सस्यं चरति, अन्यतः कुतस्तस्य रक्षा भवेत्" इति ।

ग्रा०—(सविषादं स्वगतम्) बतेयं विषयं जानातीव । (प्रकाशम्) अनलङ्कृतया स्पष्टया वाचा ब्रूहि ।

सु०—मन्ये आर्यपुत्रेण गृहीत एवार्थः । अथापि निदेशविधेया सती विस्पष्टं वदामि । ग्रामवासिषु एकस्य स्वम् अपरो यथा नापहरति, तथा तदधि-

पतिना समग्रं संविधानं कार्यम्। जाग्रता रक्षणीया। कथञ्चिद् वृत्ते-ऽपहारे, अपहृतं वस्तु सर्वप्रयत्नेनोपलभ्य प्रत्याहृत्य स्वामिसकाशं प्रापणीयम्। अपहारी च दण्ड्यः। एवं सति अधिपतिरेव यदि चोरान् प्रोत्साह्य तत्साह्येन कस्यचिद् ग्रामवासिनः स्वमपजिहीर्षति तत्र किं कर्तव्यम्?

ग्रा०—विदुषीव भाषसे। मौढ्यं तु प्रकाशयसि।

सु०—प्रतिबोधनीयां यद्यसम्बद्धं भाषितवत्यस्मि।

ग्रा०—अधिपतिः किञ्चिदपेक्षते चेत् सद्यस्तदुपपादनपरैर्ग्रामवासिभिर्भाव्यम्। स्थानगौरवं एवं तैः परिपालनीयम्।

सु०—(सविषादं स्वगतम्) अहो बत आर्यपुत्रस्य उन्मस्तकोऽहम्भावः।

ग्रा०—यदा ते तत्र मन्दायन्ते, तदा बलात्कारोऽवर्जनीयो भवति।

सु०—अधिपतेरपि परकीये वस्तुनि अपेक्षा कथं युज्यते?

ग्रा०—अधिपतित्वाद्युज्यते।

सु०—त्रैलोक्यं जितवतः पौलस्त्यस्य मैथिलीकामना युक्तैव किलाभूत्।

ग्रा०—सा स्त्री। प्रकृता शिला।

सु०—स्त्रीति शिलेति को विशेषः परस्वत्वे समाने।

ग्रा०—अप्रतिविधेयमौर्ख्यं त्वम्। आवयोश्चर्चा सन्तिष्ठताम्। प्रतिनिवृत्य स्वकार्यं पश्य।

सु०—अनर्थो भविष्यतीति अतीव बिभेति मे अन्तरात्मा।

ग्रा०—कोऽनर्थो मम भविष्यति? (सहासम्) यथा स दाशरथी रामो राक्षस-राजस्य शिरश्चिच्छेद तथाऽयं दरिद्ररामो मम शिरश्छेत्स्यतीति किन्नु सन्त्रस्ताऽसि?

सु०—(अतिदुःखिता) मा मैवम्। स कामं दरिद्रो दुर्बलः प्रतिकाराक्षमः। कुलशीलविद्यावृत्तसम्पन्नेन तेनाराध्यमानः स एव तु रघुवीरः तदमित्रेषु स्वयं दण्डधारो भवेत्। (अश्रूणि मुञ्चति)।

ग्रा०—अये, दृष्टमगणयित्वा अदृष्टमनुप्रविष्टाऽसि। अलमलम्। प्रतिनिवर्तस्व। युष्मत्सुलभं ब्रह्मास्त्रं अश्रुमोचनमपि अन्ततः आदृतवत्यसि। परन्तु निष्फलम्। दृढसङ्कल्पोऽहम्। श्व एव सुनिर्मितस्य महतः प्रासादस्य सर्वातिशायि रामणीयकं पश्यन्ती आनन्दाश्रु मोक्ष्यसि। निरातङ्का भव।

(३)

कापिलः—अयि; पश्यसि? गता शिला।

(आगत्य)

जाजो – निशीथे निद्रापरवशेष्वस्मासु चोरवृत्त्या जहारेव।

का०—तत्र कः संशयः? किं पुनरिदानीं कर्तव्यम्?

जा०—किं कर्तव्यम्? कालगतिरीदृशीति तत्त्वं जानद्भिः तूष्णीं स्थातव्यम्।

का०—न। नीतिस्थले व्यवहारः प्रवर्तनीयः।

जा०—तदपरं महत् सङ्कटम्। के साक्षिणः? सम्प्रति निशीथे अनन्यविदितं हि जहार।

का०—हा हन्त, अनाथं जगत्। अस्मादृशानां दुर्बलानां प्रबलैः पीड्यमानानां रक्षाप्रत्याशैव किल नास्ति।

जा०—परमार्थोऽयं यदार्यपुत्र आह।

का०—दैवाद् भयमेकं लोके धर्मप्रतिष्ठाहेतुः। तदत्यन्तं लुप्तम्। अतः प्रायः सर्व उत्पथगामी। (अभिवीक्ष्य) कोऽयमागच्छति?

जा०—(दृष्ट्वा, उपांशु) अहिपतिः, यः किल 'खलः' इत्युपपदं कृत्वैव जनैर्निर्दिश्यते ।

(प्रविश्य)

अहिपतिः—नमो नमः ।

का०—आशिषः । उपविश्यताम् । यदि किमपि वक्तव्यमस्ति, तत् श्रोतुकामोऽस्मि ।

अहि०—अतीतायां किल रात्रौ अस्मिन् गृहे चौर्यं किञ्चिद् वृत्तम् । तदाकर्ण्य अतिमात्रं विषण्णोऽभूवम् ।

का०—न महार्घं किमपि हृतम् । सोपानशिलाऽत्र स्थिता न दृश्यते । यातु कामम् ।

अहि०—न तथा स्वामिन् । हृतं वस्तु महाघममहार्घं वेति नायं विमर्शः । किन्तु चौर्यं वृत्तं न वेति । वृत्तं चेत् हृतप्रतिलम्भे अपराधिनो दण्डे च यत्नः कार्यः ।

का०—सौम्य, लौकिकीषु प्रवृत्तिषु नास्माकं परिचयः । वस्तुनाशेन यावत्सङ्कटं ततो महत्तराणि बहूनि सङ्कटानि तत्र स्युरिति बिभिमो वयम् ।

अहि०—स्वामिन्, श्रद्धधातु भवान् मम वचनम् । अस्मिन् कार्ये सर्वं भरम् अहं वक्ष्यामि । अल्पाऽपि भीतिश्चिन्ता वा युष्माकं मा भूत् । यथा सङ्कटं किमपि न भवेत् तथाऽहं सर्वं करिष्यामि । केवलम् अभिशंसनपत्रे हस्ताक्षरं विन्यस्य स्वस्थ आस्तामत्र भवान् ।

का०—व्यवहाराय अपेक्षितं धनमस्मासु नास्ति ।

अहि०—सर्वं व्ययमहमेव करिष्यामि । तस्य कृते मनागपि चिन्ता भवद्भिर्न कार्या ।

का०—सौम्य, इदमिदानीं मे प्रष्टव्यं भवति । कुतस्ते अस्मिन् विषये इयती श्रद्धा ? अस्मदिच्छानुसारं वयं करिष्यामः । कुतस्त्वं निर्बध्नासि ?

अहि०- अत्र द्वे कारणे स्तः एकं ग्रामण्यः शासनम् । स हि अधिकार-मदमत्तः क्षुद्रः सार्वभौममानी इतरान् सर्वान् अत्यन्तमधन्यते । इदानीमत्र भवन्तमिव सर्वान् बहुधा उपद्रवन्नास्ते ।

अपरं अधर्मोपमर्देन धर्मप्रतिष्ठापनम् । अहमनक्षरज्ञः ; अकिञ्चिज्ज्ञः । अत्र भवतः पुरतः स्थातुमप्यनर्हः । किं पुनर्भाषितुम् । तत्रापि धर्ममधिकृत्य । तथाऽपि महद्भ्यः श्रुतं धृतं च किञ्चिद् विज्ञापयामि । दयया क्षमया च शृणोत्वत्रभवान् अहिंसा सत्यं अस्तेयमित्येते लोकसर्वेषां मनुष्याणां साधारणा धर्माः ; यत्र जनाः एतन्निष्ठा भवन्ति स देशो राजन्वान् । तस्मिन् देशे 'प्रजाः पुरुषायुषजीविन्यो निरातङ्का निरीतयश्च' भवन्ति, यस्मादेषां धर्मणामद्य विप्लवो जातः, तस्मात् बहुविधाभिः बह्वीभिः दिनेदिने वर्धमानाभिः विपद्भिः प्रजाः पीड्यन्ते । इदं तत्त्वं विद्द्भिः लोकक्षेमकांक्षिभिः उदारहृदयैः सज्जनैः अधर्म-प्रवृत्तिप्रतीरेषु यथाशक्ति यन्तव्यम् । ग्रामप्रधाने दुर्जने शिक्षिते इतरः कोऽपि एवंविधे पापकर्मणि न प्रवर्तेत, तदिदं लोकहितमुद्दिश्य अपरिचितपूर्वोऽपि अत्रभवतः सन्निधिमागतोऽस्मि ।

का०—(सविस्मयम्) हन्त! अनक्षरज्ञमात्मानं ब्रवीषि; विपश्चितामपि दुर्वेद्यं धर्मतत्त्वमुपन्यस्यसि । (पत्नीमवेक्षते)

जा० सौम्य, साधुरयं एकान्तशीलः स्वदैवं चिन्तयन् गृहान्तर्वर्तते । तं किमिति चत्वरम् आकर्षसि?

अहि० (स्वगतम्) अये, पुरुषो वशं गतः । नेयं स्त्री (प्रकाशम्) अम्ब, चौर्यानुमतिपापं प्राप्स्यथ, यदि चोरस्य दण्डने न प्रवर्त्स्यथ ।

जा० चोरस्यैव पापमिदं आचक्षते, न तु चोरितवस्तुस्वामिनमपि ।

अहि० न तथा ; वृत्तस्य चौर्यस्य गोपनं हि भवद्भिः कर्तुमिष्यते । अधर्म-कारिणं यावत् पापं तावत् पापं तद्गोपनकारिणामपि ।

जा०—किं तत् गोपनं नाम, यदस्माभिश्चिकीर्षितमिव अभिधत्से। यदि केचिदस्मान् प्रक्ष्यन्ति किं युष्मद्गृहे चौर्यं वृत्तमिति, आमित्येव वयं वदिष्यामः, यथा त्वयि साम्प्रतम्। न त्वपह्नोष्यामहे। बहुक्लेशहेतुत्वात् व्यवहारप्रवृत्तिं तु नेच्छामः।

अहि०—व्यवहारप्रवृत्तिर्दुष्परिहरा। चौर्यं वृत्तं जानन्तो हि पालकाः चोरं यत्नादुपलभ्य युष्मान् साक्षिणः कृत्वा नीतिस्थले विचारणां कारयिष्यन्ति। न तु तूष्णीं स्थास्यन्ति।

का०—सौम्य, अत्र साक्षी दुर्लभः। निशीथे शिलां हृतवन्तं कः साक्षादपश्यत्? "अयं शिलामहरत्, अहमपश्यम्" इति को वक्ष्यति?

अहि०—भवन्तो न जानन्ति। बहवः सन्ति साक्षाद् दृष्टवन्तः। प्रतिरूपमपि गृहीतं वर्तते।

का०—(सविस्मयं) प्रतिरूपं गृहीतं वर्तते! कच्चित् सत्यं वदसि?

अहि०—सत्यं वदामि महात्मन्। गृहीतं वर्तते।

का०—किं केषाञ्चित् पूर्वमेव ज्ञातं सोऽस्मदीयां शिलां हरिष्यतीति। प्रतिरूपग्रहणसंविधानं च ततः कृतमासीत्?

अहि०—महात्मन्, किं तस्य सर्वस्य विस्तरेण? प्रायः सर्वे अत्रत्याः तं द्विषन्ति। तस्य यथार्हदण्डप्रापणे मदापनयने च चिरात् समयप्रतीक्षा अभवन्। समय आगच्छत्। सर्वमकुर्वन्। व्यवहारारम्भमिदानीं प्रतीक्षन्ते।

जा०—सौम्य, परेषामुत्साहेन यदि व्यवहारप्रवृत्तिर्भवति, कामं भवतु। वयन्तु स्वयं किमपि कर्तुं नेच्छामः।

अहि०—अम्ब, सर्वपीडाकरः स धूर्तः यथा यथा शीघ्रं दण्डेन युज्यते तथा तथा ग्रामस्य क्षेमः। तत्र कथं भवती परिपन्थिनी भवति?

का०—बलवदनिष्टापातशङ्किनी इयं भृशं बिभेति ।

अहि०—न मनागपि भेतव्यमित्यसकृदवोचम् । अहं प्रतिभूः । अल्पमपि सङ्कटं भवतां यथा न भविष्यति, तथाऽहं जागरूकी भविष्यामि । दैवेन शपे सर्वं भरमहं वक्ष्यामि । निश्चिन्ता यूयं स्त ।

का०—तथा भवतु सौम्य । अभिशंसनपत्रं सज्जीकृत्य प्रेषयं । हस्ताक्षरं विन्यस्य प्रतिप्रेषयामि ।

अहि०— धन्योऽस्मि । इदं महापुरुषलक्षणम् । साधयामि । (निष्क्रान्तः)

जा०—ममास्मिन् साशङ्कमेव मनः ।

का०—सर्वत्र ते सशङ्कं मनः । कुत्र विस्रम्भि ?

(४)

ग्रामणीः—स्याल, कच्चित् नूतनगृहालङ्काराः सर्वे निश्शेषिताः ? कच्चिद्वाद्यकारा उपस्थिताः, पुरोधाश्च ? कच्चित् फलानि, शर्करा, खण्डशर्करा, पूगताम्बूलानि पुष्पाणि च पतद्ग्रहेषु निक्षिप्य सज्जीकृतानि ? कच्चित् यावदपेक्षं रूप्याणि खण्डाश्च उद्धृत्य निहितानि ? यथा लग्नातिपातो न भवेत् तथा इतः प्रस्थातव्यम् ।

स्यालः—सर्वं सज्जम् । लग्नमागतम् । त्वरया प्रस्थातव्यम् । किन्तु आयुष्मतः पुष्करास्यस्य आगमनं प्रतीक्ष्यते ।

ग्रा०—प्रातरेव वत्सेन आगतेन भाव्यम् । कुतो न जाने अद्यापि नागच्छति । धूमशकटागमनसमयो ह्ययम् । नूनमस्मिन् शकटे आगमिष्यति । मोटार्यानं प्रेषय स्थानकं प्रति । त्वरया तमानेष्यति ।

स्या०—तथा करोमि । (स्यालः श्रीकरो निष्क्रामति । पैतृष्वसेयः अभ्रिः प्रविशति)

ग्रा०—स्वागतं प्रियबान्धवायं पैतृष्वसेयाय। उपविश्यताम्। कच्चित् कुशलं गृहे सर्वेषाम्? कथमेकाकिनो भवत. आगमनम्? कच्चिदन्ये पृष्ठत आयान्ति?

पै०—सर्वत्र समग्रं कुशलम्। अभिशंसनान्मुक्तो मातुलपुत्र इति तु श्रुतवतां प्रवर्धमानः प्रमोदोऽस्माकं वपुषि न माति।

ग्रा०—पैतृष्वसेय, मामभियुज्य प्रवृत्तस्य व्यवहारस्य पर्यवसानं कथमन्यथा भवेत्?

पै०—ख्यातो महापुरुषो ग्रामणीर्भवान्। तस्य चौर्याभिशंसनमभूदित्याकर्ण्य वयं उत्कम्पिताः, विस्मिताः, प्राड्विवाकनिर्णयं प्रति तीव्रजिज्ञासाश्च अभूम।

ग्रा०—प्राड्विवाकस्य निर्णेयं किमवर्तत। विचारे उपक्रान्ते निर्दिष्टेषु साक्षिषु यः कोऽपि नोपस्थितः।

पै०—अविश्वसनीयेषु विश्वस्य व्यवहारमुपाक्रमतेव अभिशंसाकारी।

ग्रा०—स कश्चिदुञ्छवृत्तिः कुमतिः असमर्थेष्वग्रगण्यः स्वपरबलाबलमजानन् परवञ्चनयैव जीवतः खलस्य कस्यचित् प्रोत्साहनेन व्यामुग्धः दुष्प्रवृत्तिमकरोत्।

पै०—उं। ततः परम्।

ग्रा०—सं खलः कन्याविवाहहेतोः धनार्थी। मामेत्य द्वे सहस्रे रूप्याणि ऋणमयाचत। गृहीतप्रत्यर्पणे तस्य न मतिः, नापि शक्तिः। अतोऽहं प्रत्याचक्षि। कालं प्रतीक्ष्य स्थितः सः मत्प्रतिकूलाचरणे तं दारिद्र्यारामं उपकरणमकरोत्।

पै०—महतामुपद्रवकारिणो दुर्जनाः कदा कुत्र नाभवन्। ततः—

ग्रा०—ततः किम्। तं पिशाचं तन्त्रेण आनीय अनुनीय तदपेक्षितं अनल्पं बलिमददाम्।

पै०—अहो बत धूर्तः अकिञ्चित्कारेण द्वे सहस्रे रूप्याणि लेभे।

ग्रा०—किं क्रियताम्। अस्मद्गौरवं हि कथमपि रक्षणीयम्। इयता स तृप्त आसीदिति तु सन्तोष्टव्यमभूत्।

पै०—स मन्ये साक्षिणः सर्वान् विघटयामास।

ग्रा०—आम्। असाक्षिको व्यवहार इति अधिकरणिक इमं परास्यति स्म।

पै०—तत्त्वबुभुत्सया पृच्छामि किं तदीयं वस्तु तस्याविदितं भवता आहृतम्?

ग्रा०—आम्। अन्यथा ग्रामाधिपत्येन मे किं फलम्?

पै०—(विहस्य) अथ व्यवहारे भग्ने स तपस्वी किमकरोत्?

ग्रा०—कथं तपस्वीति सानुकम्पमिव भवान् भाषते। स हि ग्रामण्यं मां तिरस्कुर्वन् अविनीतः विध्वंसनीयः। मिथ्याऽभिशंसनात् मम मान-हानिमजनयदिति तं प्रति प्रतिव्यवहारप्रवर्तनाय अधिकरणिकस्यानुमतिं लब्धवानस्मि। दृढं मन्यतां भवान् कतिपयैरहोभिः तं तदीयं च सर्वं अभावसात् करिष्यामि। अन्यथा नाहं पुमान्।

पै०—(सभयं स्वगतम्) हा कष्टम्। सीमातिलङ्घी मातुलपुत्रस्याहङ्कारः प्रागेव रूप्याणां सहस्रद्वयं दण्डं प्रापितः। पुनः किमनर्थान्तरं भविष्यति, न जाने। सर्वेश्वर इमं रक्षतु।

(फट् इति कश्चन शब्दः)

ग्रा०—(शिरसि वामं हस्तं निधाय) हा, किमिदम्?

पै०—(ससम्भ्रमं) किं किं, किं मातुलपुत्र। (लोष्टमेकं तस्य पार्श्वे पतितं पश्यन्) हन्तेदं लोष्टमावरणात् भवतः शिरसि सजवं पतितम्। हस्तमपनयतु भवान्। किं रक्तोद्गमोऽस्तीति पश्यामि। (दृष्ट्वा) त्स त्स त्स। तीक्ष्णेन पार्श्वेन पतित्वा त्वचमभैत्सीदयं सुधाघनः। दिष्ट्या नात्यगाधो व्रणः। अचिरात् शोषमेष्यति। कच्चिन्न तीव्रा वेदना?

(झटिति प्रविश्य कश्चित् ग्रामण्यो हस्तें पत्रमेकमर्पयित्वा निष्क्रामति)

**ग्रा०**—(पत्रमपावृत्य वाचयित्वा 'हा वत्स' इत्याक्रन्द्य मूर्छितो भूमौ पतति)।

**पै०**—अहो अत्याहितम्। (ग्रामण्यः सविधे उपविश्य तस्य मुखं परिमृशन्) को नु भो अन्तः! शीतं जलं व्यजनं च त्वरितमानीयताम्।

(प्रविश्य)

**स्या०**—(ग्रामण्यमवलोक्य सविषादम्) हा कष्टम्। किं वृत्तं पैतृष्वसेय।

**पै०**—यः कोऽपि सहसाऽऽगत्य पत्रमेकं भवदावृत्तस्य हस्ते दत्वा निरक्रमीत्। तदनुवाचयन्नेवायं मूर्छां गतः पतितः शेते।

**स्या०**—(पत्रमादायानुवाच्य) हा हतविधे! ईदृशं नु ते दुश्चेष्टितम्। (उपविश्य रोदिति)।

**पै०**—श्रीकर, न युक्तं पुंसां धैर्यमुज्झितुम्। अत्रभवतो मूर्छां प्रथमं शमयेम। ततः परमन्यत् परामृशेम।

**स्या०**—महान् अशनिपातः कश्चन वृत्तः पैतृष्वसेय। तेनायं मूर्छितः शेते। हा हन्त कथं मे भगिनी सहिष्यते? एकोऽस्याः पुत्रः मतिमान् गुणवान् नूतनगृहप्रवेशे कर्तव्ये निश्चिते शमनगृहं किल प्रविशति स्म। कथम् अहमिदं तस्यै निवेदयेयम्। सद्यो हि भर्तुस्तुल्यावस्था भविष्यति! मरिष्यत्येव वा। हा हन्त किमिदानीं करवाणि?

**पै०**—आर्य, अलं स्त्रीजनोचितेन परिदेवितेन। दैवायत्तसकलवृत्तयो वयम्। आत्मनः सुखदुःखयोरनीशाः। पुत्रगतिरिदानीं मात्रे न प्रकटनीया। अस्य मूर्छापनयने यतेमहि। पश्चात् शनैः तां दुर्वार्तां तस्या विदितां करवाम।

स्या०—(उत्थाय गृहान्तर्गत्वा जलव्यजनहस्तः भगिन्या सुमत्या सह प्रविश्य ग्रामण्यो मुखे जलं प्रोक्ष्य हस्तेन मार्ष्टि। सुमतिः व्यजनमादाय वीजयति)।

ग्रा०—(शनैः नेत्रे उन्मीलयति)।

पै०—दैवात् प्रत्यागतप्रज्ञो मातुलपुत्रः। इतः परं न भेतव्यमस्माभिः।

स्या०—आवुत्त, का रुजा? कथमिदानीं वर्तते?

ग्रा०—(अश्रुपूर्णाभ्यां लोचनाभ्यां शून्यं पश्यन् उत्थातुमिच्छति)।

स्या०—(तं हस्ताभ्यामुत्तभ्य उत्थाप्य उपवेशयति)।

पै०—आर्य श्रीकर, युष्मदावुत्तोऽयं शून्या दृष्टीः परितः क्षिपति। नूनमयं विभ्रान्तचित्तः। कालक्रमेण मन्ये प्रकृतिं प्राप्स्यति। सादरं पर्यवेक्षणीयः। (अपवार्य उपांशु) अन्यदिदमवधेमम्। भवद्भगिनीसकाशे भागिनेयवार्ता न सहसा उद्भेदनीया, मा भूत् तस्या अपि इयं दशा, या ते आवुत्तस्य। अहं ग्रामं प्रति निवर्ते। अंत्रत्या स्थितिः पदे पदे निवेद्यताम्।

५

श्रीकरः—स्वसः, विवेकसम्पन्ना त्वम्। अतिदुःखकर्शितेन आत्मना किं भविष्यति? आवुत्तस्य चित्तस्वास्थ्याय तीव्रं यतनीयम्। धैर्यमवलम्बस्व। दैवायत्तेऽर्थे किं वयं कुर्याम?

सुमतिः—जानामि भ्रातः, सम्यग्जानामि सर्वम्। विस्मर्तुमशक्या वत्सस्य गतिः पदेपदे स्मर्यमाणा शोकाग्निं सहस्रशिखमुद्दीपयति। आत्मनोऽनीशा भवामि। आक्रन्दामि, शिर आहन्मि, परिधावामि, पतामि, रोदिमि, उन्माद्यामि, प्रलपामि, तूष्णीं शये। हा! क्व गतो मे वत्सः? अम्बेति मामाह्वयन् पुनरिह किं नागमिष्यति? "क्षुधितोऽस्मि। अन्नं

देहि" इति किं माम् इतःपरं कदापि न वदिष्यति। हा वत्स, तस्मिन्नहनि मद्रं प्रति त्वां प्रेषयन्ती किमपुनर्निवृत्तये प्रेषितवत्यस्मि। . . .

श्री०—(सविषादं स्वगतम्) कथं प्रशमवचनान्येव मे अस्या दुःखमुद्दीपयन्ति। (प्रकाशम्) स्वसः, धीरा भव। मा स्मैवं शोकाय आत्मानमर्पय। मासा गताः शोचनीयस्य वृत्तस्य। अद्य वृत्तमिव कृत्वा एवमतिमात्रं दुःख्यसि। आवृत्तपरिरक्षणं ते सम्प्रति प्रधानं कार्यम्। इदमेकतः। अपरतः उचितं वयः प्राप्तवत्या वत्साया नलिन्याः परिणयनम्।

सु०—आं तात, वत्सापरिणयभरो महान् शिरसि वर्तते। अस्याः पिता एवं जीवच्छवः संवृत्तः। अहं स्त्री किं कुर्याम्। न खलु गृहाद् बहिर्गमने मनागपि मे परिचयः। किं वत्सोऽस्ति, य इतस्ततो गत्वा वरान्वेषणं करिष्यति। हा शिलाचित्त हतविधे, कथं सर्वमनोहरं मे वत्सम् अनिर्वृत्त एव जन्मफले झटित्याच्छिन्नवानसि? हा! किं करिष्यामि? का मे गतिः? समुद्रमध्ये मज्जन्त्यां किल नावि वर्ते।

श्री०—भगिनि, ननु वदामि धैर्यमवलम्बस्वेति। सहजातानि मनुष्याणां दुःखानि। विवेकवद्भिस्तानि सोढव्यानि। सायन्तने शकटे आगमिष्यति। स त्वरया आनेतव्य इति मोटार्यानं प्रैषयम्। स मोटार्शकटः मार्गपार्श्ववर्तिनं कञ्चन वृक्षमभिहत्य शीर्णः। अथ मद्रे यस्मिन् गृहे भाटकं दत्वा वत्स उवास, तस्य स्वामी वार्तां प्रेषयामास—इहागन्तुं प्रतिष्ठमानो वत्सः स्रवन्त्या विद्युन्नाड्या संसृज्य सद्य उत्क्रान्तजीवितोऽभवदिति। को वेद एवं घोरा विपदापतिष्यतीति। ईश्वरसङ्कल्पो हि तथाविध आसीत्। कर्तव्यं सर्वमहं करिष्यामि। तत्प्रति अल्पामपि चिन्तां मा कुरु। अस्मात् क्षणात् प्रभृति तदेकपरोऽहं वरान्वेषणं करिष्ये। अचिरादेव कञ्चन निर्धारयामि। ज्योतिर्विदो वदन्ति—नलिन्या विवाहे वृत्ते आवृत्तः स्वास्थ्यं प्रतिलप्स्यत

इति)। तदद्य तस्या विवाहार्थे सर्वे उद्यमः कार्यः। यदि त्वया चिन्तितपूर्वः वरः कश्चिदस्ति तं मे ब्रूहि। प्रथमं तमेव गत्वा पश्यामि।

सु०—आं तात; कन्यादानसुकृतेन पितुरनिष्टशेषः सर्वो विलयं यास्यति। न परमनुभववन्तो वृद्धाः, मम मनोऽप्येवं कथयति। स्वप्नश्च कश्चिदतीतायां रात्रौ मया दृष्टः। अनुरूपेण अत्युज्ज्वलेन वरेण पाणौ गृहीता वत्सा विवाहमण्टपे देदीप्यते। प्रणमन्तं जामातरं प्रति आशिषं प्रयुञ्जानः, सम्बन्धिवर्गमुपचरन्, कर्मकरान् तस्मिन् तस्मिन् कर्मणि नियुञ्जानश्च त्वदावृत्तः सम्भ्रमी प्रचरति। दम्पत्योरानुरूप्यातिशयविस्मितानां सुश्रावा वाचः शृण्वत्यहं हर्षनिर्भरा वर्ते।

श्री०—सुशोभनमिदं निमित्तम्। अचिराद् वत्सा नलिनी अनुरूपेण भर्त्रा सङ्गता भविष्यति। वीतचिन्ता भव। समीचीने वरे लब्धे वाचिकं प्रेषयिष्यामि। तावत् तव विदितो यदि कश्चिद् भवति, मह्यं लेखं विसृज। अहमद्य प्रस्थास्ये। केनापि हेतुना आत्मानमायासभाजनं मा कार्षीः। आवृत्तपरिचरणे दत्तचित्ता एधि।

६

सुमतिः—वत्से, चिरादद्य मे मनसि इदम्प्रथमं हर्षाङ्कुरो जायते। देव्या आलयं प्रविशन्त्योरेव आवयोः आरात्रिकघण्टा घणघणायते स्म। यावत्तृप्ति देव्या दर्शनं सम्पन्नम्। चिरन्तनक्रमविपरीतमधुना अर्चकस्वामी सुप्रसन्नः चन्दनकुसुमकुङ्कुमादिरूपं देवीप्रसादं सादरमदित। मन्येऽनुग्रहोन्मुखी जगज्जननी सरोजनिलया। अचिरादेव निर्वृत्तकल्याणां त्वां द्रष्टुं मे भाग्यं परिणतं भवतु।

नलिनी—मातः, अग्रे पश्यसि?

**सु०**—(दृष्ट्वा विस्मिता निर्वर्ण्य) अहो सौन्दर्यसारसमुदायो युवा सुहृद्भिः परितः स्थितैः सम्भाषमाणः नक्षत्राणां मध्ये चन्द्रमा इव भ्राजते। नूनमयं महाकुलप्रसूतः। यदि भिन्नगोत्रः अनुगुणजातकश्च भवेत् लोकमाता तेन पतिवत्नीं त्वां करोतु। अद्य मातुलस्ते यदि सन्निहितो भवेत् . . . .

(प्रविश्य)

**श्रीकरः**—स्वसः, दिष्ट्या त्वां मन्दशोकां देवालयगमनशीलां पश्यामि। पञ्चषा वराः सन्ति। त्वया सम्मन्त्र्य तेष्वेकं निर्धारयितुमागतोऽस्मि। देवालयस्याग्रत एव त्वं सवत्सा द्रष्टा। नूनमविलम्बेन शोभनं निश्चितं भविष्यति।

**सु०**—भ्रातः, स्मृतमात्र एवोपस्थितोऽसि। अनुकूले दैवे किं न सम्पद्येत। त्वया द्रष्टैर्वरैः सह इममपि चिन्तयेम। पश्य पुरतस्तिष्ठति।

**श्रीं०**—(दृष्ट्वा सविस्मयम्) अहो लोकोत्तरं रूपम्। अन्यत् सर्वं अनेन रूपेणैव व्याख्यायते। न हि प्रज्ञया गुणैः श्रिया वा हीनस्य ईदृशं रूपं सम्भाव्यते। दुर्निरीक्षं तेजः। अस्य पादधूलितुलामपि इतरे वरा नार्हन्ति। अहं स्थित्वा तं तत्सम्बन्धि च सर्वं विचार्य विदित्वाऽऽगच्छामि। युवां गृहं गच्छतम्। सोऽपि मन्ये वत्सायां जातानुरागः। तदवलोकनानुवृत्तितृष्णयैव सुहृत्सम्भाषणव्याजेन इह तिष्ठति। गृहं गत्वा अचिरादागमिष्यन्तं मां प्रतिपालयतम्। (सुमतिः नलिन्या सह गच्छति)।

(कतिपयनाड्यपगमे गृहं प्रविश्य)

**श्रीकरः**—भगिनि, जानासि कः स लोकसुन्दरो युवेति। सोपानशिलाव्यवहारिणः साक्षात् कापिलमिश्रस्य औरसः पुत्रः। स हि विद्याधिगमहेतोः मातुलगृह एव चिरात् स्थितः अध्ययने समाप्ते पितरौ द्रष्टुमत्रायातः।

सु०—(सविषादम्) तर्हि अस्मन्मनोरथे मृत्तिका पतिता।

श्री०—नैव। तस्य जननी अस्मिन् सम्बन्धे नितान्तमुत्सुका। तत्रभवान् कापिलमिश्रस्तु आवृत्तचर्यया ऽत्यन्तमुद्विग्नः न सम्मन्यते स्म। ततस्तया मया च चिरमनुनीतः 'अस्तु' इत्यब्रवीत्। भगिनि, वत्साया नलिन्याः आयुष्मतः प्रजागरस्य च लोकोत्तरं सौन्दर्यं परस्परानुरूप्यं च यथा यथा पश्यामि तथा तथा मे उत्कटो भवत्यभिलाषः क्षणमात्रविलम्बमपि विना सपदि विवाहं निर्वर्तयितुम्। कचित् सम्भाराः त्वरया सम्भर्तुं शक्यन्ते?

सु०—सम्भारसम्भरणे नातीव क्लेशो भविष्यति। प्रकृतिमापन्नः त्वदावृत्तः किं प्रतिपत्स्यत इति तु मे मन आकुलं भवति। स हि प्रकृत्या उद्धतः। वरस्य पितरि कृतवैरः। कथमयं सम्बन्धः संविहित इति अस्मभ्यं सङ्क्रुध्य, न कदाऽपि कन्यां तस्य गृहं प्रेषयिष्यामीति ग्रहिलो भवेच्चेत् बहुसङ्कटा हि स्थितिर्भवेत्।

श्री०—भगिनि, तत्प्रति त्वं कातरा मा भूः। परमसाध्व्या वत्साया मनः तन्मिन्ननुरज्यति। महालक्ष्मीप्रसादलब्धः स वरः। तव मम च चेतः अस्यां प्रवृत्तौ अत्यन्तं प्रसन्नं भवति। एतत्प्रस्तावे पदेपदे शुभानि निमित्तानि जायन्ते। एभिः कारणैः सर्वेश्वरः स्वयम् इमं सम्बन्धं घटयतीति निश्चितं ज्ञायते। अत आयतिरपि शुभा भविष्यतीति प्रत्येतव्यम्। निश्शङ्का सन्तुष्टा उत्साहिनी कर्तव्यं कुरु।

सु०—आम् आम्। एवमेतत्। भ्रातः सम्यक् त्वया प्रतिबोधिताऽहम्। गृहे कर्तव्यं सर्वमहमवधास्यामि। त्वं पुरोधसमुपगम्य शुभमुहूर्तं निश्चिनु। आमन्त्रणपत्रिकां मुद्रयित्वा सर्वेभ्यः प्रेषय। आपणं गत्वा वस्त्राणि राजतान्यन्यानि च पात्राणि, मङ्गलार्थानि वस्त्वन्तराणि च क्रीणीहि। स्वर्णकारमाह्वय। अपेक्षितानि भूषणानि कारयिष्यामि। वाद्यकारान्

आनाय्य सत्यङ्कारं देहि । कायमानकारेभ्य आदेशं देहि सालङ्कार-विवाहमण्टपनिर्माणाय । आवश्यकमन्यच्च सर्वं तत्तदुचितान् मनुष्यान् नियुज्य कारय । समर्थो हि त्वम् । किं मया बहुनोक्तेन ।

(७)

**श्रीकरः**—आवुत्त, अद्य वत्सायाः सौभाग्यवत्या नलिन्याः विवाहः । कच्चित् पश्यति भवान् अलङ्कृतं विवाहमण्टपं, स्फुरन्तं वरं, जाज्वल्यमानां वत्सां च । एतु भवान् वराय कन्यां दातुम् । (करे गृहीत्वाऽऽनीय धान्यबीजमूते उपवेशयति) ।

**पुरोहितः**—स्वामिन्, मन्त्रं ब्रूतां भवान्, पादशो वदामि—

कन्यां कनकसम्पन्नां सर्वाभरणभूषिताम् ।
दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ॥

**श्रा०**—(मन्त्रमनुपठति) ।

**पु०**—कन्याया दक्षिणहस्तं गृहीत्वा वरस्य दक्षिणहस्ते अर्पयतु भवान् ।

**श्रा०**—(तथा करोति) ।

**पु०**—(वरं प्रति) आयुष्मन् इदं माङ्गल्यसूत्रं गृहाण । हस्ते कृत्वा इमं मन्त्रमुच्चारय—

माङ्गल्यतन्तुनानेन मम जीवनहेतुना ।
कण्ठे बध्नामि सुभगे त्वं जीव शरदः शतम् ॥

अथ सूत्रं कन्यायाः कण्ठे बधान ।

**सर्वः**—(तारे वाद्यघोषे तथा करोति । कन्यायाः उपरि पुष्पाक्षता वृद्धैः प्रकीर्णाः पतन्ति) ।

श्री०—भगिनि, अद्राक्षीः अद्यावधि एकामपि वाचमनुक्तवान् आवृत्तः अद्य पुरोहितोदितं मन्त्रमस्खलितमन्ववादीत्। मन्ये वागिव मनोऽप्यनेन प्रतिलब्धं भवति।

सु०—आं तात, अद्राक्षम्। भगवतः कृपा। पश्य त्वां किञ्चिद् विवक्षुरिव आवृत्तः।

ग्रा०—श्रीकर, कथं मे सम्बन्धिनं न दर्शयसि? स हि मया अभ्यर्हणीयः।

सु०—(सहर्षं) कच्चिदार्यपुत्रो जानाति कः सम्बन्धीति?

ग्रा०—ओ। सम्यग्जानामि; तत्र भवान् कापिलमिश्रः।

सु०—(सप्रहर्षं) भ्रातः, झटित्यावृत्तं तत्सकाशं नय।

श्री०—इत एत्वावृत्तः। सङ्कोची सम्बन्धी कापिलमिश्रः। अप्रकटं काप्युपविष्टः। (गत्वा) अयं सः।

ग्रा०—(कट्यामुत्तरीयं बध्वा दण्डप्रणामं पुनः पुनः करोति)।

का०—(स्वगतम्) अहो बत परमधूर्तस्य भूतपूर्वस्याद्य विस्मयावहा सत्त्वोत्तरता। निर्मलस्यात्मस्वरूपस्य गुणकृता अवस्थाभेदा इति शास्त्रैरुपदिश्यमानं रहस्यमनेन सत्याप्यते। (प्रकाशम्) अयि भोः स्वामिन्, काहमवस्तु! क्व भवान् ग्रामप्राधान्यभाक् महापुरुषः। कुत इयं विपरीता वृत्तिराश्रीयते?

ग्रा०—नैवं भाषितव्यं भगवन्। दयतां भवान्। सर्वे मदीया अपराधाः क्षन्तव्याः। कोऽपि ग्रहः मामाविश्य बहुधा नर्तयामास। पुत्रबलिं गृहीत्वा तृप्तेन तेनात्यन्तं विमुक्तोऽस्मि। अद्य मे स्वपरस्वरूपयाथात्म्यं स्पष्टं प्रकाशते। भवदीया सोपानशिला एका या मयाऽपहृता, तस्याः प्रति इमां स्वर्णप्रतिमां स्नुषात्वेन भवते प्रतिपाद्य तदागः परिमार्ज्मि।

या सा सोपानशिला न परं तां, सा यत्र अवबद्धा तमिमं नवनिर्मितं प्रासादं तत्रत्यं सर्वं स्वं च भवते भगवते सादरं सभक्तिं सश्रद्धं सप्रमोदं च समर्पयामि। अस्मात् क्षणात् प्रभृति अत्रभवान् एतत्सदनस्वामी अहमतिथिः। भवताऽनुमतोऽत्र वत्स्यामि। अन्यथा अन्यत्र यत्र क्वापि। इतः परं ग्रामाधिकारोऽपि आयुष्मता प्रजागरेणैव वोढव्यः।

यथा भगवद्भजनमात्रसङ्गि मे मनो भवेत् तथा भवाननुगृह्णातु। तथा भगवान् प्रसीदतु।

**का०**—अलमलं महात्मन्। काष्ठां गतेनानेन भवदीयसत्त्वगुणोल्लासेन मधुरोदारगम्भीरपरमाद्भुतां वाग्धारां प्रवर्तयता समाप्लुतो मे अन्तरात्मा किमपि प्रतिवक्तुं मां न मुञ्चति। कुलद्वयस्य नः कल्याणदायी भवतु स करुणावरुणालयः कमलावासविशालवक्षस्स्थलः कमलेक्षणः।

**पु०**—(वधूवरावानीय ग्रामणीकापिलमिश्रयोर्हस्ते अक्षतान् दत्वा) आयुष्मन् प्रजागर, सौभाग्यवति नलिनि, श्वशुरं पितरं च प्रणमतम्। (तौ प्रणमतः)।

**ग्रा०**—(अश्रु मुञ्चन् तूष्णीं अक्षतान् क्षिपति)।

**का०**—(अक्षतान् क्षिपन्) वत्सौ—

शास्त्रे विश्वासवन्तौ तदुदितसरणौ नित्यनिष्ठां भजन्तौ
सर्वश्लाघार्हवृत्तौ सकलबहुमतौ सर्वसम्पत्समृद्धौ।
अन्योन्यप्रेमभूम्ना सुघटितहृदयौ साधुसन्तानहृष्टौ
भूयास्तं भक्तिमन्तौ भगवति भुवनक्षेमसिद्धयेकलक्ष्यौ॥

**अन्ये सर्वे**—तथाऽस्तु।

## वसन्तविजयः[1]

कवि 'कान्त' मणिशङ्कररत्नजिभट्[2]

'मा मा नाथ न जानीहि प्रभातेयं निशीथिनी ।
तमो गाढमहो व्याप्तं भविता समयो ननु' ॥ १ ॥

सहस्राण्यब्दानामतिययुरथाद्यास्य वचसो
न वक्ता श्रोता वा भवति न च तद्विस्मृतिमितम् ।
न कः पाण्डुं माद्रीमुभयमभिजानीत सहसा
कृते नामोच्चारे निरवधिरपायाच्च समयः ॥ २ ॥

शतशृङ्गगिरिप्रान्ते राज्ञीद्वययुतो नृपः ।
पर्णशाले विनिर्माय चक्रे कालस्य यापनम् ॥ ३ ॥

अल्पापि नो नृपतिनाधिगताथ निद्रा
दुःस्वप्नदर्शनभरेण निशा व्यतीता ।
'गत्वा बहिः क्षणमहं भ्रमणं करिष्य'
इत्थं विचार्य नृपतिः शयनादुदस्थात् ॥ ४ ॥

शनैरुत्थाय शयनान्नृपो यातुं प्रचक्रमे ।
'मा मा नाथे'ति शब्दश्च गतोऽस्य श्रुतिगोचरम् ॥ ५ ॥

'प्रिये माद्रि व्यग्रा किमसि न खलु स्नानविधये
ह्यहं गन्तोन्निद्रे कचिदटितुमीहास्ति मनसि ।
तमश्चैतन्नष्टं न महदवशिष्टा च रजनी
यथापूर्वं पश्चाद्विधिमिह विधास्यामि सकलम्' ॥ ६ ॥

---

[1] इदं गूर्जरभाषाखण्डकाव्यं वने माद्रीसंगमाज्जातं पाण्डोर्मरणं विषयीकरोति । अस्य समश्लोकसंस्कृतानुवादकः गौरीप्रसाद चु. झाला ।

[2] 1887-1923.

प्रतिषिध्य नृपं देवी गता निद्रावशं पुनः ।
प्रबोधः क्षणमात्मानं संनिधाप्य तिरोदधे ॥ ७ ॥

" दिष्ट्या सुखं स्वपिति मे दयितेयमत्र
भूतार्थगोपनमहो न हि शक्यमस्याः ' ।
प्रातिष्ठताथ नृपतिर्हृदये प्रतीतो
गाढे तमस्यपि पथि स्खलनं न याति ॥ ८ ॥

झिल्लिकाजतुकादीनां रवाः सर्वत आपतन् ।
शान्तयोरुभयोर्देशकाल्योः सदृशा इव ॥ ९ ॥

तदाटव्यां शीतो वहति वितरञ्छान्तिमनिलो
विराजन्ते केचित्कचिदुडुगणा अत्र नभसि ।
प्रबोधं तावन्तो पशुरपि गतोऽद्रेः परिसरे
तथाप्येषोऽरण्ये चरति नृपतिः सान्द्रतमसि ॥ १० ॥

प्राप्तश्चाभिमतं राजा सुन्दरं समया सरः ।
' माद्रीविलास ' इति यत् तेन दत्ताभिधं पुरा ॥ ११ ॥

छायान्वितेऽम्बुनि विलोक्यतोऽस्य शान्तिं
भूपस्य मानसमभूदतिरूढतर्कम् ।
आसाद्य कामपि शिलामधिरुह्य चैनां
व्यग्रो न्यमज्जदिव तर्कतरङ्गराशौ ॥ १२ ॥

अनिद्राजनितक्लान्त्या धैर्यमासीदपच्युतम् ।
स्मरणैः पूर्ववृत्तानामनल्पः समयो गतः ॥ १३ ॥

गतैर्व्यक्तिं चिह्नैर्दिनकृदुदयोऽसूच्यत तदा
प्रबुद्धायाः सृष्टेर्विषमरवसंवाद उदितः ।

द्रुतं यावद्दिग्भ्योऽपसरति तमः सर्वत इदं
दिशि प्राच्यां रागोऽभिनव इव तावत्समुदभूत् ॥ १४ ॥

विरावश्चोद्गतस्तावदरुणस्योदये सति ।
प्राच्याश्च मुखरागेण सहं क्षोभोऽप्यवर्धत ॥ १५ ॥

दृष्टिं प्रयान्ति तरवस्तिमिरावृता ये
स्वच्छानि निर्झरजलानि वहन्त्यधस्तात् ।
अस्मात्समुत्पतति चक्षुषि भूमिभागा-
दभ्रं लिहन्ति शिखराणि समुन्नतानि ॥ १६ ॥

'अहो बत कियान्कालो मया व्यर्थोऽतिवाहितः' ।
उक्त्वैवं सहसा भूप उदतिष्ठन्निजासनात् ॥ १७ ॥

अपश्यच्चावस्थान्तरमयमरण्यश्रियमितां
च्युतं धैर्यं चास्य स्मृतिपदमुपेता प्रियसखी ।
'अहो रम्यां पश्याम्यभिनववसन्तश्रियमहं
विकारः कोऽयं मे बत हृदयमत्राभिभवति' ॥ १८ ॥

सृष्टेः सौन्दर्यमालोक्य रोमोद्गतिरजायत ।
अनश्यच्चिरकालीनं 'योगान्धत्वं' च तस्य तत् ॥ १९ ॥

जले धावं धावं विदधति विहारं जलचरा
निरीक्ष्यैतानद्रिं प्रति पुनरसौ दृष्टिमकरोत् ।
मता नैषा वृत्तिः पुनरयमरुन्द्ध स्वयमिमाम्
'अयं स्नातुं कालो' नृपतिरिति तत्राप्सु पतितः ॥ २० ॥

स्नानस्वस्थमनाश्चासौ नित्यकर्म समाचरत् ।
गते रागे पुनश्चित्तं धर्मैकप्रवणं स्थितम् ॥ २१ ॥

निर्वर्त्य चाह्निकमसौ त्यजति स्थलं तद्
वृत्तिं नियम्य परनिग्रहमातनोति ।
" किं वा फलं त्यजत आश्रमधर्मजातं
किं सुन्दरं किमु जगत् तप एव मित्रम् ' ॥ २२ ॥

आश्रमं पुनरागम्य यथापूर्वमसेवत ।
निद्रामीषदिवाकाङ्क्षद्वनं विस्मर्तुमुत्सुकः ॥ २३ ॥

क्षणं कृत्वा निद्रां नरपतिरथाबुध्यत यदा
तदा चेतो जातं स्तिमितविशदं सात्त्विकमपि ।
कियद्दूरं गत्वा परमनिलमासेवत हिमं
यदृच्छादृष्टायां वनभुवि दृशं चाक्षिपदसौ ॥ २४ ॥

अक्षुब्धहृदयो भूप ऋतोर्वैभवमैक्षत ।
द्रष्टुं राज्ञ्यावथ प्रायादन्यां पर्णकुटीं प्रति ॥ २५ ॥

एकाकिनी तदुटजे ननु भद्रपुत्री
कुन्ती गता बहिरसंनिहिता तदासीत् ।
नासत्यजद्वयमसूत पतिव्रता या
हा तापसी सह नृपेण बभूव सैव ॥ २६ ॥

सूक्ष्मेण वल्कलेनास्याश्छन्नमङ्गं हि वाससा ।
न ह्यस्या अङ्गलावण्यं वनवासेन दूषितम् ॥ २७ ॥

" पृथा किं नास्त्यत्र त्वमिह दयिते स्थास्यसि कथं
त्वमेकाविन्यत्र स्वजनविरहे का धृतिरपि ।
विनोदं कर्तुं तत्क्षणमिह नु देव्यर्हसि शुभे
प्रिये गच्छावेषन्निकटविपिने कर्तुमटनम् ' ॥ २८ ॥

एवं गते विसस्मार व्रतोपासनमात्मनः ।
तापसत्वं परित्यज्य भर्ता—स्वामी—बभूव सः ॥ २९ ॥

शान्तं मनो नरपतेर्न गतं विकारं
तेनैव नास्मरदसौ दिनपूर्ववृत्तम् ।
माद्री न चोदसहत प्रतिषेद्धुमेनं
गम्या भवन्ति न कदापि विधेर्विलासाः ॥ ३० ॥

पूर्वा गृहस्थभावस्य वासनास्योत्थिता पुनः ।
तदात्वमस्मृतिं नीत्वा दम्पती चरतो वने ॥ ३१ ॥

वहति निर्झरवारि हरच्छ्रमं
नयनतृप्तिरुदेति तदीक्षणात् ।
मधुरमत्र रुवन्ति विहङ्गमा
रतिपरं च मनो रसमन्वभूत् ॥ ३२ ॥

वसन्तः साम्राज्यं प्रबलमभितोऽस्थापयदसौ
नवं वासो वृक्षाः परिदधति सर्वत्र रुचिरम् ।
विभावैस्तैः सर्वैं रतिवशमयासीज्जगदिदं
भृशं दीप्तिं नीता रसिकजनवृत्तिश्च चपला ॥ ३३ ॥

वेगाध्मातेऽपि रुधिरे नावधानमियाय सः ।
प्रेयस्या सह बभ्राम नर्मगोष्ठीरतो वने ॥ ३४ ॥

तुङ्गैरराजत वनं सहकारवृक्षै-
र्नम्रैस्तथागुरुकचन्दनभूरुहैस्तत् ।
वृक्षा लताश्च दधति श्रियमप्यपूर्वां
वर्धेत किं न सुहृदा बलिनाप्यनङ्गः ॥ ३५ ॥

विहरन्तावुभौ प्राप्तौ मालतीमण्डपं क्वचित् ।
सत्या सार्धं नृपस्तस्मिन्प्रवेशं विदधे ततः ॥ ३६ ॥

मन्दं मन्दं लहर्या वहति सुमरजो दोलयन्मातरिश्वा
वल्लीनां याति दिक्षु प्रसवपरिमलस्तृप्तिरक्ष्णोरुदेति ।
जानीते कः कुतोऽयं प्रसरति नु रवोऽपार्थिवः कोकिलायाँ
वैवश्यं याति चार्द्रं रसवशहृदयं संयमश्चैति वृत्तेः ॥ ३७ ॥

'मुग्धेन पञ्चमाढ्यं हि श्रुतं कोकिलकूजनम् ।
प्रिये पञ्चमवृष्ट्या मामभिषेक्तुं त्वमर्हसि' ॥ ३८ ॥

गतेषत्सा शङ्कां किमपि न च वक्तुं प्रभवति
प्रनष्टा शङ्कासौ नृपतिमुखमालोक्य च तदा ।
न वा युक्तं चायं नरपतिनिदेशोऽन्यथयितुं
विचार्यैवं गातुं कथमपि च माद्री प्रवृत्ते ॥ ३९ ॥

प्रक्रान्तेऽलौकिके रागे जातं शान्तं हि तद्वनम् ।
अयस्कान्तेन सर्वेषां कृष्टानीव मनांसि च ॥ ४० ॥

गीतेरयं मधुरिमोच्छलति प्रदिक्षु
सद्येत हा किमु रवो हृदयंगमोऽयम् ।
सर्वो जनो द्रुतपदं मिलितः प्रियाभी
रागैकबद्धहृदयः परिरम्भमाधात् ॥ ४१ ॥

रागमत्तं जगत्सर्वं गाहते रससागरम् ।
पाण्डोरेकस्य हृदयं मथ्यते व्यथया बत ॥ ४२ ॥

गीतेऽस्मिन्प्रसृते सुधारसझरिण्यानन्द ऐत्सान्द्रतां
क्रूराश्लेषमुपानयामि दयितामित्येषणाजायत ।

व्यावृत्तः परितर्पणादथ पुनः सस्मार स स्वां स्थितिं
यत्नात् संयमने कृतेऽपि वपुषि व्यक्तिं विकारोऽभजत् ॥ ४३ ॥

विलोक्यैतां स्थितिं राज्ञो राज्ञी गानादुपारमत् ।
एतेन प्रत्युतैतस्य राज्ञः शान्तिरपास्तवत् ॥ ४४ ॥

'प्रिये माद्रि क्रूरं ! नहि नहि समर्थोऽस्मि सहने
फले नापेक्षा मे तपस इह ; नांशं व्रजंतु तत् ।
प्रिये रम्यामेतां स्वरसरितमास्रावय पुनः
किमेतां रक्षित्वा नियमपरतामुत्सृज लघु' ॥ ४५ ॥

वृत्तिं संयन्तुमेतस्य सामर्थ्यं सकलं गतम् ।
अपूर्वस्वरमाधुर्यान्मदं स परमं गतः ॥ ४६ ॥

'सखि प्रेयस्येतत् किमपि कमनीयत्वमयि ते
प्रिये रम्भावत् त्वं रमयसि नु मां नन्दन इव' ।
निरूप्यासिञ्चत्तां प्रणयरसवृष्ट्या नयनयो-
र्गता शङ्कामीषन्मनसि बत भीरुः पतिरता ॥ ४७ ॥

अवसानं गते गीतेऽभिससार नृपो मिषात् ।
'मा मा नाथे 'ति जल्पन्तीं भुजयोस्तां नृपोऽग्रहीत् ॥ ४८ ॥

'मा नाथ मा दयित मे 'ति वचो ब्रुवाणा
तस्मादपासरदसौ नृपबाहुपाशात् ।
दृष्टिं विधाय च नृपे किल कातराक्षी
दीना व्यजिज्ञपदसौ दयितं तदानीम् ॥ ४९ ॥

'त्रस्तासि ननु भीतासि पश्यन्ती भवदिङ्गितम् ।
उग्रोऽसौ मुनिना दत्तः शापो विस्मर्यते कथम्' ॥ ५० ॥

नितान्तं भीता सा वदति दयितं वेपथुमती
विकारो भूपस्य श्रयति न तु काञ्चिच्छिथिलताम् ।
'प्रिये नार्हस्येवं हृदयमदयं मे व्यथयितुं
न सह्येयं पीडा क नु शरणमेष्यामि दयिते ॥ ५१ ॥

प्रिये प्रिये प्रिये प्राणास्त्वदधीनाः प्रसीद मे !
द्रुतं संश्लेषयाङ्गानि नैतत्सोढुं हि पारये ॥ ५२ ॥

जाने न नेति मम किन्तु दशास्त्यपूर्वा
नेशोऽस्म्यहं मम जलोद्धृतमीनतुल्यः ।
देवि त्यज त्वमिह सर्वविकल्पजातं
स्पर्शामृतेन दयिते शमयार्तिमेताम् ' ॥ ५३ ॥

एवं गते विकल्पस्य नावकाशस्तदाभवत् ।
नरेन्द्रभुजपाशान्तर्मार्द्री चात्मानमक्षिपत् ॥ ५४ ॥

* * *

परं नातः शक्तं हृदयमिदमुत्प्रेक्षितुमपि
श्रुतिं याताः शब्दाः सदयमुदिताः केऽपि चरमाः ।
स्खलद्रूपं वाक्यान्युपशममयुस्तत्र शनकैः-
रथैतस्माद्यातोऽमितनियुतकल्पोऽद्य समयः ॥ ५५ ॥

# विवरणम्[1]

कृ. चन्द्रशेखरः

'अहो शिल्पम्, अहो शिल्पम्!' इयमेव वार्ता तस्मिन् पत्तने समन्तात् अश्रूयत। नैकोऽप्यासीत् तत्र, यस्तस्य शिल्पिनः गगनाचार्यस्य शिल्पकौशलं नाश्लाघत। बेलूरनगरे निर्मितः चेन्नकेशवाभिधस्य पुरुषोत्तमस्यालयोऽसौ होसलवंशीयस्य राज्ञो विष्णुवर्धनस्य विष्णुभक्तिविलासस्य विशिष्टं किमपि चिह्नं समजायत।

वाहिनीपतिः विजयतुङ्गः परं, गगनाचार्ये सदा यं कमपि दोषं ब्रुवाण एवास्त। शिल्पिनो दुहितुः किङ्किणिमालायाः शरीरसौन्दर्ये तदीयं मानसं मग्नमेव आसीत्। स तु स्वयमपि तत् नाज्ञासीदिव। द्वित्रेषु सन्दर्भेषु किङ्किणिमालायाः नाट्ये प्रचलति विजयतुङ्गस्य मनसि अयमेवं सन्देहः असकृत् उदयन् आसीत्, 'कुतोऽयं गगनाचार्यः स्वां दुहितरमेवं प्राकृतजनसमक्षं नाट्यं विधातुं प्रवर्तयति? यतः सर्वलोचनलोभनीयं तस्या वपुः। निखिलमानसमोहनं च सौन्दर्यम्' इति। किं च तारुण्यशोभाविसारिणि तस्या वपुषि नाट्यानुगुणं चलति, प्राकृतो जनः को वा स्वीयं चेतः वशयन् तटस्थो नाट्यं रसिष्यति? आत्मनोऽन्यस्य सर्वस्यापि स्वान्तं समाकर्षदेव तस्याः लावण्यप्रसरः, विशेषतः नाट्यकाले इत्यपि विजयतुङ्गः कृतनिश्चयोऽभूत्।

अथैकस्मिन् दिने आलये तस्मिन् कुम्भाभिषेकः प्रावर्तत। निर्वृत्ते तस्मिन् प्रचलिष्यतः किङ्किणिमालाया नाट्यस्य दर्शने कौतूहलेन सङ्कुलो मिलितानां जनानाम् उत्सारणा प्रावर्तत। आलयगतानां शिल्पविशेषाणां निरूपणाय देवो विष्णुवर्धनः सान्तःपुरः समागमिष्यतीत्ययं वृत्तान्तः पूर्वमेव तत्र प्रसृतो बभूव। भूपेन निर्मापितोऽयं देवालयः तदीयकीर्तिप्रतिष्ठापकेषु विशिष्टकार्येषु अन्यतममजनिष्ट। किञ्च शिल्पिनः तस्य गगनाचार्यस्य कलाकौशलं भगवतः सन्निधावेव बिरुदैः पारितोषिकैश्च सभाजयितुं कृतसङ्कल्पोऽवर्तत स महीपतिः।

---

[1] 'विलकम्' इति द्राविड्यां लिखितस्यानुवादः। अनु० वा. ह. सुब्रह्मण्यशास्त्री।

गगनाचार्योऽपि अविरहित एव किङ्किणिमाल्या राज्ञः प्रत्युद्गमनाय आलयस्य अग्रतः सज्जः समास्त ।

'ईदृशेऽस्मिन् महति जनसमवायेऽपि तवेयं तनूजा आनेया भवति?' इति शिल्पिनमन्वयुङ्क्त, सेनापतिः विजयतुङ्गः । स किल राज्ञः तत्र समागमम् अवगत्य तदनुगुणं संविधानं विधातुं पूर्वमेव तत्र कृतावस्थानः आसीत् ।

स किल शिल्पी कुतोऽपि चिन्तामग्न इव क्षणं तूष्णीम् आस्त । ततः शिरः समुन्नमय्य आत्मनः प्रष्टारमजानन् इव किञ्चिदिव न्यरूपयत् । 'सेनापते, किं भवानेव? कुतोऽयमत्यादरो भवतः मयि मत्सुतायां वा? इति तम् अप्राक्षीत् ।

'न खल्वयम् आदरः; वनितासु विधेयः बहुमानः एव मया आवेद्यते । नाहं भवानिव स्वार्थसम्पादनव्यग्रः' इत्युच्चैः अवदत् विजयतुङ्गः । समन्ततः स्थितान् पर्याकलयन्निव सेनाधिपः सर्वतः प्राहिणोत् आत्मीयं चक्षुः । ततो वक्तव्यकृतनिश्चयः उपासर्पत् गगनाचार्यम् । उपह्वरे कथितवांश्च 'शिल्पिन्, किं ते अपेक्षितम्? ब्रूहि, तदहं विदध्याम् । किन्तु तवेयमात्मजा कथञ्चित् अन्यत्र नेया । कुतो वेमां चत्वरेऽस्मिन् नाट्योचितनेपथ्यां स्थापितवानसि? । सर्वथा न न्याय्यः तवायम् आचारः' इत्येवं वदत्येव तस्मिन् तदीयवचसि संजातं गद्गदं शिल्पीन्द्रोऽपि नैव नालक्षयत् ।

ततः साञ्जलिः तम् अवन्दत शिल्पीन्द्रः । अवादीच्च, 'सेनापते' मैवम्; मया सार्धमत्रास्या अवस्थितिः नैव दोषाय । महीपतिनात्र करिष्यमाणे मम सभाजने इयमपि अर्हत्येव एकं भागम् । अत्रत्यं शिल्पविलासम् अखिलं सविमर्शं विलोक्य अस्या नाट्यमपि द्रष्टव्यमेव महीपतिना । किञ्च, नेदं चत्वरम्; किन्तु भगवतः नारायणस्य महार्हं सन्निधानमिति न खलु भवान्नावगच्छति ।

* * * * * *

'पराक्, पराक्, विष्णुवर्धनभूपतिः समायाति । अपसरत, अपसरत, मा पन्थानमावृत्य तिष्ठत' इति परिजनानामाघोषः अश्रूयत । समरेषु

नित्यविजयी विजयतुङ्गः अभूतपूर्वं पराभवमद्य प्रापत्। स्वयमपि पृथ्वीपतेः अवकाशं ददानः मार्गादपसृत्य एकतोऽतिष्ठत्।

विष्णुवर्धनस्य वदने अभूतपूर्वा दिव्या कापि शोभा समुल्लसति स्म। प्रारब्धस्यास्य आलयनिर्माणस्य तदानीं दश वत्सराः आसन्। अद्य सः निर्माणव्यवसायः पूर्णताम् इयाय इति तस्य राज्ञः सन्तोष एव तादृशशोभातिशयस्य कारणम्। किंचायं भगवतः चेन्नकेशवस्य आलयः किमपि अतिशयितं शिल्पसंविधानं संवृत्तमित्यपि तन्मानसं हर्षपरवशं समवर्तत। शिल्पकलासु संस्तुतान्तराः अन्ये च सहृदयाः तस्य महीपतेः सकाशे तत्रत्यं शिल्पप्रकर्षं सबहुमानं पूर्वमेवावेदितवन्तोऽभवन्।

मूलस्थानम् आस्थितस्य भगवतो नारायणस्य प्रथमम् आरार्तिकं विधेयम्। तदनन्तरमेव सर्वैः शिल्पशोभानिरूपणे प्रवर्तितव्यम् इति पूर्वमेव निर्णीत आसीत्कार्यक्रमः। तदनुसारेण 'सज्जास्सन्ति पूजकाः देवस्य सन्निधौ' इति महीपतये सविनयं परिजनेष्वन्यतमः निवेदितवान्। सद्यो घण्टाः समाघट्यन्त। धूपिताः धूपाः। दीपिताश्च दीपाः। अन्ते कर्पूरनीराजने क्रियमाणे भगवतो मूर्तस्य सौन्दर्यसंभारमालक्ष्य सर्वे सविस्मयाः संजाताः। 'कदाचित् गृहीतमोहिनीरूपः किलायं भगवान्? तत एवास्यांङ्गेषु अङ्गनाजनसाधारणं सौभाग्यम्' इति भक्ताः केचिदचिन्तयन्। चेन्नकेशवः (सुन्दरकेशवः) इति नामापि तस्य देवस्य यथार्थमालक्ष्यत।

प्राकारान्तः भगवन्मूर्तेः सव्येतरे भागे भित्तौ समुल्लिखितानां प्रतिमानाम् इयत्तैव नासीत्। प्रदीपे प्रकाशिते कथानुसारेण रामायणपात्राणि तत्रोत्कीर्णानि अलक्ष्यन्त। एकत्र लग्नां दृष्टिमन्यतः नेतुमपि नास्मरन् प्रेक्षकाः। तत एव तेषामन्यतः अवलोकने कुतूहलमपि नोदभूत्। तस्मात् स राजा विष्णुवर्धनः, अन्ये तदनुयायिनश्च तत्रैव अविचलन्त आसन्। गगनाचार्यः स्वयमेव महाराजं सानुनयम् अन्यतो नयन् बाह्यप्राकारगतप्रतिमानां दर्शने चोदयामास। किङ्किणिमाला तु पितुः पार्श्वतः किञ्चिदिव दूरे तमनुगच्छन्त्यासीत्। आत्मानम् अन्यः

कोऽपि न लक्षयतीत्याश्वस्तहृदया सा किङ्किणिमाला स्वीयम् उत्तरीयं समीकृत्य तदञ्चलं साकर्षं कटितटम् आवृत्य न्यबध्नात्। तेन च तस्या उरसि सुश्लिष्टमुत्तरीयं तस्याः तारुण्योदयं प्रविभक्तावयवम् अदर्शयत्। विजयतुङ्गः परं ग्रहच्छलेयेदं निरूपितवान्। तदात्वे सापि तं व्यलोकयदेव। पुनरपि परस्परस्य दृष्टिः असज्जत परस्परम्। किङ्किणिमाला तु सहसैव अनमयदात्मीयं शिरः। तेन च विजयतुङ्गः नैकशस्तां विलोकयितुं प्राप्तावसरोऽभवत्।

शनैस्ताम् उपसृत्य सेनापतिः अस्पन्दिताधरम् अब्रवीत्, 'तरुणि, यदि तावकौ पादौ रुजतः तदेकान्ते उपविश्यताम्' इति। सत्यं, किङ्किणिमाला विजयतुङ्गस्य वाचि विसृत्वरम् अनुरागम् अवागच्छत्। अत एव सम्भ्रमाकुला मध्येमार्गं महीपतेः पुरत एवातिष्ठत्।

'वत्से, किमिदम्? पश्चादायान्तम् अवनिपतिमपि अविज्ञाय मार्गम् अवरुद्ध्य स्थिता?'। इति किञ्चित्प्रकटितकोपं वदति पितरि द्विगुणितसाध्वसा सा क्षणं कर्तव्यं नाजानात्। क्षितीन्द्रस्य कथमपि वर्त्म दित्सन्ती लेशतः पश्चादपासरत्। तदा तु तत्र स्थितस्य विजयतुङ्गस्य पार्श्वेऽसज्जत तस्या अङ्गलतिका। सद्य एव तस्या मुखे लज्जाजुगुप्साभ्यां शबलः कोऽपि भावः प्रत्यभात्। परन्तु स सेनापतिः तस्मात्प्रदेशात् लेशतोऽपि अचलन्नेवातिष्ठत्।

बाह्ये प्राकारे स्तम्भाः विरलान्तरा एवासन्। एकैकस्यापि स्तम्भस्याग्रे शिल्पनिर्वर्तिता कापि प्रतिमा प्रेक्षकाणां मनांस्यावर्जयन्ती व्यराजत। उत्तरोत्तरम् अधिकं संभृतशोभानां प्रतिमानां सौन्दर्यातिरेकं विस्मृतनिमेषेणैव चक्षुषा वीक्षमाणः चचाल पुरतः पृथिवीपतिः। धृतदर्पणा कापि तरुणी निजे ललाटे दक्षिणकराङ्गुल्या तिलकं विदधानेव कलिताभवत् काचित्प्रतिमा तत्र। सा किल जहार प्रेक्षकाणाम् ईक्षणेन साकं मनांस्यपि। अपरा काचित्प्रतिमारमणी आभुग्नं चापं वामेन करेण कलयन्ती, अपरेण च शरमारोपयन्ती सहृदयानां हृदयं हठादाचकर्ष। एवं प्रतिस्तम्भम् उट्टङ्कितानां नाट्यानुगतमधुरभावानां प्रमदाकृतीनां प्रतिमानां दर्शनेन ते सर्वे सत्यं निर्वृतेः परां काष्ठां प्रपेदिरे।

यदि कदापि विष्णुवर्धनः शिल्पेनावेद्यमानं भावं प्रति आत्मानं किमपि पृच्छेत्, तदा तस्य अनुगुणं विवरणं दातुकामः गगनाचार्योऽपि तमन्वसरत्। तदा तदा शिल्पविशेषस्य विलोकनावसरे राज्ञो वदने आविर्भूय तिरोभवन्ति विस्मयचिह्नानि आह्लादविलसितानि च निरूपयन्नेवास्त, स गगनाचार्यः। कस्याश्चित् प्रमदारूपायाः प्रतिमायाश्च भावम् अवगन्तुं स नाशकत्। सा किल तरुणी शिरसि, ग्रीवायाम्, उरसि, करयोः, कटितटे इति सर्वेष्वङ्गेषु भूषणभूषिता अतिष्ठत्। तदन्तिकगतः कोऽपि कपिपोतः उद्धुरकन्धूरः तामेव पश्यन् तस्याश्चेलाञ्चलम् आकर्षन्नेवासीत्।

तदवलोकयतो राज्ञोऽधरतटे क्षणमेकं मन्दस्मितं प्रासरत्। क्षणान्तरे च तदेव अज्ञाततत्त्वस्य तस्य जिज्ञासावेदको हासः पर्यणमत्। शिल्पी तु राज्ञे अपृष्टोत्तरं वक्तुं न प्रागल्भत।

द्विवारं तामेव प्रतिमां निपुणम् आलक्षयत् नरेन्द्रः। ततो न किञ्चि दुक्त्वा प्रातिष्ठत। किन्तु तमनुबध्नन्त्योऽन्तःपुररमण्यस्तु शिल्पमिदम् आलक्ष्य स्फुटितकपोला जहसुः। पट्टमहिषी पुनः तस्याः प्रतिमायाः पुरः तिष्ठन्ती विजयतुङ्गमाहूय अन्वयुङ्क्त 'किमु भवानवगच्छति भावमस्य शिल्पविशेषस्य?' इति।

'नाहमवगच्छामि, कदाचित् शिल्पिना विदूषकाश्रितेन किमप्येवमु आचेष्टितं स्यात्' इति सेनापतिः समाधत्त। अन्येऽपि तमाशयम् अनुमोदमाना आसन्।

अत्रान्तरे महीपतिः आलयस्य पुरोभागम् आगतवान्। तत्र प्राङ्गणे विहितस्य वितानस्य अधस्तात् स्वस्यैव कृते स्थापितम् अलङ्कृतं सिंहासनम् अभजत। परिजनाः अन्ये च तदनुयायिनः यथार्हम् आसनेषूपाविशन्।

शिल्पीन्द्रो महाराजस्य वामतः, विजयतुङ्गो दक्षिणतश्चोपाविशताम्। किङ्किणिमालापि पितुरन्तिके भूमावुपविष्टा। द्वावपि पादौ एकतः आमुज्योपविष्टा सा तासु प्रतिमास्वन्यतमेवाभात्।

क्षणमेकं सा सभा निभृतमूर्कातिष्ठत् । ततो विष्णुवर्धनः गम्भीरेणात्मनः स्वरेण भिन्दन्निव तां मूकताम् अभाणीत् 'रसिकाः सभासदः, अद्यास्माभिरनुभूतस्य विस्मयस्य नास्त्यन्तः । अत्रत्यः एकैकोऽपि प्रस्तरः भाषते इवास्माभिः साकम् । सत्यं, सा किल भाषा, यां कला भाषते । कथमिवान्या भाषा प्रभविष्यति एवं मनोनिरूढस्य भावस्यावेदने ? । स्वयं चात्र सन्निधत्ते भगवान् त्रैलोक्यकेशवः । तदेतदखिलं समवेतं कलायाः अस्याः दिव्यताम् अवगमयति । नाट्यादुदितं वा शिल्पम् ? शिल्पादुदितं वा नाट्यम् इत्यपि सन्देहोऽत्र समुन्मिषति । सर्वस्यास्य मूलकारणम् अयं शिल्पाचार्य एव । अस्माकं भाविनी सन्ततिः नैव द्रक्ष्यतीमं शिल्पीन्द्रम् । अथापि सा अस्य शाश्वतं कलाकौशलं एषु प्रस्तरेषु विलोकयिष्यत्येव ।

'सत्यम् , अद्य वयम् इमं शिल्पिनं प्रशंसामः । तथापि भविष्यत्कालभाविनां श्लाघैव इमम् अमर्त्यं विधास्यति । सत्यप्येवं कृतज्ञताम् अनिवेद्य न वयं तूष्णीं स्थास्यामः । अतः इमं रत्नराशिं विशिष्टं वस्तुजातं चास्मै समर्पयामः ।

'हन्त ! विस्मृतोऽस्मि एकं विषयम् । तस्य शिल्पस्य भावं न सम्यगवगतवानस्मि । तत्र हि शिल्पे कपिः कश्चित् कस्याश्चित्सुन्दर्याः वसनम् आकर्षति । कुतोऽयं शिल्पी मर्कटेनैवं हठात्कारं कारितवानित्येव मे वितर्कः । अत्र समवेतेषु यः कोऽपि वेत्ति चेदस्य तत्त्वं, निश्शङ्कम् अभिधत्ताम् । ततः एतं शिल्पाचार्यमपि तत्सङ्गतं न वेति प्रक्ष्यामः ।

इत्थम् अभिधाय भूपः जिज्ञासाकुलः शिल्पीन्द्रमैक्षत । सभ्यास्सर्वे चिन्तायाम् अमज्जन् । तेषाम् आत्मनोऽभिप्रायम् आवेदयितुम् एकतः सङ्कोचः, 'यदि स्वीयः आशयः असङ्गतो भविष्यति तदा पराभवः' इति चिन्ता अन्यतः । कष्टं ! किं वा ते विदध्युः ? ।

क्षणं सा सभा तूष्णीमास्त । विजयतुङ्गः सहसा उदतिष्ठत् आसनात् । 'महाराज, अत्र शिल्पविलासस्य दृष्टिदोषं परिजिहीर्षुः गगनाचार्यः इदं

संविधानं विहितवान्' इत्येवाहं समर्थये । नास्त्येवान्यो निगूढो भावः ।' इति वदन्नेव सगर्वं सर्वतः प्रसारयन् चक्षुः उपाविशत् ।

राजापि तेन समाधानेन तृप्त इव परावृत्य शिल्पिनमपश्यत् । तस्य तु हास एव उदभूत् अस्य श्रवणेन । स्वरेणैवावज्ञां सूचयन् शिल्पाचार्यः अवोचदेवम्—'महाराज, शिल्पमिदं दृष्टिदोषनिवारणायेति सेनाप्रत्युक्तमपि नातथ्यं सर्वात्मना । किन्तु शिल्पेनावेद्यमानं तत्त्वं नैतावता विश्राम्यति । नाट्यमिदं देवानां कान्तं चाक्षुषं क्रतुम् अविज्ञाय नाट्यमाचरन्तीनाम् अङ्गनानाम् अङ्गेष्वेव निमग्नदृष्टीनाम् अपक्वधियां प्रेक्षकाणां शोच्यां चित्तवृत्तिं विवृणोत्यस्य वानरस्य चापलकृत्यम्' इति ।

'साधु, शिल्पीन्द्र; साधु । भवदीयं सुसूक्ष्ममिमं भावं पटुतरं व्यञ्जयतीदं शिल्पम् । यदवादीत् सेनापतिः तदपि नासाधु । यतः अभिनयन्तीनां सुन्दरीणां वपुःप्रकर्षे एव दृष्टेः आसञ्जनं, नियतम् अभिनयकलायाः दृष्टिदोषं जनयेत् । तस्य परिहारोऽपि अवश्यंकर्तव्य एव । नाट्यं कुर्वत्याः अस्याः प्रमदायाः सकाशे मर्कटस्यास्य अवस्थापनं नियतं दृष्टिदोषं परिहरेत् । ततः सर्वम् अवदातम्' इति नरेन्द्रः सान्तस्तोषम् अवदत् ।

इदम् आकर्णयन् स्तब्धाङ्गः शिलीभूत इवास्त विजयतुङ्गः । किङ्किणिमाला तु तावत्पर्यन्तम् अवनमितम् आत्मीयं शिरः उदनमयत् ।

## 'परभृतं प्रति'[1]

चि. द्वा. देशमुखः

नवमुदां निलयस्य रवं तव श्रुतिसुखं श्रुतवानहमन्यभृत् ।
किमु भवान् विहगः किमु केवलं धरणिसंक्रमणक्रमनिःस्वनः ॥ १ ॥

तृणमयीमवनीमधितिष्ठतो ध्वनिरयं स्पृशति श्रवणे मम ।
शिखरतो विचरन् शिखरान्तरं युगपदन्तिकवर्तिविदूरगः ॥ २ ॥

रविकरान् कुसुमान्यधिकृत्य ते प्रसरतीव दरीपुरतो वचः ।
अतिगतं स्मृतिमार्गमुपानयन् विचलयत्यमिता हृदि भावनाः ॥ ३ ॥

त्रिरभिनन्दित एहि मधोः सखे न हि शकुन्त इति प्रतिभासि मे ।
किमपि गूढमवीक्षणगोचरं रुततितिस्त्वमविग्रहधारिणी ॥ ४ ॥

अश्रृणवं यदहं मम शैशवे तदिदमेव रुतं तव यद्वशात् ।
प्रतिदिशं च मयाऽक्षि विचिक्षिपे व्रततिपादपराजिषु चाम्बरे ॥ ५ ॥

हरितभूमिवनेषु दिदृक्षया तव मयाटनमाचरितं बहु ।
त्वमभवः प्रणयेप्सितदर्शनश्चिरमलोचनगोचरगोऽपि सन् ॥ ६ ॥

अधिशयान इहापि पिक! स्थलीं तव रुतं शृणुयां पुनरप्यहम् ।
वचनसंश्रवणेन च संस्मरन् अभिनवे वयसि प्रसृतां मुदम् ॥ ७ ॥

त्वमयि धन्यतरोऽसि महीतलं विहग! भौतिकवन्न विभाति मे ।
किमपि दिव्यपदं खलु भाति तत् समुचितं वसतेस्सदनं तव ॥ ८ ॥

---

[1] आङ्ग्लभाषायां वेड्स्वोर्त्नामककवेः 'To the Cuckoo' इति ख्यातस्य खण्डकाव्यस्यानुवादः ।

को. ल. व्यासराजशास्त्री

रोगी—आर्य! प्रायेण एको मासोऽतीतो गदान्निर्गतस्य मे। कस्मात् न स्नानमनुमन्यसे।

वैद्यः—अस्ति हि आभाणकः—'स्नातो वैद्यं न पश्यति' इति।

---

बालः—अम्ब! प्रातिवेशिक्या राधया मे मोदका दत्ताः, मया च भक्षिताः।

माता—किं त्वया तस्यै उपचारवचनमुक्तं न वा?

बालः—उक्तमेव।

माता—किमुक्तम्?

बालः—'त्वया मम पितुः भार्यया भवितव्यमासीत्' इति।

---

चोरः—(पथिकमवलोक्य) अपि त्वया यः कोऽपि रक्षापुरुषः निकटे दृष्टः?

पथिकः—तस्य छायापि न दृष्टा।

चोरः—तर्हि तव धनकोशं दत्त्वा याहि।

---

दाण्डिकः—अप्यद्य रथ्यायामस्याः कुमार्याः पृष्ठतो गतं त्वया?

युवा—आर्य! नैतदेवम्; तयैव मम पुरस्ताद्गतम्।

---

अध्यापकः—सायं कन्दुककीडायाः किं प्रयोजनम्?

छात्रः—तावन्तं कालम् अध्ययनपीडा नास्ति।

---

**गर्भिणी माता**—जात! त्वया सह क्रीडनाय किं सोदरमपेक्षसे, उत सोदर्याम्?

**पुत्रः**—अम्ब! अहं श्वपोतकमपेक्षे।

---

**कामुकः**—यदि त्वं मे भार्या न भवसि, तर्हि नान्यामहमस्मिंन् जन्मनि कामयिष्ये।

**प्रमदा**—यदि भार्या भवामि, तदा?

---

**गृहिणी**—मम माता मृगशालां गन्तुमिच्छति।

**भर्ता**—आगच्छतु। तत्रैकं पञ्जरं शून्यमस्तीत्युक्तं तदधिकृतेन।

---

**मित्रम्**—किं त्वं वदसि? तव पिता न किञ्चिद् धनमवशेषितवान्?

**चैत्रः**—नैव। प्रथमतः स धनार्थमारोग्यं नाशितवान्। पश्चात् आरोग्यार्थं सर्वं धनं व्ययीकृतवान्।

---

**वैदेशिकः**—अस्मिन् गृहे भार्याभर्त्रोरभिप्रायभेद एव न दृश्यते। महदिदं प्रमोदस्थानम्।

**गृहस्थः**—मया तु अवकाश एव न दीयतेऽभिप्रायभेदस्य। गृहिण्या यदुच्यते तन्मया क्रियते।

---

**लेखकः**—मम हास्यं श्रुत्वा कुतो न हसितं त्वया?

**वाचकः**—इदं हास्यमिति प्रथममेव कुतो नोक्तं त्वया!

---

# भारतम्-अद्यतनं श्वस्तनं च

(आज़ाद्-स्मारकोपन्यासाः)

श्री जवाहरलाल् नेहरू

अनुवादकः डा० वे. राघवः

## उपोद्घातः

मौलाना-आज़ाद्-स्मारकोपन्यासान् विधातुं जवाहर्लाल् नेहरूमहाशय-मामन्त्रयमाणोऽहं, मौलाना-अबुल्कलाम्-आज़ाद्-महाशयेन भारते विविधेषु क्षेत्रेषु, व्यवहारे साहित्ये च, यत् कृतं तदनभिधातुं न शक्नोमि। स प्रथमयौवने उज्ज्वलस्साहित्यकारः मतसिद्धान्ती चेति उन्नतिमवाप, किन्तु यैर्गुणैरस्यैषा सिद्धिस्सुलभाभूत्, ते तं न चिराय केवलविद्याक्षेत्रविश्रान्तं भवितुमनुमेनिरे। स्वच्छन्दविचारभावना सत्यान्वेषणं चानिवार्यतया तं राजकीयप्रक्षोभोद्यम-मानिनाय। स्वस्य ऊनविंशतिवर्षेष्वेव भारतस्वातन्त्र्ययोधस्स बभूव, यतस्त-दैव तेन साक्षात्कृतं यत् स्वातन्त्र्यवातावरणमपहायान्यत्र मनुष्येण यथार्था पूर्णा वाभिवृद्धिरासादयितुं न शक्येति। तस्य पञ्चत्रिंशवर्ष एव भारतराष्ट्रिय-काङ्ग्रेस्-सभाया अध्यक्षतानियोजनं नाम सत्कारं तस्मै भारतीया जना ददुः। पश्चात् स्वातन्त्र्यसमरस्य अत्यन्तसङ्कटायां दशायां षड्वर्षानेष काङ्ग्रेस्-सभाया दिष्टान्तानां नेता बभूव। १९४२-वर्षीयसमरे, सर् स्टाफ़ोर्ड क्रिप्स्, लार्ड् वेवल्, ब्रिटिष् काबिनेट् मिषन् इत्येतैस्सह यदा प्रवृत्ताः समाधानमन्त्राः तदा काङ्ग्रेस्-सभायास्सोऽध्यक्षो बभूव।

स्वातन्त्र्यप्रेमैव पण्डितं मौलाना-आज़ाद्-महाशयं धीरराजकीय-योद्वृत्वेन विपर्यासयत्। तदेव प्रेम तं युक्तिवादस्य, भारतीयजीवितस्य सर्वेषु क्षेत्रेषु प्रगतिशीलतायाश्च उच्चैर्वावदूकं चकार। सामूहिकान् आर्थिकान् राजकी-यान् धार्मिकान् मतसंबन्धिनश्च प्रश्नान् असङ्गया नीरागया दृष्ट्या स उपगन्तु-मियेष। स्वातन्त्र्यं न्याय्यत्वं च तस्य जीवितनेतृभूतौ नियमौ बभूवतुः, ते च भाषा-मत-जातिभेदानविगणय्य सर्वेषामेव भारतीयजनवर्गाणामर्थे स संपाद-यितुमियेष।

विचारस्य महत् वैशद्यम्, व्यवसायस्य अवैषम्यमनाविष्टता च तदीय-बुद्धेर्द्वौ प्रधानौ गुणौ बभूवतुः। कस्या अपि समस्याया हृदयं सहसा अभिगन्तुम्, अप्रधानान् बाह्यानंशानवधीरयितुं च स शक्तोऽभूत्। इयं च सारग्रहणशक्तिः यत्सर्वस्यापि न्याय्यमुचितं च तत्संवित्त्या सहकृता बभूव। न कस्यापि विषयस्य ऐकदेशिकदृष्टिरभूत्तस्य; ये च स्वस्माद्भिन्नाभिप्रायाः तेषां कृते स सदा तत्तदनुमेने। यस्मिन् कस्मिन्नपि यस्तस्य वैयक्तिको रागो द्वेषो वा बभूव, स न प्रायः कदाचित्तद्बुद्धेरध्यवसायमचालयत्। तस्य यद्बुद्धेर-

सङ्गत्वं यच्च बहूनां दृष्टिकोणानां पस्गिणने तस्य पाटवं, तत् तदीयवचसस्सर्वस्यापि असाधारणं किमपि गौरवं ददौ ।

मौलाना-आज़ाद् मुख्यतः पण्डितः, परिस्थितिबलात् राजकीयवादमाकृष्टः । बहिः प्रकटनाडम्बरं निषेद्धुं यत् स प्रायेतत ततो नान्यत् किमपि तन्निष्ठं पण्डितत्वं स्पष्टं व्यञ्जयति । भारते वा अन्यत्र वा, राजकीयवादनेतारः प्रायः प्रजाभिस्सह ये स्वेषां संपर्काः तेभ्यो बलमाददते; मौलाना-आज़ाद्-महाशयस्तु मुख्यतस्सन्न्यासी बभूव, यस्मै राजकीयवादरङ्गात् स्वाध्यायैकान्त्यमेव रोचते स्म तराम् । तस्य लज्जालुः निवृत्तिप्रवणः स्वभावः भारतीयजनानां तमनुरक्ततरं चकार । तन्मरणादनुपदं यत्सार्वजनिकमतिमहत् शोकप्रदर्शनं श्लाघनं चाभूत् न तत्समतया अन्यत् किञ्चिदभूत्, अपहाय तमवसरं यदा स्वसिद्धान्तस्य कारणात् पूज्यो गान्धी मारितः ।

तन्मरणे भारतीयसांस्कृतिकानुबन्धसंस्थायाः नष्टो न केवलं तत्प्रतिष्ठापकाध्यक्षः किन्तु प्रारम्भात् प्रभृति तत्कार्याणां प्रेरकश्च । तत्स्मृतिसत्कारचिह्नतया संस्थयानया निरणायि 'आज़ाद्-स्मारकोपन्यासाः' इति उपन्यासमालां प्रस्तावयितुं, तदर्थं च भारतादन्यतश्च प्रकृष्टान् पण्डितानुपनिमन्त्र्य मनुष्याभ्युदयं तदभिवृद्धिं चान्तरेण, विशिष्य भारतोद्देशेन, तान् भाषयितुं च । मानुष्यकपक्षपातिनो मौलाना-आज़ाद्-महाशयस्य श्रद्धां मनुष्यचिन्ताभाव-क्रियाणां सर्वमंशं व्याप्नोत् । संस्थाया एष विश्वासः-यदेते उपन्यासाः भिन्नानां जनानां मिथो भूयस्याः प्रतिपत्तेरभिवर्धनाय स्वकीयमर्थ्यमुपबृंहणं समर्पयिष्यन्ति, अद्य जगति सञ्चितान् विरोधवेगान् कांश्चन शिथिलीकरिष्यन्ति चेति ।

एषामुपन्यासानां प्रथमां मालां कर्तुं यत श्री जवाहरलाल् नेहरू संमन्यते स्म, तन्नो विशिष्टं भागधेयम् । नीतिविदिति वा सर्वदेशेषु प्रथितस्साहित्यकार इति वा तस्य यत्स्थानं तन्न मया वक्तव्यम्, किन्तु विचारकतया, लेखकतया कर्मठतया च तस्य यत् अत्यन्तम् अकृत्रिमं हार्दत्वम् अग्रगण्यो गुणो भवति तं निर्देष्टुमिच्छामि । तस्य बुद्ध्या चिन्तनं नाम हृदयेन भावनं भवति, भावनं च कायिकं करणं भवति । अनुवेदनस्येदृशी त्वरितता कदाचिद्दुरूहतामादधीत, मन्दतरा मतीः प्रकोपयेच्च; किन्तु सा प्रायः पुनरनुसन्धानासहस्य प्रकटस्य हार्दत्वस्य लिङ्गं भवति । पण्डितनेहरूमहाशयस्य अनुभवः अनुभावश्च प्रायः सदा समकालभाविनौ भवतः ।

हार्दत्वेन आत्मन ऐक्यापादनं भवति; इदमेव रहस्यं पण्डितनेहरू-महाशयस्य स्थितिस्थापकरूपसंस्कारे बले च। कारागृहवासः सदा स्वभावस्य परीक्षा भवति, सा च परीक्षा न तथा तत्कृतस्य शारीरस्य श्रमस्य कारणात्, यथा पुरुषमतेरवैषम्यमन्तरेण तदाहितस्य श्रमस्य कारणात्। स्वाभाविकव्यापारेभ्यो निरुद्धः, मनुष्यान्तरसंगमनावसराच्च निषिद्धः, मनुष्यः स्वकीयभावनाचिन्तनव्यवसायमात्रोपकरणशरणः क्रियते। बलाद्व्यापारशून्यता महान्तं खेदमावहति यस्य च खेदस्य प्रमाणं पुरुषस्य जीवातुशक्त्या बलेन च साक्षान्निर्धार्यते। एतेन व्याख्यातं भवति-कथं बहवो राजकीयनेतारः कारागृहवाससमये शारीरारोग्यभङ्गमनुभवन्ति, यद्यपि ते नानुभवन्ति आत्मतेजोवधम्। स्वकारागृहवासं प्रायोऽननुभूतविकार आस्थितवान् पण्डितनेहरूमहाशयः। तस्य स्वात्मनि प्रतिभायाः, बुद्धिव्यापारस्य, व्यवसायस्य च यदैक्यापादनं तेनैवैतत्सुलभं बभूव। व्यवसायस्य यदा बहिः स्पन्दक्रियारूपेण आविर्भवितुं सारणी नाभूत्, बौद्धं भावमयं च यज्जीवितं तत् तस्य समानयाधार्थ्यमकारि प्रतिभया।

पण्डितनेहरूमहाशयस्य सर्वाः राजकीयाः क्रिया उक्तयश्च कयापि शिल्पिनः संवेदनस्फूर्त्या लक्षिताः। शिल्पिनः प्रायः लज्जालवः स्वात्मनिष्ठाश्च; तथापि कस्यापि विचित्रस्य भाविकसाम्यतापादनन्यायस्य कारणात्, ते स्वसजातीयमनुष्यसमक्षं स्वीयाः चिन्ताः भावांश्च प्रकटयितुं कामयन्ते। बाह्यप्रपञ्चप्रेरणानां स्वस्मिन् यानि प्रतिफलनानि तानि रेखायां वर्णे शब्दे वा अभिव्यज्य सन्तुष्टास्ते प्रायो भवन्ति। किन्तु असाधारणानां केषाञ्चिद्विषये एतत्प्रतिफलनं तथा बलवद् भवति, यथा एतदभिव्यञ्जनमात्रं न सन्तुष्टिकरं भवति; ते बाह्यव्यवहाररङ्गप्रवेशमर्थयन्ते; यस्मिन् सन्निवेशे जातास्तं विपरिणमयन्ति च। शिल्पी ततो राजकीययोधे विलीयते, किन्तु विवादविग्रहयोर्मध्येऽपि शिल्पिता तस्मिन् लगत्येव। इतिहासेन नानीतो रङ्गे कोऽपि पुरुषः यस्सामूहिकव्यवहारे जवाहरलाल् नेहरूमहाशयात् सुलक्षणतरः शिल्पी भवति।

यस्मिन् कस्मिन् वा विषये भवतु, माहात्म्यं नाम विरोधांशं कञ्चन स्वस्मिन् बिभर्त्येव। विरुद्धानां समावेशः प्रतिभायाः समृद्धिं जटिलतां चादधाति। ततो नेदं चित्रं यत् पण्डितनेहरूमहाशये कलासंबन्धिनी प्रकृतिरिव विज्ञानसंबन्धिनी प्रकृतिरपि प्रकटलक्ष्या। स्वेन क्रियमाणे मनुष्याणां व्यवहाराणां च परिशीलने अपुरुषपक्षपाता वस्तुस्थित्यवगाहिनी या विज्ञानलक्षणभूता दृष्टिः

तामानेतुं स सदा सपरिश्रमं प्रायतत। निपुणं निरूपकः, विमर्शकः, मार्गणशीलश्च तदीयः स्वभावः तस्य ऐकदेशिकदृष्टिग्रहणं दुष्करमकरोत्; यद्येतेन कदाचित् कस्यापि कार्यक्रमस्य दुरन्तपर्यन्तानुधावने स विलम्बशीलः कृतः, एतदेव तदीयचिन्तालेखक्रियाभ्यः कमपि दृष्टिविस्तारं स्वस्थतां च अददात्, ये गुणाः सारतो विज्ञानानुरक्तस्य पुरुषस्य लक्षणं भवन्ति।

कालस्य क्षणिकता, क्षयस्य अनिवार्यता च सत्त्वमात्रस्य यत् करुणत्वं तद्भावनया नः पूरयति। तस्माद् भावात् सचेतसः कस्यापि नात्मा पलायितुं शक्नोति, किन्तु मनुष्यगौरवे न्यस्तनिर्बन्धो वीरभावः शोकं नैराश्यं चातिक्रमितुं समीहते। स एव महान् नेता येन मृत्युतिमिरमयीषु द्रोणीषु सञ्चारः कृतः, किन्तु तदुपरि वर्तमानानि प्रकाशवन्ति शृङ्गाणि न कदापि विस्मृतानि। सति व्यसने मृत्यौ च ये पुरुषार्था धृतिपौरुषसहनरूपान् गुणान् अपेक्षन्ते तेषां संवेदनं नेहरूमहाशयः अस्मासु संबोधयति। तस्य लेखाः क्रियाश्च एतया पुरुषगौरवसंवित्त्या परिपूर्णाः। अयमेव स पट्टतन्तुः यो नेहरूमहाशयं मौलाना-आज़ादमहाशयेन सह दृढं बबन्ध, भारतीयसंस्कृतेर्विशालानामनुकम्पात्मकानां प्रकाराणां प्रायो यथार्थतमं प्रतिनिधिं च तं चक्रे।

वैचित्र्यमध्ये यद् ऐक्यं तदेव भारतीयभावस्य यदि सारांशः, स सारांशः तावान् यथार्थश्च भवति; यत्सत्यं लोकस्य भागान्तराणां च आवश्यकतयापेक्षितश्च भवति। अत एव **अद्यतनं श्वस्तनं च भारतम्** अधिकृत्य यद् पण्डितनेहरूमहाशयस्य दर्शनं तस्य विशिष्टः अर्थः न केवलं भारतीयानां,—यान् भारतीयान् नूतनप्रभवापेक्षितं सन्नाहाह्वानमभ्युपगन्तुं स पण्डितनेहरूमहाशय आमन्त्रयते—किन्तु लोके सर्वत्र ये सचेतसो वर्तन्ते तेषां सर्वेषामेव भवति।

आज़ाद्-स्मारक-उपन्यासानामुपक्रमोपन्यासं कर्तुं श्रीजवाहरलाल् नेहरूमहाशयं महता प्रहर्षेण प्रार्थये।

नवदेहली
२२ फेब्रुवरि १९५९

हुमयून् कबीर्

१

क्षमापणोक्त्या मयोपक्रमितव्यं भवति। यद्यप्यहं चिरात् सामान्यलोककार्यैस्समन्वितः, बहुशश्च जनानां पुरतो भाषे च, तथापि योऽद्य मया करिष्यमाण उपन्यासः प्रतीक्ष्यते, तादृशं कर्तुं सर्वथा नास्त्येव मे परिचयः। एतादृशेन उपन्यासेन विचारवैदुष्यभरिलेन भाव्यम्। तत्संपादनाय महान् कालश्च देयः। न केवलमीदृशेषु कार्येषु न मे परिचयः, किन्तु लोकसभाया आयव्ययनियोजनाविचारार्थकेऽधिवेशने प्रवर्तमाने, सत्सु च बहुवेलाघस्रेषु मदीयेष्वेव दैनन्दिनव्यापारेषु, सन्दर्भस्यास्य यदुचितं तन्मे सुतरां दुष्करमभूत्।

नियोगमेनमङ्गीकर्तुमप्रवण एवाहमासम्, तथापि क्षणं चित्ततारल्येन विवशीभूयाभ्युपागच्छम्। मौलाना-आज़ाद्-महाशयानां वार्षिकश्राद्धदिनेऽस्मिन् अस्माभिरादरणोपचितां तदनुस्मृतिमुद्दिश्य श्रद्धाञ्जलिं चिकीर्षामि। उपन्यासविषयश्च यो मे सूचितः स च मामकर्षत्, यतो यथाकथञ्चित् भारतस्य अद्यत्वभविष्यच्च्यां पूर्णमेव मे मानसम्। तथापि किञ्चिदिव भीतश्चाभवम्। विषयोऽयमतीव प्राणभूतः। अहं तु अद्यतनभारतेन सह तथा महदनुबद्धः, यथा विषयमेनमधिकृत्य निष्पक्षपाता दृष्टिर्न मे सुकरा भवेत्। ततः कार्यभारेण कारणान्तरेण च व्यग्रेण मया इदंप्रथमतया क्रियमाण एतादृश उपन्यासस्समुत्साहे श्रोतृभिर्मयि दाक्षिण्यं प्रदर्शनीयमिति प्रार्थ्ये।

अद्यतनभारतस्यावधारणं वर्णनं च धीरेणैव साध्यं कार्यं स्यात्, भाविभारतमधिकृत्य यत्किमपि वचनं तु साहसप्रायमेव स्यात्। यस्य कस्यापि वा देशस्य, अथवा लोकस्यैव, भाविनीं दशां कथयितुं यत्सत्यं लोकचरित्र एव कदापि इतो दुष्करतरं न बभूव। कार्यव्यतिकरा अश्रद्धेयेन वेगेन परापतन्ति, परिणामः परिणाममनुधावति। राज्यतन्त्रस्य यो बाह्यो भावः, स तल्स्याधस्तनान् असंख्याकान् प्रवाहान् अन्तर्भावयति, यैः प्रवाहैः कदाचिद् उपरि उद्भिद्यमानैः कार्यस्वरूपं विपर्यस्यते।

अद्यतनभारतं न केवलं समनन्तरादेव भूतादुद्भूतम्, किन्तु अस्मद्देशस्यातिदीर्घचरित्रस्य संवत्सरसहस्रेभ्योऽपि। आशयः, अनुभवः, क्रिया, एतेषामेकस्योपरि अन्यदिति क्रमशः परिपतितैः संघातपटलैरवधारितस्वरूपा वयम्; यद् वयमद्य, तत्तैरेव निर्मितम्। ये भारते मम समकालिका अभूवन् तेषां विशेषेण रूपं परिसरश्च कयापि पुनरसंभवदावृत्त्या व्यतिकरपरंपरया दत्तमासीत्। न केवलमस्माकं केनापि महात्मना, प्रबलेन नेत्रा च संबन्धस्समभूत्, योऽस्मान् आमूलमचालयत्, जीवधारां विपर्यासयत्, दैनन्दिनजीवयात्रारेखातश्चास्मानाकर्षत्, किन्तु इतिहासपरिवर्तरूपगौरववत्सु कार्येषु च साक्षिणो भागिनश्च अभूम। पुनःपुनश्च अन्वभूम हृदयावेगलक्षितान् भावौदार्यशालिनश्च क्षणान्, कदाचिदाशाभङ्गे एतत्प्रतिपक्षिणं नैराश्यसोदरमपि भावम्। तथाप्येवं वक्तुं न सर्वथा युक्तं स्यात्, यतः उत्कटतां प्राप्तमावेगं यः प्रायोऽनुजायते मानसिकशारीरसमवसादात्मा भावः, तस्य वशे न वयमपताम। सदैव अवलम्बनाय किमप्यासीत्; आसीच्च नेता शिलोच्चयप्रायः दीपस्तम्भप्रायश्च; आसीच्च व्यवसायविशेषः यो नो रोमाञ्चमाततान, अस्मासु यदुत्तमं तदाकारयच्च। ते च क्षणाः न सदैव सुखाः, मनाग्दुःखावहा अपि आसन्, किन्तु सदैव महत्सु कार्येषु व्यापृताः स्मः, इतिहासगतिक्रमेण सह क्रामाम इति च कापि आत्मसन्तुष्टिरभूत्। यथा जीवपौष्कल्यमाधीयेत तथा भावः क्रिया च सहभावेन प्राक्रमेतां, राज्यतन्त्रव्यवहारेष्वपि धार्मिकेण मार्गेण उच्चैर्लक्ष्यैश्च सञ्चरामह इति यत् श्रद्धा आसीत्, तदन्यत्सर्वमतिक्रम्य नोऽवति स्म। विग्रहेषु, विशेषतो राष्ट्रियासु संयत्सु, यस्संभवी द्वेषः स नो न जघास।

गान्धिः सदैव नः पुरस्तान्मनसि च बभूव। अपरेऽपि च बभूवुः, मनुष्यसंख्यामतिवर्तमानाः। सख्यं च बभूव निस्संख्यैः नरैर्नारीभिश्च, येषां महद्भिर्लक्ष्यैर्महता नेत्रा च समन्वयेन स्वीयमौन्नत्यमुदकृष्यत। एतेषु च पूर्वतनेषु महापुरुषेषु मौलाना-आज़ाद् अप्येकः, वयसा यवीयान् किन्तु सदैव प्रौढतया ज्ञानवृद्धतया च गण्यमानः। अस्मत्समुद्यमे तस्य विशिष्टं स्थानमभूत्।

यस्य संस्कृतिसमन्वयस्य कृते भारतं सदा प्रयतमानमासीत्, तस्य अनितर-साधारणतया स प्रतिनिधिरासीत्। संकुचिता या राष्ट्रियपद्धतयः ततोऽस्मानेष बहिः प्रापयामास, दृष्टीर्नो विस्तारयामास च। स्वयमन्तरधिकं भिन्नमतयोऽपि यदेतावन्तः पुरुषाः प्रबलं मिथो बन्धमेकमपश्यन्, संभूय च स्वपरंपरां यावत् प्रायतन्त, तदाश्चर्यमेवासीत्।

२

क्रोऽयं भारतो नाम देशः? प्रश्नोऽयं पुनःपुनर्मे मनस्युदेति। मदीययैव अशिक्षितया रीत्या अस्य प्रश्नस्योत्तरमहं देशस्यास्य प्राक्तन्यामद्यतन्यां च स्थित्यामन्वैच्छम्। असच्चरित्रस्य ये प्रथमारम्भाः ते मामद्भुतरसेन परिपूरयन्ति। वीर्यवत्या बलवत्याश्च जनजातेस्स आसीत्कालः, यस्याश्च परिप्रश्नशील आत्मा, या च विशृङ्खलया जिज्ञासया प्रेर्यमाणा बभूव, यस्याश्च चरित्रम् अति-प्राचीनायामपि दशायां कस्या अपि परिपक्वाया असूयाहीनायाः सभ्यताया लक्षणानि व्यञ्जयामास। जीवयात्रामनिराकुर्वदेव, तद्धारान् तत्सुखानि च ऊरी-कुर्वदेव तत् सदा पार्यन्तिकं सर्वात्मकं तत्त्वं मृगयते स्म।

महतीं संस्कृतनाम्नीं भाषां निर्ममे। एतां भाषां, स्वीयां कलां, शिल्पं च द्वारीकृत्य स्वकीयं स्फुरत्प्राणं सन्देशं विदूरदेशेभ्यः प्राहिणोत्। उदपा-दयच्च उपनिषदः, भगवद्गीतां, बुद्धं च।

संस्कृतभाषया यत् प्राणभूतं कार्यं निर्वर्तितं, न तत् लोके कयापि भाषया कस्या अपि मानवजातेश्चरित्रे निर्वर्तितम्। न केवलमत्युदारायाः मतेः, अतिश्लक्ष्णस्य साहित्यस्य च सा भाषा प्रकाशयित्री बभूव, किन्तु राजतन्त्रेण भिन्नस्यापि भारतदेशस्य सन्धानग्रन्थिर्बभूव। रामायणं महाभारतं च परस्सहस्राः समाः, प्रतिसन्तति, कोटिशो जनानां जीवने ओतं च प्रोतं च। मुहुरहं विस्मयेनैवं व्यतर्कयं यद्यस्माकं जनजातिरेषा बुद्धम्, उपनिषदः, महान्ताविति-हासौ च विस्मरेत्, तदा कीदृशी सा भवेद् इति। सा निर्मूलिता भवेत्।

यानि अस्या आधारभूतानि लक्षणानि एषु महत्सु युगपर्ययेषु तामनवमुच्य सक्तानि, तस्याः प्रातिस्विकमुत्कर्षं च ददुः, तानि विनश्येयुः। न भारतो देशो भारतो भविष्यति।

३

क्रमेण ह्रासस्समजनि; बुद्धेः प्रत्यग्रताऽनश्यत्; सा पर्युषिता बभूव। यौवनस्य या प्राणवत्ता पुष्कलता च सा दुर्मुख्या जरायाः पदं ददौ। साहसोत्साहस्थाने निस्सारा पुनरुक्तप्रायाँ कांपि दैनन्दिनचर्यां बभूव। विशाला समुत्तेजिनी च यां विश्वदृष्टिः पूर्वं बभूव, सा प्रावृता, निरुद्धा, जातिभेदैः सामयाचारिकैरनुष्ठानैश्च नाशिता। तथापि भारतं तावत्सजीवमासीत्, यत् स्वजनतामहासमुद्रान्तरापततो विदेशजनप्रवाहान् तदात्मसादकरोत्। न च सर्वथा व्यस्मरत् तान् भावान् ये स्वयौवनोर्जस्विदशायां प्रेरका आसन्।

पश्चात् समापतितेन मुहम्मदमतेन मुसल्मानास्कन्दनेन च भारतं बलवत्परिवर्तितमभूत्। तदनु च पाश्चात्यसाम्राज्यान्यागतानि यानि दूरदेशेषु स्वानि स्वाम्यशासनानि स्थापयामासुः। नूतनमाक्रमणप्रकारं विदेशोपरि स्वाम्यं च तानि समानयन्, समानयंश्च तेनैव समं प्रत्यग्राणां भावानामुपमर्दम्, ऐरोपाखण्डे प्रवर्धमानां यान्त्रिकीं जीवयात्रारीतिं च। एतद्युगं द्राघीयसो व्यवसायस्यान्ते स्वातन्त्र्यलाभेन समाप्तिमगमत्। संप्रति अस्मदुपरि भूतकालनिसृष्टेन भारेण, तथा निर्मित्सितायां आयतेः प्रस्पन्दैः, संकीर्णैरुत्स्वप्नायितैश्च वयं भाविनं कालमभिमुखीभूय तिष्ठामः। या एताः कालदशाः तास्सर्वा अपि अद्यत्वे अस्मासु अस्मद्देशे च वर्तन्त एव। कार्यकारितया क्रोडीकृत्य व्यवस्थापिता शक्तिः बलं च अद्यतनयुगस्य लक्षणम्। अद्य भारते अणुतेजश्शक्तिविषयकस्य विज्ञानस्य वृद्धिर्वर्तते, तथा वर्तते च करीषयुगं च; एवमेकैकमपि युगमस्मद्देशे वर्तते। किञ्च वर्ततेऽत्रातिमहत् वैचित्र्यजातम्। एतस्य वैविध्यस्याधः किमपि ऐक्यमपि वर्तते। येन कालपर्यये दुर्जातेषु व्यापत्सु च सत्स्वपि अस्मज्जना एकतामापाद्य

संरक्षिताः। वैज्ञानिकयान्त्रिकप्रपञ्चे निमज्ज्य तथा नो ज्ञानं क्रोडीकर्तुं प्रयतामहे, यथा प्रकृतिशक्तयः उपर्युपरि तज्ज्ञानस्य वशीभवेयुः; परं तु न केवलमस्माकं दारिद्र्यमनभिवृद्धिश्च, संप्रदायागताः केचन भावा व्यवहारप्रकारा अपि अस्मानुत्कर्षन्ति। विज्ञानं यन्त्रं च विना नास्त्यस्माकमायतिः। तथैव यदि वयमस्माकं भूतं कालमुपेक्षामहे, अथवा विस्मरामः, तदास्माकमायतिर्गाधा शून्या तात्त्विकार्थविधुरा च भवेत्।

४

अतश्च अस्मत्कालस्य प्रक्षोभव्यामोहाभ्यामुभयमुखा वयं तिष्ठामः, अग्रे भविष्यन्मुखाः, पश्चाच्च भूतमुखाः उभयोरपि दिशोः कृष्यमाणाः। एतं च व्याघातं कथं शमयेम, कथं च धारणार्थं प्रक्रियां काञ्चन निष्पादयेम, यया-स्माकं न केवलं प्रापञ्चिकार्थाः पूर्येरन्, अपि त्वस्माकं मानसमात्मा च धार्येया-ताम्? कानि तानि प्रत्यग्राणि वा पुराणानि वा लक्ष्याणि, यानि वैविध्यभाञ्जि नूतनप्रपञ्चौचित्येन ऊहितानि नो जनानां पुरतः उपन्यस्येम? कथं च ते जनाः सजागराः, कर्मठाश्च यथा भवेयुः तथा तान् हठाद्व्यापारशालिनो विदध्याम?

सन्त्येवास्माकं समस्याविशेषाः भारतदेशगताः; किञ्च लोके याः प्रधानास्समस्याः तत्रापि भागिनो वयम्। लोकस्य चास्य सत्यामप्यतिमहत्या-मभिवृद्धौ स्वात्मनि विश्वासो गलतीव। अद्यत्वे च भारते युक्तमेव वयमेकाग्रा आर्थिकाभिवृद्धौ पञ्चवार्षिकयोजनासु जनानां च जीवयात्राप्रकारोन्नामकेषु महा-प्रयत्नेषु च। सर्वमेवैतत् अवश्यमेव, अभिवृद्ध्यन्तरस्य यस्य कस्यापि पूर्वा-पेक्षितं च। किन्तु कोऽपि सन्देहो अस्माकं मनो विशति किमेतदेव केवलं पर्याप्तम्? उत किञ्चिदन्यदप्यस्ति तेन सहाधिकतया योजयितुम्? यौगक्षेमिकं राज्यं प्रार्थनीयमेव लक्ष्यम्, किन्तु तदरसमपि भवेत्; यैश्च राज्यैस्तल्लक्ष्यं साधितमेव तैः प्रतिनवानि प्रश्नजातानि संकटानि च आविष्कृतानि, यानि आर्थि-काभिवृद्धिमात्रेण यान्त्रिकेण जीवनपरिष्कारेण वा न समर्थनीयानि। मनुष्यस्व-

भावस्य अत्यावश्यिकानां कासांचन एषणानां समर्पणे धार्मिकदैविकपारलौकिकश्रद्धाविशेषश्च प्रधानतया भागी बभूव। किन्तु तादृशस्य श्रद्धाविशेषस्य ग्रहणशक्तिर्दुर्बला जाता, विज्ञानस्य युक्तिवादस्य चाभिघाते तेन न प्रत्यवस्थातुं पार्यते। मतमावश्यकं वा न वा, जीवनसारवत्तासमर्पणाय अस्माकं संभूयावलम्बनाय च अर्हणीये लक्ष्ये श्रद्धा क्वापि आवश्यिकैव। दैनन्दिनजीवनस्य ये भौतिकाः कायिकाश्चार्थाः तानतीत्य कस्याप्युद्देश्यस्य प्रेक्षास्माकमावश्यिका।

सामूहिकवादः, सर्वसाम्यवादश्च एतामुद्देश्यप्रेक्षां दातुं प्रयतेते, किन्तु स्वीयानेव शपथप्रायान् हठाभिप्रायान् तौ पुष्यतः। सर्वसाम्यवादिनो ह्यद्यतनयुगे तत्त्वविचारका जाताः।

सर्वोऽपि समाजः किमपि सामरस्यमधिगन्तुं यतते। कदाचिदेतत् विग्रहद्वारा भवति, कदाचित् बुद्धिपूर्वमबुद्धिपूर्वं वा सामारस्यलाभार्थकेन प्रयत्नेन। यथाजातं वर्तमानः अपरिवर्तमानश्च समाजः प्रक्षुण्णायामेव रेखायां चरति। तद्द्वारा तस्य वर्तते सामरस्यं, किन्तु अनुदारे तले। प्रेरकशक्तिवेगाविष्टस्समाजस्तु प्रतिस्वं समाजे च तीव्रान् संस्कारान् जनयति। यदीदं तथ्यं स्यात्, येऽद्य लोके दृश्यन्ते तीव्रास्संभेदसंस्काराः, ते महतीं प्रगतिशक्तिं सूचयन्ति, सूचयन्ति च नूतनं सामरस्यमुद्दिश्य प्रयत्नं, मनुष्यसत्त्वे च कमपि नूतनमायामम्। एतद्ध्रुवमस्मद्धृदयमुपोद्बलयितुमुचितं, यदि नाभविष्यत् सततसन्निहितं भयम् अणुशक्तियुगीयानि आयुधानि मनुष्यजातिमेव समूलं नाशयिष्यतीति।

भविष्यदभिमुखैरस्माभिः सलक्ष्यं सश्रद्धं सवीर्यं च कार्यं कर्तव्यम्; तथैव यद्भूतकालादागतं तद्रक्षितव्यं, ततो धारका अंशा उपात्तव्याः। विपरिणाम आवश्यकः, परन्तु अनुस्यूतिरप्यावश्यिकैव। यद्भावि तत् भूते वर्तमाने च ये आधाराः स्थापिताः तदुपर्येव निर्मातव्यम्। भूतस्य निषेधे, ततस्सर्वथा विच्छेदे चास्माकं निर्मूलनमेव स्यात्; तदा निस्सारता शोषश्च भवेत्। गान्धेः एष गुणः यत्स नो जनसन्ततेः गुणाढ्येषु संप्रदायेषु अस्मदीयायां भूमौ च स्थिरं

प्रतिष्ठितचरणस्सन् विपरिवर्तभूमिकायां व्यवहरति स्म। अनाधुनिकान् वार्ता-शास्त्रन्यायान् स अभ्युपागच्छत्, सांप्रदायिकं कमपि विषयं स उपष्टम्भयामास, प्रतीपगमनशीलानि कानिचिच्छक्तिस्रोतांसि स प्रोत्साहयामास चेति चोदयन्तो बहवस्तं गान्धिं खण्डयामासुः। तथापि तत्कृतकार्याणां स्थूलं स्वरूपं विमृशन् सर्वोऽपि तेषां परिवर्तोदर्कतया विवशीक्रियेत। राज्यविषये वा सामाजिकविषये वा तस्य याः प्रवृत्तयः ता निरूपयतामस्माकं तेषामिदं विपरिवर्तात्मकत्वं न सुकरप्रत्यभिज्ञानं भवेत्, यतः संमर्दविषये पाश्चात्यवासनासंस्कृता वयम्। गान्धी त्वेतदबुध्यत—यथार्थः परिवर्तः जनतातः उदभवत्, न तु उपरितनेभ्यः, तेन च मुख्यतस्सामाजिकेनैव भाव्यमिति। गान्धितः पूर्वमग्रगण्याः बहवस्समाजपरिष्कारका आसन्; अल्पानां परिणामानां साधने, अथवा नूतनमतभेदालम्बिनामुत्थापने, ते समर्था आसन्। गान्धिस्तु रामराज्यप्रक्रियामुदाहरन् यथा जनैरपि किमापततीति न सम्यक् अधिगतम्, तथा कोटिशो जनगृहेषु विपरिवर्तमापादितवान्। न कदाचिद्वर्णव्यवस्थां स्वरूपतो धिक्चकार (यद्यपि चरमवर्षेषु किञ्चिदिदैतदपि अकरोत्); किन्तु अन्त्यजानामस्पृश्यानामुद्धारनिर्बन्धेन स सर्वथा वर्णव्यवस्थाया मूले कुठारमर्पयामास; एतच्च बुद्धिपूर्वं तत्प्रसूतीर्जानान एव अकरोत्। राज्यतन्त्रे स्वोपज्ञेन कार्यक्रमेण स कोटिशो जनान् स्फुरज्जीवौजसो व्यधात्, तान् निर्भयानकरोत्, तेषु आत्ममानमात्मविश्वासं चोदपादयत्। स्वत्वाधिकाररहितानां दरिद्राणां च जनानां विषये यच्चैर्भर्यमासीत्तस्य, तेन स बलादस्माकं मतीः समाजे सर्वसमभागितां प्रति व्यापारयामास। प्रायः कलहबुद्धिं परिवर्ज्य सर्वमेतत्प्रशान्तं रागद्वेषरहितं च समपादयत्। सर्वोपरि सत्ये प्रशमात्मक उपाये च निर्भरतां न्यधात्। सत्यं तस्य जीवितस्यैव आवश्यको धर्मो बभूव; यच्च प्रबलशक्तिमयं कार्यं स चकार तत्सदा सत्यानुगतमेव बभूव। तथा विदधानस्स भूते काले य आधाररूपा न्याया अस्मद्धारतजनतायाः समृद्धिकरा बभूवुः तेषां स्मृतीर्जनमनस्सु समुद्बोधयामास। एवं हि स प्राचीनाधारोपरि निर्ममे, तथा कुर्वाण एव तां निर्मिमिति भविष्य-

दुन्मुखीं चकार। तदीया वार्ताशास्त्रीयादिदृष्टयः काश्चित् आधुनिकाभिप्रायैस्सह न चतुरश्राः, अथवा ताः तात्कालिकीमेवार्थवत्तां बिभ्रति स्मेति यत् तन्न तं व्याकुलयति स्म। विपरिवर्तिनीनामवस्थानामनुरोधेन स्वात्मानमभ्यूहयितुं स सदैव सज्ज एवासीत्, यदि तत्र आधारभूतो विषयः साधुरासीत्।

भूतं वर्तमानेन, भविष्यता च सह स यथा समायोजयत्, तत्सदा मे अद्भुतं प्रत्यभात्। यतस्स एवं कर्तुमशक्नोत्, ततः स स्वजनान् विच्छेदं विना पदात्पदं पुरोगन्तुं विरोधमपि भूयसा वर्जयितुं च क्षमानकरोत्। अत्यन्तजीवित-भूतं यमुपदेशं स नः कृतवान्, अथवा वयं तेन स्मारिताः, स कर्मसु उपाय-कौशलं नाम। फलानि न कदापि स्वात्मना अलं, यतस्तानि तत्प्रापकैरुपायैः प्रतिपादितस्वरूपाणि भवन्ति। अस्मिन्न्याये तस्य गान्धेः कार्यकरणरीतौ वा यदि मूलभूतं तत्त्वं किमपि स्यात्, तदास्माभिरपि तदुपन्यस्ताधारोपर्यैव निर्मातव्यम्। नैतावता तदुक्तं वा तत्कृतं वा सर्वं यौथातथ्येन अनुसर्तव्यमिति तात्पर्यम्, यतस्तत् अस्माकं तदानीन्तनजीवदशायां कस्यांचिद् उचितमासीत्, न त्वधुनो-चितं भवति। परिवर्तमानपरिस्थित्यनुरोधेनास्माभिरपि स्वात्मविपरिणामः कार्यः, आधारभूता मार्गसूचका न्यायास्तु तथैव अनुस्यूततया भवितुमर्हन्ति।

५

राजकीयाक्रमणरूपेण इस्लाम्-मतं यदा भारतमाजगाम, तदा तेन विरोधोऽप्यानीतः। तस्य फलं द्विधा बभूव। एकतस्तद् हिन्दुसमुदायस्य यःस्वान्तस्संहरणरूपः स्वभावः तं पूर्वतोऽप्यधिकतया अवर्धयत्, अन्यतः कमपि नूतनम् अनिलागमं, नूतनान् भावांश्च आनिनाय, येन कारणेन कोऽपि प्रत्युज्जीवयिता प्रभावोऽपि बभूव। हिन्दुसमुदायः इयत्तया परिसमाप्तो भावनिकायो बभूव, यथा न बभूव भारतबुद्धेरेव प्रकृष्टं प्रसूत्यन्तरं बौद्धं मतम्। देशाद्ब-हिस्त आगता मुसल्मानाः स्वकीयमेव अवर्धिष्णु इयत्तया व्यवस्थापितं च मत-मानिन्युः। एवं च द्वे परिनिष्ठिते स्वात्मविश्रान्ते मते मिथस्संमुखीबभूवतुः।

नैकमपि परमुन्मूलयितुं स्वात्मसात्कर्तुं वा पर्याप्तशक्तिकमभूत्। राजकीयः पराभवः अधिविद्यमधिधर्ममधिदैवमाक्रमणं नानिनाय। प्राचीनो भारतीयः संप्रदायः, श्रद्धा च, अद्यापि प्रबलः स्थिरश्च, नूतनाभियोगस्य पुरः प्रत्यवस्थातुं शक्तो बभूव। स्वकीयेन बलवताभिप्रायेण सह मुसल्माना आगताः, अतश्च यथा ततः पूर्वं येऽभ्यागताः तानिव एतान् सुलभतया भारतेन नात्मसात्कर्तुं पारितम्। न चैतैरपि भारतीयजनतायाः प्रातिस्विको मनोभावो विपरिवर्तयितुं पारितः। एवं च भारतीये मध्ययुगीये काले इयमासीत् महती समस्या—कथं नाम स्वात्म-परिपूर्णे स्वस्वदृढरूढमूलयुक्ते इमे द्वे मते स्वस्थमन्योन्यभावमुपचिनुयातामिति। अकबरसदृशाः प्रेक्षावन्तो नृपाः ददृशुः यदि कोऽपि समन्वयप्रकारः स्याप्नेत तस्मिन्नेव आयतेः प्रत्याशा भवितेति।

प्राचीनभारतीयानां दर्शनं, विश्वजनीना दृष्टिश्च, अद्भुततया सर्वदृष्टि-सहिष्णुशीलं बभूव, तथापि बह्वीभिः जातिभिः उच्चनीचसमूहैश्च तान् विभक्तान् अकरोत्। मुहम्मदीयानां च इयं नूतना संकटावस्था अभिमुखी सञ्जाता—कथं नाम परैस्सह समतयास्माभिः स्थातव्यमिति। यत्र ते गता देशान्तरेषु तत्र तेषां विजयस्तथा सर्वंकषोऽभूत्, यदेषा समस्या न प्रादुरासीत्। किन्तुलोकेन सह तेऽभियुक्ता बभूवुः, तत्र गच्छन्तीष्वपि शताब्दीषु प्रश्नोऽयं न समाहितोऽभूत्। भारते मन्दंमन्दं समन्वयः कोऽपि उपाचीयत। किन्तु यावद् अयं समन्वयः परिपूर्येत, तत्पूर्वमेव अन्यादृश्यः प्रभावशक्तयो व्यापारिता बभूवुः। कर्मान्तमार्गेण वर्धिष्णवः पाश्चात्यजनसमुदायाः प्रबलीभवन्तः परोपरि स्वरूपत आत्मनि उत्कर्षं मन्वानाः स्वशासनाधीनान् अवमन्यमानाः पार्थक्येन अवर्तन्त। हिन्दूनां मुसल्मानानां चान्तरे यावान् पार्थक्यगर्तो यदा कदा वा बभूव, ततोऽपि महत्तरो बभूव मिथः शासकपाश्चात्यानां भारतीयानां च।

इदंप्रथमतया भारतदेशः विदूरस्थितविदेशेन स्वात्मसात्कृतः तच्छासन-क्रमाधीनो बभूव। प्रथमं ये भारताक्रमणाय भारतविजयाय च समाजग्मुः ते

भारतमेव स्वावासतयाङ्गीचक्रुः, न चान्यत्र बद्धदृष्टयो बभूवुः, मुख्येष्वंशेषु भारतीया एव ते जाताः। अद्य तु नूतनविधया किमप्याक्रमणमभवत्, यद्भारते रूढमूलं भवितुं नाशक्नोत्। एकतः आक्रान्तवताम्, अन्यतश्च प्रजानां—हिन्दूनां मुसल्मानानामन्येषां वा—मध्ये अनिर्भेद्यः प्राचीरो बभूव।

तथापि यः पाश्चात्यदेशीयो वैशाल्यशाली तत्त्वविचारः, ये च कार्मान्तिकपरिणामक्रमाः तेषां प्रभावेन भारतस्य मतिः जीवितं चाक्रान्तं बभूव। नूतना कापि राष्ट्रियभावना ववृधे, या विदूरवैदेशिकशासनस्य अनिवार्यतया विरोधिनी बभूव, स्वातन्त्र्यं च प्रार्थयामास, या च तथापि तस्यैव पाश्चात्यखण्डस्य भाषया, साहित्येन, पद्धत्या तदीययन्त्रमयजीवयात्राप्रक्रियया च क्रमेण अधिकाधिकमधिवासिता बभूव। इदं पाश्चात्यवासनाधिवासनं च प्रायो जनतायाः ये प्रमुखा वर्गाः तन्मात्रविश्रान्तं बभूव; यश्च प्रभूतो भागः सामान्यजनात्मकः स मूर्वतोऽप्यधिके दारिद्र्ये निममज्ज।

राममोहनराय आजगाम, येन प्राचीनभारतस्य नूतनमार्गाणां च कोऽपि समन्वयो मार्गितः। प्राचीनभारतीयतत्त्वविचारस्य या ऊर्जस्विता बभूव, तामेकदेशत आनाय्य आधुनिकनेपथ्येन प्रसाधयामास विवेकानन्दः। राज्यतन्त्रविषयकाः संस्कृतिविषयकाश्च प्रयत्नविशेषाः प्रारोहन्, ये गान्धेः रवीन्द्रनाथठक्कुरस्य च प्रादुर्भावे पर्यवसन्नाः।

ऐरोपाखण्डे सांप्रदायिकमतस्य आधुनिकविज्ञानस्य च कठोरस्समरो ववृते; क्रैस्तवः सृष्टिक्रमः वैज्ञानिकदृष्टिभिः सर्वथा सामरस्यं नाभजदेव। भारते तु आधुनिकं विज्ञानं तादृशं विरोधभावं नोदपादयत्। स्वमूलभूततत्त्वानां स्वरूपबाधं विनैव तद् विज्ञानं भारतीयदर्शनेन अभ्युपगन्तुं सुशकमभूत्। सामाजिकी व्यवस्थितिः परम् आधुनिकैः प्रसरैस्सह पदेपदे अघटमानमभूत्।

यथान्यत्र तथा भारतेऽपि द्वौ वेगौ अवर्धेताम्—राष्ट्रियभावनायाः प्ररोहः, सामुदायिकसमत्वसम्पादने त्वरा च। संभूयकरणवादः मार्क्सीयस्साम्यवादश्च

सामुदायिकसमत्वत्वराया अस्याः प्रतीकौ बभूवतुः। तयोर्वादयोर्यस्तत्त्वार्थस्स तिष्ठतु नाम, सामान्यजनानां तु हार्दी अभिरुचिरेतयोरुत्कटा बभूव। ऐरोपाखण्डस्य पश्चिमभागे यन्त्रायोजनप्रारम्भकाले या भीकरी सामाजिकी समवस्था आसीत्, तया प्राधान्येन मार्क्स्महाशयः प्रणुन्नहृदयोऽभूत्। तदानीं राष्ट्रस्य यथार्था जननायकप्रक्रिया कापि नासीत्, विधिपूर्वका विपरिणमाश्च दुष्करा एवाभूवन्। ततः परिस्थितिभेदाय परिवर्तमयी हिंसैव एकं मार्गं ददौ। ततश्च मार्क्सीयो वादः तीव्रं हिंसानुगतं परिवर्तमार्गमेवाभ्यचिन्तयत्। एतादृशः परिवर्तश्च ऐरोपाखण्डे संप्रदायसंप्रतिपन्न आसीत्। समनन्तरकाले तु तत्र राष्ट्रिया जननायकनीतिः प्रसृता, यया सह शमप्रधानो विपरिणामश्च संभावितोऽभवत्। महती वैज्ञानिकी कार्मान्तिकी च प्रवृद्धिरपि सञ्जाता, यया प्रापञ्चिकोऽभ्युदयः सर्वेषामेव हस्तमानीतः। ये मूलधनस्वामिनः तेषां कार्यप्रकारेषु संप्रति महान् विपरिणामस्सञ्जातः, यद्यपि तत्स्वरूपभूता अंशास्तथैव वर्तन्ते, व्यापारे तत्तत्स्वायत्तीकर्तुम् आर्थिकीं शक्तिं स्वेषु क्रोडीकर्तुं च प्रवणा भवन्त्येव ते। राज्यतन्त्रस्य सार्वजनिकता, कर्मकृतां नियमव्यवस्थितयः, सर्वस्योपरि समाजे सर्वस्यापि समभागितासंपादनेच्छा, वैज्ञानिकी यान्त्रिकी चाभिवृद्धिः, एतेन सर्वेण स्वामितायां दृश्यमानो विपरिणाम एष आपादितः। स्वामित्वप्रक्रियायामेव वर्तमानान् देशान् वयमद्य पश्यामः, यत्र सर्वप्रजासाधारणी जीवयात्रारीतेरुच्चता संपादिता वर्तते।

(नाशितस्वामित्वनीतौ) सोवियद्राज्यसमष्ट्यां च आर्थिकयोगक्षेमस्य महतीमभिवृद्धिं, यान्त्रिकवैज्ञानिकविस्तृतिं च पश्यामः, या देशान्तरापेक्षया स्वल्पेनैव कालेन साधिता। प्राधान्येन हिंसया संपादितमिदमिति वचनं न समीचीनं भवति। तन्त्रान्तरेष्वपि यावत्संभवं हिंसा अभूदेव। तथापि मन्ये, परिस्थितिविशेषस्य हेतोः, सोवियत्समष्ट्या अभिवृद्धौ हिंसाबाहुल्यमनभीष्टपुरुषनिष्कासनवधादिकं च समन्वितमभूत्। एतादृशायाः हिंसायाः प्रबलतया धिक्करः सोवियद्राज्यनेतृप्रमुखैरेव कृतः।

६

सर्वदेशीयपरस्परव्यवहारा अद्य पाश्चात्यराज्यानां कम्यूनिस्ट्-राज्यानां च मध्ये समुद्भूतेन विरोधेन, विशिष्य अमेरिक-राज्यसमष्ट्याः सोवियत्समष्ट्याश्च मिथ ईर्ष्यया, परं समाक्रान्ताः। तथापि सत्स्वपि आपाततो विरोधेषु, अनयोरतिमहतो राज्ययोराश्चर्यावहं साम्यमप्यस्ति। उभाभ्यामपि औद्योगिक-यान्त्रिक-नागरिकता उच्चकोटिं यावदभिवर्धिता; उभयोरपि वर्तते श्रद्धा यन्त्रस्य निरन्तरवर्धिष्णौ शक्तौ, तस्य मनुष्यसमस्यासमाधानशक्तौ च। उभयत्रापि जनताः सौहृदशीलाः, आतिथेयाः, शमासक्ताश्च। अद्यत्वे वस्तुतो भेदस्तु संपत्तिमतां देशानाम् अद्याप्यपर्याप्तसंपत्तिकानां देशानां च मध्ये भवति। य एतेऽनन्तरोद्दिष्टा देशाः तेषामयं बोधस्समायातः, यद् वैज्ञानिक-औद्योगिकप्ररोहेणैव पुरः प्रसारविशेषः साधयितुं शक्यः, या च उत्कटा प्रापञ्चिकी अस्वस्थता तान्बाधते ततः स्वान् मोचयितुं च शक्यमिति। तस्मै फलायैव ते यतन्ते, सिद्धिस्तु पूर्णा अपूर्णा वा भवति; कष्टं हि तत्कार्यं भवति। ऐरोपाखण्डे साक्षाद् राज्यपरिवर्तात् पूर्वम् आर्थिकव्यवहारेषु परिवर्तस्समजनि; अंतश्च यदा राज्यपरिवर्तस्समापतितः तदा अपेक्षिताः काश्चन सामग्र्यः आर्थिकपरिवर्तैः संघटितपूर्वा आसन्। आशियाखण्डे तु राज्यपरिवर्तः प्रथममागच्छत्; सद्य एव तमनुपतन्ती समागच्छत् सामाजिकसमुद्धारप्रार्थना, याम् आर्थिकदुस्थितेः सामग्र्यभावस्य च हेतोः पूरयितुं सुशकं नाभवत्। समृद्धिरहितानां देशानां समस्याः महता प्रमाणेन वस्तूत्पादनाय साधनकलापं प्रतिष्ठापितवताम् औद्योगिकधारारूढानां देशानां समस्याभ्यो विभिन्नाः। येन द्राघीयसा मार्गेण ऐरोपाखण्डः अमेरिकाखण्डश्च यान्त्रिकोद्योगपरिष्कारं प्राविशतां, तेनाध्वना एतैरद्याप्यसंपन्नैर्देशैर्न गन्तुमुचितमिति स्पष्टम्। प्रजानामुत्कण्ठाः पूरयितुं यदि न किञ्चिद्दीयते, सामाजिक उपमर्दो यो निरन्तरं वरीवर्ति तेन राज्याङ्गपरिस्थितिरधरोत्तरीक्रियेत। इदमपरम्-यद्यदधिकतया वस्तुजातमुत्पाद्यते तद्धस्राणाम्, उपरितनाभिवृद्धये नीवीत्वेन न्यासाय अवशेषणाय वा अवकाशमददतां प्रसभमभिवर्धमानसंख्याकानां प्रजानां संबाधः। एवं च पर्याप्त-

संपत्तिमनधिगतवतां दारिद्र्यहतानां च देशानामियं प्रथमा समस्या—कथं पुरस्ताद् भूयस्यै समुत्पत्तये नीवीनिर्माणाय चापेक्षिताः शिष्टोच्चयाः उत्पादिता भवेयुरिति। एतदर्थके एकैकस्मिन् प्रयत्ने प्रजोपर्येव पतितो भारः महत्तरो भवति; तथापि एता एव प्रजाः वर्तमानेभ्यो भारेभ्यो निवृत्तिं प्रार्थयन्ते।

बलात्कारमया उपायाः अवलम्बितुं शक्याः। किन्तु अन्ततो गत्वा विविच्यमाने, बलात्कारोऽपि जनतानां विषये न दूरं गन्तुं शक्नोति, यदि न स आयतिप्रत्याशया असहकृतः। एवं च, तत्त्वतः, प्रबलतरप्रयत्नोन्मुखतया प्रोत्साहनं सर्वथा देयं, साधयितुं शक्यं किमप्युद्देश्यं च जनतायाः पुरो निधेयं, येन तासामायतेराशा भवति। सा चायतिः न महति दूरे भवितुमर्हति। जनने-तृत्वलक्षणे समाजे एतादृश्या आशायाः प्रोत्साहनानां च समर्पणेन जनान् प्रबलतरव्यवसायार्थमुत्तेजयितुं या शक्तिः तस्यां सर्वमायतते; आयतते च प्रजानामवस्थायाः क्रमिके समुन्नमने।

असमृद्धेषु देशेषु भारतदेशः प्रायोऽन्येभ्यः सर्वेभ्यः समृद्धतरो भवति। गतेषु कतिपयेषु वर्षेषु, औद्योगिकायोजनार्थमपेक्षितमाधारं निर्मातुं कृषिपरि-ष्करणेन, विद्यारोग्ययोरभिवृद्ध्या च ध्रुवं पुरःपदमस्माभिर्निहितम्। परन्तु सर्वोत्कृष्टतया भारतस्य स्वातन्त्र्यमापादितवता राष्ट्रियव्यवसायेन व्यवस्थापितैः लक्ष्यैः विनयप्रकारैश्च समर्पितोऽधिको गुणो वर्तते। अद्यापि आशियाखण्डे राष्ट्रियभावनैव बलवत्तमा शक्तिर्भवति। अस्या भावनायाः अभिवृद्धिः स्पष्टैव। ऐरोपाखण्डेऽपि एषा क्रमेणाधिकं प्रकटा भवन्ती दृश्यते। फ़ासिस्ट्-नात्सी-रूप-एकाधिपत्यमन्तरेण अभवदेव घोरा सा राष्ट्रियभावना। तस्मिन् भये प्रतिहतेऽपि, तदपेक्षया मृद्व्याः, तथापि उद्धतायाः कस्या अपि राष्ट्रियभावनाया अद्यापि अधीनैव बहूनां राष्ट्राणां नीतिर्वर्तते। ऐरोपाखण्डे बहुषु देशेषु, लघुतरया मात्रया वा अधिकतरया मात्रया वा इयं प्रकटैव। इयं गतिस्तत्र ऐरोपाखण्डे स्वप्रतीपेन स्वराष्ट्रातिलङ्घिना ऐक्यात्मकेन गत्यन्तरेण सहभावेन वरीवर्ति, यस्य गत्यन्तरस्य प्रतिनिधित्वेन दृश्यन्ते सामान्यायाः

क्रयविक्रयभूमेः सामान्यानां बहूनां संस्थानां च अभिवृद्ध्यर्थं समादृतेषु प्रयत्नेषु ।

कम्यूनिस्ट्-देशेषु च राष्ट्रियभावना दृश्यत एव । सोवियत्समष्टिरपि मार्क्स्-महाशयस्य भावैः तदनन्तरसञ्जाताभिप्रायप्रभेदैश्च निकाममधिवासिता प्रबलं राष्ट्रियभावनांशं बिभर्त्येव । अन्येषु पौरस्त्यैरोपादेशेषु राष्ट्रियभावनाया वेगः विशदं एव । चीनेऽपि सर्वसाम्यंवादः राष्ट्रियभावनामेव आधारत्वेन धत्ते । यत्र यत्र सर्वसाम्यवादोऽनुष्ठाने वर्तते, तत्र तत्र तस्य बलम् अंशतो राष्ट्रियभावना-समन्वयादेवायाति । यत्र उभयम् असहयोगि वर्तते, तत्र सर्वसाम्यवादो दुर्बल एव, यद्यपि असमृद्धिमत्सु दारिद्र्यहतेषु च देशेषु, या वर्तते असन्तुष्टिः तद्रूपमयमादधाति ।

विदेशाक्रमणाधीना ये देशाः तत्र राष्ट्रियप्रेरणा अनिवार्यतया स्वातन्त्र्य-प्राप्तिसमररूपं गृह्णाति । प्रबलेषु स्वतन्त्रेषु देशेषु, सा किञ्चिदिव विदेशेषु प्रसरण-प्रवणा भवति, यद्यपीदं प्रसरणं प्रतिकूलैः प्रवृत्तिविशेषैः किञ्चिदिवोपरुद्धं भवति ।

७

एवं च ऐरोपाखण्डे अन्यत्र च यथा दृश्यन्ते तथा विपुलतरमैक्य-संपादनं प्रति याः प्रेरणा, सांप्रदायिकराष्ट्रियभावनाप्रतिनिधिभूताश्च याः केन्द्रतो विभिद्य विशकलीभावुकाः शक्तयः, एतयोरुपमर्दमद्य पश्यामः । महती वैज्ञानिकयान्त्रिकाभिवृद्धिः; विशेषतस्सञ्चारवार्ताधिगमोपायघटनाः विपुलतरैक्य-संपादनं प्रति बलवन्नयन्ति । आधुनिकजीवनाधारभूतवस्तुतत्त्वरूपं यद् विज्ञानं तदस्मिन् विषयेऽन्यत्र च अन्ततो विजयीभविष्यतीति सम्भावयितुं शक्यते । वास्तविकं भयं तु राष्ट्रियभावनाप्रयुक्तविरोधेभ्यो भवति, ये युद्धोन्मुखा भवेयुः ।

अद्य लोके यानि प्रधानानि राज्यस्थितिदर्शनानि तेषां परस्परमन-भिव्यक्तो युद्धमयो व्यवहारो यो दृश्यते, तेन ईदृशस्य विरोधस्य संभवो बहुली-

क्रियते। दर्शनानां परस्परभेदकल्पनाया अधःशयानं वर्तते महतां राष्ट्राणाम् अन्योन्यभीतानां राज्यीयं सापत्न्यम्। कम्यूनिस्ट्-देशानाम् अतथाभूतानां देशानां च मध्ये मौलिकाः प्रेक्षाभेदाः, तथा आर्थिकनीतौ स्वातन्त्र्यविषये राज्यस्वरूपे च भेदाः वर्तन्ते। लेशतोऽमी भेदाः ह्रासमुपगताः, प्रायः क्रमेणेतोऽपि ह्रासशीला भवेयुः, एतयोर्यदन्तरं विस्तृतमगाधं च भाति, तच्च संकोचमियात्। दर्शनविशेषेण मानवजीवनप्रक्रिया विपर्यासिता भवतीति न; वैज्ञानिकयान्त्रिकाभिवृद्धिर्हि निरन्तरं सामाजिकीनामार्थिकीनां च परिस्थितीनामाकारान् वर्तयति। उपयोगः कर्म च रूपमभिनिर्वर्तयति। एवं वास्तुशिल्पे वर्तते; अन्ततो गत्वा सामाजिकपरिस्थितिष्वपि इदं तुल्यमेव, तस्याः परिस्थितेः स्वरूपमर्थक्रियाकारितामनुसरति। अर्थक्रियाकारिता च निरन्तरं विज्ञानेन यन्त्रेण च विपर्यस्यमाना दृश्यते। ततः सामाजिकपरिस्थित्या च अवशाद् एतासां नूतनानामर्थक्रियाकारितानामानुरूप्येण स्वात्मानं विपरिणमयन्त्या भाव्यम्।

एवं च सांप्रतिकजीवनक्रमे सारभूतो विपरिवर्तापादकश्च अंशः न दर्शनविशेषो भवति, किन्तु यान्त्रिकाभिवृद्धिः। यत्र कर्मान्तविपरिणामो मन्दः, तत्र प्राचीनपरिस्थितिरूपमनुवर्तते। स्वल्पाभिवृद्धिकः पृष्ठवर्त्येव यः समूहः, तस्य रूपं परिस्थितिश्चापुरोगाम्येव भवति, आधुनिकवैज्ञानिकयुगेन सह तस्य समूहस्य योजनं न सहते। जीवयात्रायाः तात्त्विका अर्थाः न प्रतिषेद्धुं शक्याः, आगन्तव्यमेव विपरिणामेन, स्वपृष्ठपातिभिः फलान्तरैस्सह। स च विपरिणामः कदाचित् सपदि संपद्यमानः अधरोत्तरकारी च जातः; किन्तु अन्यथापि, मन्दवेगेनापि, ते विपरिणामा आयान्त्येव।

जननायकराज्येषु, यत्र तरुणस्य सर्वस्य वागस्ति, यत्र च जनसभानिर्णीयमानं शासनं प्रवर्तते, अर्थक्रियाकारितायाः तथा परिस्थितिरूपस्यापि कियदिव विपरिणाममापादयितुमुपायः परिकल्पितोऽस्ति। किन्तु चिरात् सुप्रतिष्ठितानि परिस्थितिरूपाणि रूढमूलाश्च स्वत्वभावनाः विपरिणामं तावत्कालमुपरुन्धन्ति यावता कालेन वस्तुगत्या स विपरिणामो हठादेव तेषामुपरि

पात्यते। आधिदैविकम्, आधिवार्तिकम्, आधिसामाजिकं वा तद्भवतु, यत् परिनिष्ठितं तत् सततं विपरिणामरोध्येव भवति।

८

जीवितं नाम विपरिणामिनामवस्थाविशेषाणामानुरूप्येण घटमानतया निरन्तरं योजनम्। राजकीयायाः आर्थिक्याः सामाजिक्याः एकैकस्या अपि व्यवस्थितेरस्ति कोऽपि नियमप्रकारः। अस्ति मतसम्बन्धी नियमः, समयाचारस्य च, अत्र चान्तर्भवति सदाचारविषयकः आध्यात्मिकश्च विनयप्रकारः। अर्थ-क्रियाकारितासु व्यवस्थितिषु च विपरिणमन्तीषु, प्राचीना नियमप्रकाराः दुर्बला भवन्ति, क्रमेण च ते नूतनानां नियमानां स्थानं ददति। गतायामर्धशताब्द्यां संवृत्तस्य यान्त्रिकविपरिणामस्य रंहसा सामाजिकपरिवर्तस्य आवश्यकता संप्रति भूयस्तरीकृता; सततमसमीचीनैव संघटना संभूता। प्राचीने काले जीवितं सरलतरमासीत्; प्रकृत्या समवेततरं च; आसीदवकाश आलोचनस्य ध्यानस्य च। अद्य तु जीवितं क्रमशो भूयसा जटिलीभूतम्; निष्पन्दं मननं क्रमेण न्यूनीभवति। अवकाशे वर्तमानेऽपि, तदा किं क्रियतामिति जनो न जानीते।

विश्रामावकाशः कथमुपयुज्यतामिति एषा समस्या क्रमेण समृद्धिसंपन्नेषु देशेषु प्रमुखतामासादयति, यद्यप्येषा भारतदेशं संप्रति न आयासयति, न वायासयिष्यति उत्प्रेक्षागोचरायामायत्याम्। प्रकृतितो व्युच्छिन्नस्य भूयसा यन्त्रोपायपराधीनीभूतस्य जीवितस्य रसो नश्यति, अर्थक्रियाकारि तद्भवतीति संवेदनेनापि तत् त्यज्यते। सदाचाराध्यात्मनियमा भिद्यन्ते अभिनिवेशनाशो-ऽनुपतति, जायते च भावना सभ्यतायामस्माकं किमप्यवद्यमस्तीति। केचन प्रकृतिं प्रति निवर्तनं वदन्ति, प्राचीनकालिकं सरलतरं जीवितं प्रति च। किन्तु तादृशे जीविते यो वा को वा गुण आसीत्, स्फुटमेतत् यन्न कापि प्रतिनिवृत्तिः शक्या, अतो जगदेव विपर्यस्तम्। प्रत्यक्तया कोऽपि मनुष्यः सन्न्यासं स्वीकुर्यात्, जीवितांच्च प्रव्रजेत्, किन्तु न क्षममेव जनसमुदायेन

केनापि सामस्त्येन तथा कर्तुम्। जीवितस्य यथावत्तत्समस्याभिस्तत्सङ्कटैश्च साकमभ्युपगमनं यत्, तदाधारीकृत्यैव जनसमुदायो भवितुमर्हति, तादृशं च जीवितं यावच्छक्यं सार्थकं च कर्तुमर्हति। यद्येवं न करिष्यति, तन्नङ्क्ष्यत्येव।

वैज्ञानिक्यान्त्रिकाभिवृद्ध्या जगतः प्रायः सर्वा आर्थिकसमस्याः समाधातुं शक्या इति, विशिष्य जगति सर्वत्र एकैकस्यापि जीवनाय मौलिकं यद्यदपेक्ष्यते तद्दातुं च शक्यमिति निश्चयस्साधितः। प्रतिजानाति चैषा अभिवृद्धिः उदात्ततरजीवितप्रकाराः सांस्कृतिकाभिवृद्धिमार्गाश्च कालेन भविष्यन्तीति। सर्वयोगक्षेमसंपादनोद्देश्या या राज्यप्रक्रिया, या वर्गविभागविहीना च समाजप्रक्रिया, एते संप्रति न केवलं सामूहिकवादनिष्ठाया एवोद्देश्यभूते किन्तु प्रातिस्विकस्वत्वोच्चयनीतिनिष्ठितानामपि देशानाम्, यद्यपि सरणिरुभयत्र भिद्यते। एवं मौलिकानि उद्देश्यानि परस्परमासन्नतराण्यागच्छन्ति, उपायभेदेनापि तानि उद्देश्यानि अधिगन्तुं शक्यन्ते। उपायाश्चैते न केवलं केषुचिद् युक्तिवादेष्वायतन्ते, किन्तु आयतन्ते ते तस्य तस्य देशस्य जनसमुदायस्य च भौगोलिके, ऐतिहासिके, धार्मिके, आर्थिके, सामाजिके च सन्निवेशविशेषे, संस्कृतिप्ररोहप्रकारे च। यः कोऽपि यथार्थः परिवर्तः स हठादध्यारोपयितुं न शक्यः; स तु स्वयंप्ररोही भवितुमर्हति। देशविशेषः, तत्रापि प्राचीननागरिकतासंपन्नः, भूते सुरूढदीर्घमूलो भवति; स च महान्तमपायं विना नोद्धर्तुं शक्यते, यद्यपि तत्रत्या असत्यभूताः नालप्रायाः प्ररोहाः अपकारावहजीर्णाचारव्यवस्थारूपा उत्खातुं शक्याः, उत्खातव्याश्च। यथा च प्रकृत्या किमपि सामरस्यं प्रतिष्ठाप्यते, तच्चानिष्टापत्तिमन्तरा न सद्यो विपर्यासयितुं शक्यते, एवमेव च जनसमुदाये देशे च प्राचीनजीवितपद्धतीनां सद्यो विपर्यासनं न सुकरं, न वा कर्तव्यतया इष्टम्। समस्यायाः कस्या अपि एवंविधं समाधानम् उत्कटतराः पूर्वतोऽपि कष्टतराः समस्याः प्रति अस्मान्नेष्यति।

एतच्च गोचरयति अस्माकं जीवयात्रास्पदीभूतं बाह्यं प्रपञ्चम्; मनुष्याणामाभ्यन्तरं जीवितं तु ततोऽप्यधिकतया गोचरीकुरुते। ये प्रायो यथाजाता

असंपन्नसंस्काराश्च जनसमाजाः तानधिकृत्य क्रियमाणेषु अभ्युद्धारव्यवसायेषु इदं सुष्ठु विदितं, यद् विपरिणामार्थं अतीव सहसा क्रियमाणः प्रयत्नः अत्यनिष्टोदर्कतया पर्यवसित इति। संस्कारसंपन्नास्समाजाः सहसापतितेन विपरिणामेन न तथा बाध्यन्ते। परन्तु अप्रेरकप्रयायिणां यन्त्राणां युगे आगामिनि आकाशयात्रायुगे च कीदृशाः जीवशरीरेष्वेवान्यत्र च विपरिवर्ताः संभवेयुरिति न कोऽपि वेत्ति।

बाह्ये विषये यद्येवं स्यात्, तत इतोऽपि महत्तराः विपरिणामाः मनुष्यस्य मनसि, भावेषु, आत्मनि च नूनं संभवेयुः। अद्य, इदंप्रथमतया मनुष्यचरित्रे मनुष्येण स्वव्यवहारेषु स्वव्यवस्थासु च विपरिणामं नित्यसिद्धसहचरतयाभ्युपगम्य जीवितव्यं भवति। यत्सत्यं समापतता विपरिणामेन सह समानवेगतया तेन न गन्तुं पार्यते; विज्ञानयन्त्रोत्पादितानि करणानि उपयुञ्जानोऽपि नैव तान्यवबुध्यते। सर्वांशसामञ्जस्येन समष्टीभूता यथा पुरुषाः संपद्येरन् तथा तानभिवर्धयितुं, समाजे उपयुक्तान् व्यापारान् यथा युवानोऽनुतिष्ठेयुः यथा च संभूयक्रियमाणे जीवितव्यवसाये ते भागिनो भवेयुः तथा तान् सज्जीकर्तुं च विद्याविनय उद्दिष्टः। तस्मिंश्च समाजे प्रत्यहं विपरिवर्तिनि, कथं सज्जीक्रियतां, किं लक्ष्यीक्रियतामिति दुर्बोधं भवति। अत्यन्तं यन्त्रनिष्ठा या समाजसंस्कृतिः, ये च प्राचीनाः सामाजिकजीवितप्रकाराः, तदाधारभूतं च यदध्यात्मदर्शनं, एतयोर्मध्ये सामरस्यं नास्ति। प्रकृत्या सह संबन्धो विपरिवर्तते, स्वात्मना सह संबन्धोऽपि विपरिवर्तमनुभवति। यन्त्रमये समाजे पुरुषगौरवं ह्रासं गच्छति। प्रत्येकः पुरुषः जनतायां नष्टात्मा भवति; केवलं समुदायस्य सर्वस्य अनवरतं सामाजिक-आर्थिक-अभिवृद्धिं लक्ष्यीकृत्य परिकल्पितायां जटिलायां कस्यांचित् व्यवस्थितौ क्रमेण किमपि करणत्वमुपगच्छति।

प्रत्येकस्य पुरुषस्य परिपोषं स्वातन्त्र्यं च भूयसा वयं बहुमन्यामहे। एतं च परिपोषक्रमम् उपकुर्वन्ति अथवा उपघ्नन्ति तत्तत्प्रेक्षाप्रयुक्ताः दृष्टिप्रकाराः। किन्तु यन्त्रमयता नाम प्रत्येकस्य आत्मनः गौरवापचये प्रबलतमं कारणं भवति।

९

वेगतः समापतितानामेषां यान्त्रिकपरिवर्तानां फलानि पश्यामः, विशिष्य बालेषु बालिकासु च संप्रति। यूनां प्राप्तवयस्कानां च मध्ये या परस्परप्रतीपता तया पितरः, विद्याधिकारिणः समाजसेवासक्ताश्च व्याकुलिताः। वृद्धैरूरीकृता आचरणप्रक्रियाः नाद्याभ्युपगताः; प्राचीना साध्वाचारमर्यादाः तिरस्कृताः। काष्ठागतानां केषाञ्चन विषये स्तेयाभिघातादिकं, मद्यपानं, तत्तन्नाशनोत्साहः; कामुकता—इत्येतत्प्रावण्यं दृश्यते, दृश्यते च जीवितमन्तरेण कर्तव्यमुद्योगमन्तरेण च श्रद्धावन्ध्यता सर्वानभ्युपगमशीला निषेधबुद्धिश्च। निरन्तरविपरिवर्तमये प्रपञ्चे, किमपि अस्ति भविष्यतीति प्रतिज्ञाया निश्चयस्य चाभावे, जीवितसुखास्वादप्रधानाः प्रक्रियाः बलवदाकर्षन्ति। राष्ट्रियसंस्कृतेः अनुस्यूतेरापदायाति, समाजस्य शकलीभावप्रसितता च प्रकटा भवति।

इयमत्युत्कटसंभावनाप्रयुक्ता दृष्टिस्स्यात्, यच्चाद्य संभवति तस्य नेदं न्याय्यं तोलनं भवेत्। किन्तु नात्र कोऽपि सन्देहः यदेता वस्तुगतयः वर्तन्ते; वर्तन्ते च भारतापेक्षया अपर्याप्तामिवृद्धिकदेशान्तरापेक्षया च अधिकतया अभिवृद्धेषु प्राप्तसंपत्तिषु च समाजेषु। तथापि तासाम् अवधारणं मुख्यं भवति, यतः तादृशानां वेगानां बाधा अस्माज्जीवितेऽपि संभविष्यति। स्यादेवम्—एतत्सर्वं तरसोपगतसङ्क्रमणयुगस्य अवश्योदितं फलं भवति; संस्कृतेरेव नूतन आधारः, यन्त्रेण सह घटमानः, क्रमेण निर्मितो भविष्यति, भविष्यति च तेन सह नूतनाः प्रेक्षाः, प्रतिनवाः संभूयजीवितप्रकाराः, जीवितस्यैव विशालतरं दर्शनम्।

किमयं वर्तमानमधिकृत्य अतिनैराश्यप्रयुक्तोऽभिप्राय इति न जाने। भारते वा लोके वा संभवद्भिर्व्यतिकरैर्मयि समुत्पादितः संस्कारस्तु न नैराश्यमयो भवति, कापि श्रद्धा, विभक्तुं व्याख्यातुं वा मम न क्षमा, आयतिविषये प्रत्याशया मां पूरयति। भूयसा मे प्राप्तस्य सुदिष्टस्य स्यादेतद् कारणात्। भारतीयजनानां महत् प्रेमैव उत्कृष्टतमं मे भाग्यं संपन्नम्; किन्तु यदाहं देशान्तरं गतः तदापि

सर्वत्र जनेभ्यः सौहार्दं हृदयाह्लादकराणि प्रत्युद्गमनानि च प्रापम्। एवमहं अस्मज्जनेषु महत्प्रेम, श्रद्धां चोपाचिनवम्, देशान्तरजनान् प्रति च गौरवबुद्धिं प्रीतिं च। यद् ददाति कोऽपि, तत्स प्रतिगृह्णाति इति मया साक्षात्कृतम्। प्रीतौ समर्पितायां सा बहुगुणिता प्रत्यागच्छति; यदि द्वेषः, तदा तं प्रतिलभामहे। सर्वत्र जनाः शान्त्यै, सौमनस्याय, सहयोगाय चोत्कण्ठन्त इति मया दृष्टमनुभूतं च। यद्येतदेवं, यथाहं विश्वसिमि, तदा विग्रहात्सहयोगं प्रति, युद्धचिन्तातः शान्तौ कर्तुं शक्याः कृतीरुद्दिश्य च कार्यस्रोतसो निवर्तनं शक्यं भवितुमर्हति।

भयं नाम, मन्ये, प्रायोऽत्युत्कटमघं भवति, यतो विरोधो हिंसा च भयादेव उत्पद्येते। हिंसा भयस्यैव प्रतिफलनं भवति, एवमेव चानृतम्। अस्माकं प्राचीनेषु ग्रन्थेषु अभिहितम्—दानेषु उत्तमं दानम् अभयदानमिति। भयविरहितः पुरुषः वस्तूनि समीचीनया दृष्ट्या प्रेक्षितुं, मनःकर्मणोः विभुमपि ऐक्यमपि संरक्षितुं शक्नोति। अद्य भयं विश्वं व्याप्नुवद्, अवलोक्यामः महत्तमानि बलिष्ठानि च राष्ट्राणि भयेन बाधितानि। धनं बलं च भयांशं न केवलं न तनूकुरुतः, प्रत्युत तं साक्षाद् वर्धयतः। वीतरागान् लोकोत्तरपुरुषांश्चापहाय न केनाप्यस्मासु मुक्तसर्वभयेन भवितुं शक्यम्। किन्तु एतम् उद्देशं पुरो धारयितुं तत्साधने प्रयतितुं चास्माकं शक्यम्। गान्धिना भारताय दत्तेषु इदमेव उत्कृष्टतमं जनेषु भयात्मकस्य भावस्य लघूकरणं नाम।

अभयाद् दया क्षमा च भवति। बुद्धं यदा स्मरामः तदा तदीयानुकम्पास्मान् आक्रम्य विवशयति; अशोकं यदा स्मरामः अद्भुतस्तदीयोऽद्वेष एव संकुचितेभ्यो मतेभ्योऽस्मान् अभ्युत्कर्षति।

राष्ट्रान्तः, मिथो बहूनां राष्ट्राणां मध्ये च, जनजातिं मतं श्रद्धाविशेषं समाजविभागं चान्तरेण सज्ञातैर्विग्रहैः लोकः परिपूर्णः। एषां विग्रहाणां निषेधो वा अवगणना वा अपार्थो भवति, परन्तु उपसर्तुम् अस्माकं ते शक्याः,—न विग्रहद्वारा, किन्तु सान्त्वमार्गेण येन ते समापयितुं शक्याः।

१०

सार्वराष्ट्रिकदृष्ट्या विश्वशान्तिरद्य प्रधाना समस्या भवति। यानि महान्ति संकटानि, ये च कलहा अस्मान् व्याकुलयन्ति तेषां समाधानमस्यामन्तर्भवन्ति। समाधानं कथमेष्यति इति न मयैतत् वक्तव्यम्। किन्तु एतस्य समाधानस्य अधिगमाय कीदृशमुपायं वयमुपादद्महे, केन प्रथा प्रचरामश्चेति मनसि नः स्पष्टं निर्धारणीयमस्माभिः। इदं मुहुरुच्यते यदद्य वरणार्थं द्वयमेवेदं वर्तते—प्रायः सर्वेनाशास्पदं युद्धम्, एतेषां प्रश्नानां किमपि सान्त्वपूर्वं समाधानं च। एते एव यदि वरणकोटी, तदा किं वरणीयमिति स्पष्टमेव। तस्मिन् वरणे कृते, इदमायाति यद् लोके परस्परमनस्तापवर्धकानि सर्वाणि वर्जनीयानीति। स्थिरनिश्चय एषोऽस्माभिरभ्युपगन्तव्यः यदद्य युद्धं सर्वथा बहिष्कार्यं, यतो नैव तत् प्रतिजानीते जयं वा तदुद्भवानि फलानि वा। ततः युद्धोपकण्ठे वासः, तत्प्रान्तवर्तित्वव्यवहरणं वा ज्ञानाभाव एव भवति। यद्यप्यस्माकमभिप्रायभेदो मिथो भवति, तथापि कोपाविष्टानि खण्डनानि धिक्करणानि च परिहरणीयानि; लोकस्य अर्धो भागो दुष्टो दोषाक्रान्तो वेति येन केनापि जनगणेन यद् वचनं तदपार्थमिति अस्माभिरवधेयम्। प्रत्येकधनस्वाम्यतन्त्रस्य प्रपञ्चस्य वा, सार्वजनिकस्वाम्यतन्त्रस्य प्रपञ्चस्य वा खण्डनं सुकरम्; किन्तु यद्येतयोरुभयोः बहवोऽपकर्षाः सन्ति, उभयोरपि महान्तो गुणाश्च सन्ति; सत्स्वप्यान्तरपरस्परविरोधेषु उभावपि एकस्यामेव दिशि प्रसरतः, उभावपि विज्ञानयन्त्राभिवृद्ध्यधीनव्यवहारा एव भवतः। एकैव गतिरस्ति-अद्य लोकं यथास्थितमभ्युपगत्यास्माभिः परस्परं क्षान्तिः उपचेया इति। परस्परव्यावर्तकानां मतानां ये प्राचीना विग्रहाः ते घोराणामायोधनानामनन्तरं क्रमशोऽशाम्यन्त, नूतना काऽपि क्षमा उपारुरोह। परस्परस्पर्धिनोः आर्थिकसामूहिकवादयोः मध्येऽपि क्षमा न प्ररोढुमर्हतीत्यत्र नास्ति किमपि कारणम्। अन्ततो गत्वा, साक्षाज्जीवयात्रासंबन्धिन्यौ यां वस्तुस्थितयः तद्वशौ तन्निर्णीतौ च वादावेतौ भविष्यतः। अन्येभ्यस्तत्तदधिजग्मुषः, न तु ततः कस्यापि हठारोपणमभ्युपगच्छतः, एकैकस्य देशस्य स्वीयेनैव

प्रकारेण स्वात्मानमभिवर्धयितुं स्वातन्त्र्यं भवितुमर्हति । अनया रीत्या एकैकापि दृष्टिः दृष्ट्यन्तरोपरि स्वप्रभावं प्रदर्शयिष्यति, स्वयं च दृष्ट्यन्तरस्य प्रभावमनुभविष्यति ।

राष्ट्रियभावना नाम जनानां निरामयोऽभिकाम्यश्च भावो भवति । उपरुद्धा सा तीव्रं वेगमुपजनयति । किन्तु अतिमहत्या प्रभुत्वशक्त्या समन्विता चेत्, सा भवेत् परप्रधर्षिका अतिमर्यादं स्वदेशाभिमानशीला च । अद्यतनयुगीना राष्ट्रियभावना विदेशीयाक्रमणकारिणाम् आधिराज्यानां जात्युत्कर्षभावनानां च प्रतिकाररूपेणोपजाता ।

बहुषु देशेषु अद्यापि स्वजातीयभावना विभिन्नैः प्रमाणैर्वैरीवर्ति, किन्तु सा प्रायेण धिक्कृता । केवलं दक्षिणाफ्रिकाराज्ये सा राष्ट्राभ्युपगतशासनदर्शनत्वेन वर्तते । एषा घोरं विरोधस्यास्पदं भवतीति स्पष्टम् ; अत्यन्तहेयरूपेण अन्याक्रमणेनाविष्टा सती, सा अवश्यमतिकटुं मनःखेदम्, अतितीव्रं प्रतिक्रियावेगं च जनयिष्यति । साक्षादभिघातरूपेण मार्गेण निर्णेतव्य एष विरोध इति यदवस्थापनं तदगतिकतया उपात्तो मन्त्रो भवति ; किञ्च तदनुस्यूततयानीतानि विपत्तिमयानि फलानि भवन्ति ; जातीयभावनाविषये तद्विरोधी लोकाभिप्रायः तथा बलवान् भवेत्, यथा न कस्मिन्नपि देशे जनसमूहे वा तस्याः प्रवादः आचरणं वा कर्तुं शक्यं स्यात् ।

यं कं वा प्रकारं गृह्णत् परदेशाक्रमणरूपमाधिराज्यं चाद्यतनजगति सर्वथा अनवसरं भवति ; भवति च तद् विरोधबीजम् । बहुषु प्रदेशेषु तदद्यापि वर्तते, तत्प्रयुक्ता प्रेक्षा च बह्वीः बुद्धीः प्रभावयति । किन्तु तन्मतं धिक्कृतं सर्वत्र स्वसमर्थनव्यग्रं तिष्ठति । एवं च या सार्वलौकिकी नीतिः सा जातीयभावनायाः परदेशाक्रमणस्य च परिसमाप्तिसमानयनाय, तत्तद्राष्ट्रस्य स्वस्वदिष्टस्य स्वयमभिनिर्वर्तनस्वातन्त्र्यदानाय च भवितुमर्हति । कतिपयेषु देशेषु एतत् व्यवस्थानाशं व्याकुलीभावं च जनयेत् ; किन्तु तत् सङ्कुचिततया स्यात्, विस्तृतान् प्रदेशान् न व्याकुलयिष्यति, किञ्चित्कालानन्तरं प्रायः स्वात्मानं

समीचीनयिष्यति च। एतदेवासमीचीनम्, आपदुदर्कं च भवत्यद्य, यद् एकस्य देशस्य देशान्तरोपरि स्वकीयाध्यवसायं हठादारोपयितुं प्रयतनम्।

भूते काले तद्धेतवो ये वा के वा भवन्तु, अद्य तु युद्धार्थं पैरैमैत्रीबन्धः मानसिको युद्धव्यवहारश्च अभयनाशाय युद्धभयाय च कल्पेते। देशानां स्वस्थतया अभिवृद्धिं वारयतः, लोकवातावरणं च दूषयतः। युद्धवासनामयो व्यवहारो यावद् वर्तते, तावदन्योन्यं क्षमा न भविष्यति। असंपन्नवृद्धीनां देशानामभिवृद्धये तज्जीवितगुणस्य उत्कर्षापादनाय च साह्यमकृत्वा, तत्स्थाने युद्धोपयुक्ता एव गणनाः व्याप्रियन्ते; प्रायश्च जनानामनभीष्टानि प्रत्यग्गतीनि च राज्याङ्गविधानानि उपष्टभ्यन्ते, एवं चाभयाभाव एव भूयः बहुलीक्रियते।

लोकस्य कष्टानि, विग्रहाः, दुराग्रहाश्च इन्द्रजालेन केवलश्रद्धोक्तिभिश्च निवारयितुं शक्यन्त इति सूचना तु वस्तुस्थित्यस्पर्शिनी भवति। किन्तु तत् सर्वथा वस्तुस्थित्यवगाहि स्यात् यदि परस्परद्रोहवासनाः शिथिलीकर्तुम्, अन्ततो युद्धसंभवं वारयितुं च कार्यक्रमः कोऽपि अभ्युपगमार्थमुपस्थाप्यते। अयं कार्यक्रमो मुख्यतः स्वानुरूपाभिः आर्थिकीभिः राज्याङ्गविषयिकाभिश्च नीतिभिरनुसृतः कोऽपि प्रतिनवो बौद्धस्समाधानमार्गो भवति। पञ्चशीलम्, अथवा पञ्चन्यायाः,—यदधिकृत्य एतावद् बहूक्तम्—, एतं मार्गमर्पयति; किन्तु बुद्धेरात्मनश्च यदि परिवर्तो भवेत्, तदैव सरणिरेषा तथ्या भवेत्, न तु निरर्थकशब्दविनिमयमात्रेण। शान्तिर्नाम न युद्धतः कायिक उपरमः, किन्तु सर्वस्मिन्नपि लोके शान्तिमयस्य वातावरणस्य निर्माणार्थं प्रयतनम्।

## ११

भारते सार्वदेशिकेषु व्यवहारेषु इयमेव नीतिरस्माभिरनुसर्तुं प्रायत्यत, अद्यापि सदा तथा कुर्वन्तो वयं सफला अभूमेति नाहं वक्तुं शक्नोमि। अन्ततो गत्वा, विदेशविषया नीतिः राष्ट्रस्य स्वाभ्यन्तर-अवस्थासु कार्यप्ररोहेषु चायतते। अतश्च लोकव्यवहारेषु कार्यकरी भूमिका कापि अस्माभिर्निर्वोढव्या चेत्, तदा

आभ्यन्तरी वृद्धिरावश्यिका। इतोऽपि यत्सत्यं सा वृद्धिः अपेक्ष्यतेतरामस्माकमेव क्षेमाय।

प्रथमपञ्चवार्षिकयोजनातः परं, द्वितीययोजनायाः प्रथमवर्षद्वयानन्तरं च, बह्वीषु दिक्षु निश्चिता अभिवृद्धिरस्माभिः कृता, यासु काश्चन स्फुटाः, अन्या न तथा प्रकटाः। वृद्धिक्रमः यथास्माभिरिष्येत तथा कतिपयासु दिक्षु न त्वरिता जाता, किन्तु अस्माभिः सर्तव्यमिदं, यत् सा वृद्धिः सारवती सार्था च संपन्नेति। कृष्यां व्यापारोद्योगे च सा वृद्धिः प्रकटा; अन्ततो गत्वा अस्यामेवास्माकमायतिरायतेत।

अस्या अभिवृद्धेर्विद्याभ्यासो मूलम्; अद्य च आधारभूतशिक्षां प्रति, यान्त्रिकशिक्षां प्रति च बहु अवधानं दीयते। पाठशालाया महाविद्यालयस्य च पाठ्यक्रमान् कोटिशो बाला बालिकाश्च अधीयते, लक्षशश्च विश्वविद्यालयेषु यान्त्रिकशिक्षास्थानेषु च शिक्ष्यन्ते। एताश्च संख्या भारतीयप्रजासंख्यासु एकदेश एव, बहु कर्तव्यमवशिष्यते च। तथापि एताः संख्या उच्चा एव भवन्ति। पाठशालातः महाविद्यालयतश्च बहिरागच्छन्त एते स्वजीवितविषये नूतनां कामपि प्रेक्षामावहन्ति। एवं च शनैः, किन्तु अनिवार्यतया; सामूहिक्यः अस्माकं व्यवस्थितयः विपरिणमन्ति। महान् प्रायो महाविपरिवर्तकरः परिणामः स्त्रीणां विद्याभ्यासेन सम्भूतः। एता एव बालिकास्तरुण्यश्च भारतीयानां जनानां सर्वस्मिन्नपि जीविते कमपि संस्कारमाधाय्य क्रमेण च तत् विपरिणमयिष्यन्ति। सद्यस्तु विपरिणामा एते ग्रामापेक्षया भूयसा नगरेषु महानगरेषु च वृत्ताः, किन्तु अस्मद्ग्रामा अपि एतैश्चालिताः। कतिपयेषु वर्षेषु आधारभूतशिक्षाक्रमः पाठशालागमनयोग्ये वयसि तिष्ठतः सर्वानपि व्याप्स्यति।

अद्यतनविद्याक्रमं प्रति विमतिर्भूयसी उक्ता; तस्य केषांचनांशानां खण्डने प्रायस्सर्व एव वयं भागिनः। तथापि तत्त्वमिदं स्थिरं तिष्ठति यद् विद्या जवात्प्रसरीसरीति, अस्मज्जीवफक्किकां विपरिणमयति च।

अस्ति च प्रजासंख्याप्रयुक्ता समस्या। लोक एव विश्वत्र विशेषेण व्यक्ता प्रजासंख्याया वृद्धिस्सञ्जाता, अनया वृद्धिधाट्या, अस्याः शताब्द्या अन्ते लोकप्रजासंख्या ३५०–५०० कोटिमध्ये भवेदिति प्रतीक्ष्यते। क्रि. २००० वर्षावधौ भारते एषा गणना ६०–६८ कोटिमध्यपातिन्यो भवन्ति। वृद्धिधारां कयापि मात्रया यदि वयं निग्रहीतुं शक्नुमः, तदा एषा संख्या अधमपक्षतः ६० कोटिर्भवेदिति प्रतीक्षामहे।

अस्यां प्रजावृद्धौ द्वावंशौ वर्तेते। तत्रैकोऽस्माकमत्यन्तं विचारगोचरं, यद् एषास्माकमार्थिकाभिवृद्धिमार्गे विघ्नायते, यच्चैषा अन्यासु दिक्षु यद्यपि वयमभिवृद्धिं भजामहे तथापि अस्माकं जीवितमात्रां नीचतायामेव स्थापयति। अंशान्तरं तु एषा अतितीव्रा लोकप्रजावृद्धिः लोकस्य उपकरणानां, व्यापारोद्योग-द्रव्याणां च भयंकरेण वेगेन घस्मरा भवति। अस्मिन् विषये यदि निखिलो लोकः, यथा अमेरिकराज्यसमष्टिः तथा व्यवस्यन् वर्तेत, तदा प्रायेण एतस्याः शताब्द्या अवसान एव यावन्ति अवश्यभूतान्युपकरणानि लोकेऽद्य उपलभ्यन्ते तानि कवलीकृतानि स्युः। किन्तु नूनं नैतत् संभवेत्; देशान्तरेषु द्रव्योपयोगवेग इतो मन्दतरो यद्यपि स्यात्, तथापि उपलभ्यमानानि उपकरणवस्तूनि कतिपय-वर्षशतकान्यतिरिच्य न भविष्यन्ति।

एवं फलितं कार्यद्वयमापतति—एकम्, अस्माभिः प्रजाभिवृद्धिधाटी निरो-द्धव्या; अन्यत्, जीवितोपकरणकृते अन्य उत्पादकोपायाः अन्यानि वस्तुजातानि च अस्माभिर्मार्गितव्यानि। कदाचित् अणुशक्तिवृद्धिः अन्यान् उत्पादकोपायान् दास्यति। भारते प्रजावृद्धिनिरोधे वयं नितान्तं व्यग्राः, अयं च विषयः न केवलं मुख्यस्सञ्जातः, किन्तु आत्ययिकश्च।

## १२

नस्यस्माभिर्यायें आधारभूते द्वे वस्तुतत्त्वे स्तः। एकं विज्ञानयन्त्रद्वारा केषुचिद्राष्ट्रेषु अतिमहती वस्तूत्पादकशक्त्यभिवृद्धिः, तन्मूलं धनं प्रभुत्वं च।

अन्यत्—धनिकानां प्रभुशक्तिमतां चैषां राष्ट्राणामनधिगताभिवृद्धीनां राष्ट्राणां च मध्ये वर्तमानो महान् व्यतिरेकः। अयं भेदो वर्धिष्णुर्भवति ; वस्तुतः गतेषु कतिपयेषु वर्षेषु सोऽतीव विस्तारं गतः, सत्स्वेव प्रयत्नेषु अप्राप्ताभिवृद्धीनां राष्ट्राणां स्थितिमुद्धर्तुम्। यदि यथावत्प्रवृत्ताभ्यः आर्थिकीभ्यः अन्याभ्यश्च वस्तुगतिभ्यः स्वं व्यापारप्रक्रमं पूर्णं प्रदर्शयितुमवसरो दीयते, तदा धनिकानि राष्ट्राणि धनिकतराणि प्रबलतराणि च भविष्यन्ति, अन्यानि तु राष्ट्राणि आधारभूताः स्वकीया अपेक्षा अपि पूरयितुं कृच्छ्रगतानि क्लेशमनुभविष्यन्ति। येषामस्ति, तेभ्योऽधिकतरं दीयते। एकस्य राष्ट्रस्य अन्तरेव अधिकतया अभिवृद्धाः प्रान्ताः इतरप्रान्तापेक्षया अधिकतराभिवृद्धिमधिजग्मिवांसो भवन्ति।

एतत्फलतया विरोधाः युद्धभयं च मिथो राष्ट्राणामुत्पद्यन्ते ; अनभिवर्धितेषु राष्ट्रेषु च सामाजिकः क्षोभः स्यायते। एकतः शक्तिर्धनं च सापल्यविग्रहयोर्मूलं भवतः। अन्यतो दारिद्र्यं दुःखं चापि विनिपातान् प्रति विग्रहान् प्रति च नयतः। उभयमपि भये शङ्काकुलतायां च पर्यवस्यति। अतिशयितस्य धनस्य प्रभुत्वस्य वा एकत्रैव समुच्चयः नावहति अभयम्, लोके व्याप्रियमाणानां वस्तुगतीनां समीचीनं संवेदनं विहन्ति च। ततः एते भेदाः राष्ट्राणां मध्ये वा एकस्य राष्ट्रस्याभ्यन्तरे वा, शिथिलीकर्तव्याः।

आणवस्य युगस्य याः समस्याः ता ह्यस्तनलोकीयैः संप्रतिपन्नैः मार्गैः न समाधातुं शक्याः। राज्यतन्त्रे वा वार्ताविषये वा न ते सांप्रदायिका अभिप्रायाः अभीष्टपूरकाणि फलानि सुवते। सार्वराष्ट्रिकेषु व्यवहारेषु भयद्वेषसहयोगितया मानसिकं यद्युद्धं प्रवर्त्यते तस्य प्रज्ञाहीनतां पश्यामः, यत् एतन्मानवजातेरपायानधिकीकरोति, न च समाधानं नेतुं शक्नोतीति स्पष्टमेव। अणुशक्तिपरीक्षाः क्रियन्त एव, एकैका एतादृशी परीक्षा सांप्रतिकीनाम् आगामिनीनां जनसन्ततीनां च अपायभूतानि फलानि धत्ते इति प्रवरेषु विज्ञानशास्त्रिषु अस्मान् बोधयत्स्वेव। तत्किमित्येता अद्यत्वेऽनुपयुक्ताः नीतय अनुस्रियन्ते यासु न युक्तिरस्ति, न वा हेतुः, दूरे धर्मः। सद्यः सर्वसंमत्या च सर्वा अणुपरीक्षा

अवसाययितुं क्रमेण शस्त्रसंचयं ह्रासयितुं च निर्णयो भवितेति प्रतीक्षते जनः। एकतरेण पक्षेण कार्यारम्भो भयेन वारितः स्यात्; परन्तु उपपत्तिद्वारा उभयपक्षाभ्युपगता व्यवस्थितयः साधयितव्याः, या एकैकस्यापि राष्ट्रस्य हिताय भवेयुः।

एषैव युक्तिः आर्थिकेषु वादेषु गमनिकासु च प्राप्नोति; भूयसा महाजनदारिद्र्यबहुले, तदपेक्षया अतिस्वल्पसंख्याकैः समृद्धिमद्भिः अनुकूलदशापन्नैश्च राष्ट्रैर्युक्तेऽस्मिन् लोके येऽनिवार्यतया निविष्टा अपायाः तेषां न किञ्चिदपि वेदनं भवति। अपर्याप्तसमृद्धिकानां राष्ट्राणां स्वमात्राया उत्कर्षापादनं यद्यात्ययिकतया कार्यं, तथैव समृद्धतरै राष्ट्रैः स्वार्थदृष्ट्यैव एतत्कार्यसंपादनक्रमस्य शीघ्रता अवश्यकर्तव्या भवति। अधुनातन्यः समस्या एता नूतनलोकसंबन्धिन्यो भवन्ति, प्राचीनलोकसंबन्धिनामुपायानां प्रयोगेण न समाधेयाः।

लोके सामाजिकाभिवृद्धेः महत् प्रातिकूल्यं यथा भवति तथा अतिगरिष्ठा धनसञ्चयाः शस्त्रनिर्माणार्थं यद्व्ययीक्रियन्ते तदतिकरुणं भवति। अन्योन्यप्रतिपत्तये मार्गे प्रकटे, भयमयम् उपपत्तिवैधुर्यमयं च वातावरणं यदनुबध्नाति तदितोऽपि करुणतरं भवति। प्रतिपत्तिः साङ्ग्रामिकदृष्ट्या न भवति, यया दृष्ट्या अधिकतरं भयमेव अधिकतरा अविस्रंभनिबिडतैव च भवतः। नाहं यं कमपि विशिष्टं देशमपराधिनमभिशंसामि, यतः अधिकया वा न्यूनया वा मात्रया, सर्व एव देशा एतेन भयमयेन वातावरणेन ग्रस्ताः, ततः न च सर्वात्मना स्वान् मोचयितुं प्रभवन्ति। अस्माभिः कर्तुं शक्यमेतावदेव यत् परराष्ट्रैस्सह आस्माकीनेषु अनुबन्धेषु एतादृशं वातावरणं यावच्छक्ति विपर्यासयितुं प्रयतनम्।

प्रातिस्विकस्वत्वमयस्य युगस्य प्रारम्भकाले,—वस्तुतः संप्रत्यपि भूयसा—वस्तूत्पादने प्रभूततमं नैर्भर्यं निहितम्। तदा तदावश्यकताभूत्। परन्तु वस्तूत्पादनमात्रेण समस्यानां नः समाधानं वा, सुखं वा, सन्तोषो वा न भवतीति क्रमेण व्यक्तमभूत्। संपदे, लाभाय, उपर्युपर्यधिकाय धनाय च या तृष्णा सा दोषमुत्पादयति, ईर्ष्यां कलहं च जनयति। कस्मिन्नपि जनसमुदाये,

विशाले लोके वा, उद्देश्यतया यदि सामाजिकमवैषम्यं लक्ष्यीक्रियते, न वस्तूत्पादनं स्वत एवैतत् साधयति। वस्तुतः तत् भूयस्तरवैषम्योत्पादनप्रवणं भवति। ततः उत्पादितस्य अवैषम्येण विभजनं, तस्य समीचीन उपयोगः, इत्येषा प्रधाना समस्या भवति। अन्ततो गत्वा 'कथं जीवयात्रा विधेया, कथं नाम जीवितं स्वस्य कृते समाजस्य कृते च यावच्छक्यं सफलीक्रियताम्' इति ज्ञानमेव अपेक्षितं भवति। मनुष्यसंबन्धिनीः गणनाः धार्मिकान् प्रश्नान् वा अपहाय प्राकृतिकन्यायानामेव केषांचित् किमपि विवरणं भवति वार्ताशास्त्रमिति नेतः परं गणयितुं शक्यते।

१३

बृहत्तरा एता विचारणीयांशा आभीक्ष्ण्येन मया उद्दिष्टाः, यतस्तेभ्यः पराङ्मुखीभावो दुष्करः, प्रभावश्च तेषामसद्राष्ट्रान्तःपातिषु प्रश्नेष्वपि भवति। परंपरागतैर्भावैर्वैयं तथा स्यूताः यथा नः समस्यानाम् अद्यतनीयसङ्गत्या परिशीलनं दुष्करं भवति। दारिद्र्यं नाम अधोगतिः, तस्मान्मोक्ष एव तस्य व्यक्तः प्रतीकारो भवति। सति दारिद्र्ये स्वातन्त्र्यविषयिणी वार्ता प्रायो व्याघातदुष्टा भवति। अत्यन्तं दुष्टमिदं, यद् दारिद्र्यस्य स्वस्य सनातनतामापादयितुं शीलं वर्तते। प्रत्युत मर्यादातिक्रान्तं धनं संपत्तिश्च, कस्यामपि व्यक्तौ वा कस्मिन्नपि समाजे वा, स्वनान्तरीयकान् दोषान् बिभ्रतः, ये दोषा अद्यत्वे प्रकाशीभवन्ति। प्रापञ्चिकसंपदः केवलं समुच्चयः मनुष्यस्य आभ्यन्तरे जीवने कामपि शून्यतामापादयेत्।

सामूहिकराज्यनिर्वाहमार्गो नूनमार्थिक एव मार्गः, किन्तु स उक्तान्यंशान्तराण्यपि परिगणयितुं यतते। संपत्तेः, तथा अवैषम्येण विभजनस्य च प्रापकत्वेऽपि, सामूहिकवादेऽयमपायो वर्तते, यत्स जीवनस्य केभ्यश्चिदर्थगर्भेभ्योंऽशेभ्यः प्रच्युतो भवेत्। प्राधान्येन हेतोरेतस्मादेव व्यक्तिगतं नैर्भर्यम् अवश्यनिधेयं भवति।

भारते अद्यतन्योऽस्माकं समस्याः मुख्यतः आर्थिकीमभिवृद्धिं जीवनमात्रासमुत्कर्षं च विषयीकुर्वन्ति । समाजस्य सामूहिकनिर्वाहप्रक्रियया निर्मापणमस्मदुद्देश्यमिति बुद्धिपूर्वमस्माभिर्निर्धारितम्; यद्यपि तस्याः प्रक्रियायाः सुपरिच्छिन्नं लक्षणमस्माभिर्न कृतम् । चतुरश्रतया लक्षणकरणस्य परिहारोऽपि, मन्ये, एषणीयो भवति, यतस्तानि लक्षणानि अर्थशून्यतया आम्रेड्यमानप्रवादघोषणरूपेण परिणमनप्रवणानि भवन्ति । ये प्रवादा यानि घोषणानि च त्वरितं विपरिणतिमुपेयुषि प्रपञ्चे वैशारद्येन विचारणं विघ्नन्ति । अस्पष्टताया अतिरेकोऽपि फलवत्कार्यकरणमुपरुणद्धि । अतः निश्चितान्युद्देश्यानि, तानि कथं प्राप्याणीति विशदं ज्ञानं च भवितुमर्हन्ति ।

पूर्वं मया सूचितम्—यत् एकैकेनापि देशेन बाह्यतो हठाध्यासं विना अभिवृद्धिरधिगम्या । साह्यमुपदेशश्च प्रत्युद्गम्ये, बाह्यतोऽध्यारोपस्तु निरामयतया वृद्धिं वारयति, परस्पराघातं च जनयति । ततः एकैकस्यापि देशस्य स्वां नीतिं स्वरूपतो निर्धारयितुं स्वातन्त्र्यमनुमन्तव्यम्, न चेत् ततो यावत्संभवं देशान्तराणां हिंसा । नास्मासु कस्यापि तत्त्वं मदीयमेवेति स्वैकाधिकारिता भवतीति, यदस्माकमनुरूपं भवेत् तदन्येषामन्यास्ववस्थासु वसतां नानुरूपं भवेदिति च अस्माभिरभ्युपगन्तव्यम् । अस्माकमनभिरुचितैर्बहुभिर्विषयैस्सह लोकेऽस्मिन् अस्माभिर्वस्तव्यमित्यपि अभ्युपगन्तव्यम्; अस्माकमाचरणमात्रेण नीतिमात्रेण वा, अन्यैस्सह मैत्रीपूर्वेण सहयोगेन च यदस्माभिः परोपरि स्वशक्त्याधानं कर्तुं शक्यते, तन्मात्रमेव कार्यमस्माभिः । अद्य परस्परसंघर्षेण प्रवृत्तानां प्रेक्षाणां मध्ये महति भेदे सत्यपि, सादृश्यांशाः बहुलीभवन्तीति, वस्तुस्थितिश्च ताः आसन्नतरा आनयति चेति श्रद्दधेऽहम् । यदि भयं न भवेत्, बिभीषिकाः हठात्कारश्च नोपयुज्येरन्, एष संगमनक्रमः त्वरितो भविष्यति । अर्थात् राष्ट्राणां मध्ये राज्यतन्त्रक्षेत्रे आर्थिकक्षेत्रे वा स्थूलदृष्ट्या यथास्थिता परिस्थितिः अङ्गीकर्तव्या । समाधानापेक्षिण्यस्समस्याः शान्तिमयैरुपायैस्साधयितव्याः ।

एकस्मिन्नेव राष्ट्रे अन्तःकलहा वर्तन्ते। किन्तु कोऽपि भेदो भवति, यत् तरुणानां सर्वेषामेवाधिकारदायिन्यां जानराज्यंप्रक्रियायाम्, एते कलहाः यथाक्रमं राज्यनिर्वाहार्थमुपकल्पितैरेव न्यायमार्गैस्समाधातुं शक्यन्ते। प्रायेण मतसंबन्धिनः कलहा न भवन्त्यद्य। यद्यपि जनजातिप्रयुक्ता समस्या वर्तत एव, तथापि तत्प्रयुक्ता विग्रहाः लोकस्य कतिपयेष्वेव स्थलेषु संकुचिता भवन्ति। प्रान्तीयभावनया भाषाभिमानेन वा प्रयुक्तानां विग्रहाणामतिशोकावहानि प्रेक्षणकानि भारते नः प्रवृत्तानि। किन्तु मुख्यतः अद्य समस्योत्थापकास्तु विषयाः तत्तज्जनवर्गाणां मध्ये प्रातिस्विकानामर्थानां मिथो विरोध एव; एषु च विषयेषु परम्पराप्ररूढाः स्वार्थाभिनिवेशाः नोन्मूलयितुं सुकराः। तथापि भारते दृष्टमस्माभिः यद् प्रबलाः पारंपरिकस्वार्थाधिकाराः, यथा प्राचीनानां राज्ञां महतां भूस्वामिनां च, प्रशान्तैरुपायैस्समाहिताः, यद्यपि एतेन कतिचिद्विशिष्टाधिकारवतामनुकूलतया चिराय सुप्रतिष्ठिता व्यवस्थितिः विशीर्णा। अतः यद्यपि वर्गीयो विग्रहोऽस्तीत्यस्माभिरभ्युपेयम्, तथापि तस्यास्माभिः प्रशान्तैर्मार्गैः अपरिशीलने नास्ति कोऽपि हेतुः। मार्गास्तु ते फलवन्तस्तदैव भविष्यन्ति यदा समीचीनं जनतया स्पष्टं प्रतिपन्नं च लक्ष्यं वयं गोचरे निदध्महे।

## १४

प्रातिस्विकतयाहमेवं मन्ये यद् नेतः परमद्यतनयुगस्य अनुरूपो भवति लिप्साप्रधानस्समूहः, यः प्रातिस्विकस्वाम्यप्रयुक्तस्य नयस्य मूलं भवति। पूर्व्यस्य युगस्य सः अनुरूपः स्यान्नाम; नूनं प्रातिस्विकस्वाम्यनयस्य महान्तो लाभाः तत्प्रशस्तये सन्ति; तथापि लोकस्तां दशाम् अतीत्य उपरि गतः। लोकोऽद्य सुतरां जटिलः संकुलश्च; प्रायोऽन्योन्यस्य गृहद्वारे वयमुपविष्टाः। ततो नवीनानां गतीनामवस्थानां च अनुरूपतरा, न एतावत्स्पर्धाकुला, किन्तु इतो महत्तरं सहयोगमावहन्ती कापि उच्चतरा व्यवस्थितिः अस्माभिर्निष्पादनीया। अन्ततोऽनया विश्वैकराज्यस्थापने पर्यवसातव्यम्। तदैवेदं संभवितुं शक्यं

स्यात्, यदा अन्येषां विषयेष्वप्रविश्य स्वेच्छानुरूपं स्वाभिवृद्धिमभिनिर्वर्तयितुम् एकैकस्य राष्ट्रियसमूहस्य स्वातन्त्र्यमयं वातावरणं भवेत्।

लाभाभिप्राये कृतप्रतिष्ठः सञ्जिघृक्षाप्रधानः समूहः प्ररोहशीले नवलोकेऽस्मिन् अनुचितः प्रतिभाति; नैतावता प्रेरकैः फलोद्देशैर्न भाव्यमित्यर्थः। प्रोत्साहकानि सदैवावश्यकानि भविष्यन्ति, यद्यपि तानि अर्थलाभमात्रपर्यवसानि न भवेयुः। नूतनव्यवसायार्थं, नवनिर्माणार्थं, साहसकार्यार्थं च य उत्साहः सोऽस्माभिरुत्तेजनीयः, येन अस्माकं जीवितस्य सारवत्ता अमन्दता च दत्ता भवेत्। प्रातिस्विकव्यवसायस्य विस्तृतं क्षेत्रं भविष्यत्येव, किन्तु तेन व्यवसायेन भिन्नया रीत्या प्रवर्तितव्यम्, न तु केवलं सञ्जिघृक्षारूपया रीत्या। भारते विलम्बेन वयं व्यापारोद्योगपरिवर्तात्मिकां दशां प्रविष्टाः स्मः। तस्मिन् काले वयमेतत् कृतवन्तो, यस्मिन् लोकस्य केचन भागाः प्रेरकरहितगत्वरयन्त्राणाम् अणुशक्तेश्च युगे वर्तन्ते। एवं, फलतः, एतयोर्विपरिवर्तयोर्द्वयोरपि सममेवास्माभिः प्रवर्तितव्यं भवति, अयं च महान् भारो भवति। न केवलं न्याय्यं हितं चेति, किन्तु अस्माकमार्थिकसमस्याः समाधातुं गत्यन्तरं नास्तीति हेतोश्च, सामूहिकोद्योगनयमभ्युपगतवन्तो वयम्। कदाचिदुच्यते—त्वरिता अभिवृद्धिः शान्तिमयैः जनतासंमतिपूर्वैश्च मार्गैर्न संभवति, प्रभुत्वपूर्णा बलात्कारमयाश्च मार्गा आश्रयितव्याश्चेति। इमामुक्तिं नाहमभ्युपगच्छामि। वस्तुतः अद्य भारते जनतानुमोदनप्रधानान् मार्गान् हातुं यदि कोऽपि प्रयत्नो भवति, स उत्सादाय कल्पेत, ततश्च अभिवृद्धेः सद्यः संभाव्यमानतां नाशयिष्यति। दीर्घकालदृष्ट्या च प्रातिस्विकपुरुषस्य गौरवे, तस्य यावच्छक्यं स्वातन्त्र्यदाने च श्रद्धालुरस्म्यहम्, यद्यपि अन्योन्यानुस्यूततया जटिले समूहे परपीडाभीतेः कारणात् स्वातन्त्र्यस्य सङ्कोच आवश्यकः।

अस्माभिरूरीकृतमतिमहत्कार्यं महत्या जनतायाः सकाशात् परिपूर्णं सहोद्योगमपेक्षते। स सहयोगो नागमिष्यति, यदि तैरङ्गीकर्तुं योग्यं, तेभ्यः फलानि च प्रतिजानत् लक्ष्यं किमपि न वयं पुरत उपक्षिपामः। अस्माभिः

अभ्यर्थितो विपरिणाम; अस्माकं जनानामुपरि भारानावश्यकतयानयति, तेषामपि जनानामुपरि ये लेशतोऽपि भारानेतान् वोढुं न शक्नुवन्ति। आत्मनः कानपि लाभान् य आनयेत् तादृशस्य जनसमूहस्य निर्माणे वयमपि भागिन इति यावत्ते नः साक्षात्कुर्वन्ति, तावत्तैर्भारा एते नाङ्गीकरिष्यन्ते, न च ते दास्यन्ति पूर्णं सहयोगम्। 'स्वच्छन्दतया व्यवसायः' इति यदुच्यते स नास्माकं जनसङ्घ-सामान्यस्य कदापि हृदयमावर्जयेत्। मौलिकतया यानि प्रधानानि ततो व्यतिरिक्तानां कार्याणां कृते मुहुरस्माकं वस्तूत्पादनोपकरणानामुपयोगे स पर्यवसास्यति। अर्थात् अतिशयेन लाभदृष्टेः स्वार्थमुपयोगः प्राप्नोति, यस्यां दृष्टौ प्रातिस्विकस्य पुरुषस्य प्रयोजनबुद्धिर्भविष्यति, न तु सर्वस्य समूहस्य।

समूहे सर्वस्याप्यवैषम्येण तत्तत्प्रतिपादनं साम्यं च जगति संप्रति बलवत्तमा प्रचोदना भवति। प्राचीना प्रभुत्वप्रधाना या व्यवस्थितिः सा स्वल्पसंख्याकानां भूमिस्वाम्ये, अन्येषां संशयग्रस्ततया जीवने च प्रतिष्ठिता अभूत्। तां व्यवस्थां न कोऽप्यधुना अनुमोदते। तथैव संप्रत्यपि प्रचरन्तीनां बह्वीनां व्यवस्थानां जनग्रहणशक्तिः नष्टा; न च ताः जनानां मतिगत्या विज्ञानाभिवृद्ध्या वा घटन्ते।

## १५

यत्कार्यमस्माकं संमुखं वर्तते, तद् उपलभ्यमानानामुपकरणानां संभवता श्रेष्ठतमेन पथा यथा उपयोगो भवति, यथा राष्ट्रियः प्रयत्नोऽस्मल्लक्ष्यं प्रति च प्रेरितो भवति, तथा सावधानतया योजितं सुविमृश्य निर्धारितं च मार्गमपेक्षते। चित्रमेतत् यद् अस्मिन् वैज्ञानिके युगेऽपि सन्ति केचन जना येषां वैयक्तिकलाभ-मेव प्रधानं प्रयोजनं बिभ्रतः प्रातिस्विकप्रयत्नस्य यादृच्छिके मार्गे संप्रत्ययो भवति।

अस्मद्द्वितीयपञ्चवार्षिकयोजनाया मध्ये वर्तामहे; तृतीया योजना पुरतोऽस्माकं परिवर्तते। तादृशीं दशां वयं प्राप्ताः स्मः, यत्र योजनयानया साक्षात्प्राप्याणि लक्ष्याणि तत्प्राप्त्युपायश्च निर्धारितरूपेण उपन्यस्तव्यानि।

तृतीययोजनाया अन्ते यथास्मद्राष्ट्रपतिना लोकसभामिभाषणे निर्दिष्टं तथाशास्महे—अस्माकमाधारभूतानामुद्योगानां, कृषिप्रभवाणां ग्रामाभिवृद्धेश्च विषये आयतौ या प्रवृद्धिः तस्याः सारभूतं मूलमुपनिहितं भवेत् इति। तृतीययोजनान्ते सर्वा नस्समस्याः समाधास्याम इति न प्रतीक्षामहे, तदनन्तरागतानि बहूनि पञ्चवार्षिकयोजनान्तराणि भविष्यन्ति; किन्तु दारिद्र्यरूपस्य विघ्नस्यास्य भेदने लक्ष्यं बध्नीमः, अस्माकममिवृद्धिन्यूनता स्थायिनी मा भूदिति। यथाऽहं श्रद्धधे, तथा एतस्मिन् कार्ये यदि सिद्धाः स्याम, ततस्त्वरितरेण क्रमेण वयं पुरो गमिष्यामः, इतो न्यूनतया च पराधीनाः स्याम।

तच्च महान्तं भारमावहेत्, किन्तु ततः पलायनं नास्ति, यदि अस्मल्लक्ष्याण्युद्दिश्य शीघ्रमभिगन्तुं वयं तत्त्वतः श्रद्धालवः कृतनिश्चयाश्च।

नातिचिराद्भतेषु मासेषु भूस्वाम्यं प्रति केचन निर्णया अस्माभिरुपात्ताः, ये कांश्चनाक्षेपान् जनितवन्तः। यदा गरीयान् कोऽपि सामूहिकः परिवर्तो भवति तदा नान्तरीयकतया भवन्तं जनवर्गेषु मिथःकलहमत्र पश्यामः। इममपि कलहं प्रशमेत्त सहयोगेन च समाधास्यामह इति अहं निश्चिनोमि, यथा एतादृशा अन्ये विग्रहाः पूर्वमस्माभिः समाहिताः।

अस्मद्ग्रामजनानां सहोद्योगमन्तरा मार्गान्तरं नास्तीति अहं निश्चयेन प्रत्येमि। त्रिविधकार्योपयोगिन्यः सहोद्योगशालाः तेषामावश्यक्यः, ततश्च सहोद्योगेन कृषिप्रवृत्तिरपि भवितुमर्हति। नाहं मन्ये अद्य वर्तमानायां दशायां संघस्वाम्येन कृषिप्रवृत्तिः भारतस्य युक्तेति; नाहं अस्मत्कर्षकान् कस्मिन्नपि यन्त्रे अप्रतिज्ञातांशत्वेन स्थितान् इच्छामि। अस्माभिः स्मरणीयं तत्त्वमिदं यद् अस्मिन् देशे जनानामाधिक्यं तदपेक्षया भूमेः स्वल्पत्वं च भवतः इति। एषु प्रश्नेषु मतभेदो वर्तते इत्येतदेकं तत्त्वं सूचयति यत् पुरोगमनं क्रियमाणं दृश्यते, कालपूगागताभ्यः आर्थिकक्षेत्ररेखाभ्यो वयमुत्तराम इति।

साधुना सतापि वादविशेषेणैव केवलं न कर्षकजनतां समुत्साहयितुं वयं पारयेम। सम्यगावगत्य अन्योन्यं मिलित्वा यथा ते स्वात्मावलम्बनतामभि-

वर्धयेयुस्तथा तेषां विधानमेव आवश्यको मार्गः। अत एव ग्रामपञ्चायतनाय ग्रामीयसहोद्योगयोजनायै च अधिकारदानं मुख्यं भवति। एतेषामधिकाराणामेते दुर्विनियोगं करिष्यन्तीति या युक्तिः प्रदर्श्यते, तत्र यद्यपि कियानिव सारो भवति, तथापि वस्तुतो नास्ति याथार्थ्यम्। सापायमपि तत् कर्तव्यमेव, यत एवमेव प्रयत्नद्वारा स्खलितद्वारा च जनाः शिक्षेरन्।

सामूहिकाभिवृद्धियोजनाप्रक्रमः सार्धषड्भ्यः सरेभ्यः पूर्वम् आरब्धः, अद्य लक्षत्रयमितान् ग्रामान् व्याप्नोति। इयं चाश्चर्यभूता अभिवृद्धिः; मन्ये, देशे परिवर्तात्मकानि फलानि प्रसोष्यति, मात्रया प्रसुवती वर्तते चेयमिति। जानेऽहं तस्याः स्खलितानि, किन्तु यानि तया साधितानि तानि प्रकटतराणि। यावता जनता तया समवेता, तावता तस्याः फलानि भविष्यन्ति। राज्याङ्गभूतानां पुरुषाणां शिक्षितानां कार्यनिर्वाहकाणां च मुख्यता अस्त्येव, किन्तु मुख्यपात्रत्वमत्र कर्षकसामान्येनैव निर्वोढव्यम्। एतस्याः सामूहिकाभिवृद्धियोजनायाः कारणात् जानपदेषु प्रदेशेषु नो नूतनः कोऽपि भावः प्रसरतीति मन्ये।

क्षेत्रविषये व्यापारोद्योगविषये वा, राज्याङ्गनिर्वाहप्रतिष्ठायां वा; क्रियाकारित्वधर्मा यदा यदा विपरिणमन्ति तदा तदा व्यवस्थितीनां भेदाश्च अवश्यकर्तव्या भवन्ति; लाभोद्देशप्रतिष्ठितस्य संजिघृक्षामयस्य समूहस्य ये नियामका आसन् तत्स्थाने नूतनाः पुरुषार्थगणनाः भविष्यन्ति। पूर्णतया नूतनप्रक्रियापादनं विलम्बेनैव स्यात्, यतः पर्यन्ते कोटिशो जनानां भावनायाः चेष्टितानां चान्यथाकरणं, तस्य च प्रजातन्त्रानुमतेन मार्गेण तत्संमत्या निर्वर्तनं च पुरःस्थिता समस्या भवति। तथापि विपरिणामस्य गतिक्रमे मान्द्यं नावश्यकम्; वस्तुतः अत्यन्तक्रमिकतां वस्तुस्थितिर्न सहेत।

१६

अद्यतनभारतेन कापि अत्यन्तसङ्कीर्णता प्रदर्श्यते—आशाया आतङ्कस्य च, आश्चर्यभूताभिवृद्धेरालस्यस्य च, नूतनाया भावनायाः तथा भूतकालस्य

विशिष्टाधिकारस्य च निर्जीवहस्तग्राहः, व्यापकस्य वर्धिष्णोरैक्यस्य तथा बहूनां विशरारुतापादिकानां प्रवृत्तीनां च। एवं स्थितेऽपि, जनानां बुद्धौ चेष्टितेषु च कोऽपि फेनिलः प्रक्षोभः, कापि प्राणशक्तिश्च वर्तेते। स्यादेतत् यद् अस्मिन्निरन्तरं विपरिणामिनः सन्निवेशस्य मध्ये वर्तमाना वयं संभवतस्सर्वस्यार्थवत्त्वं पूर्णं साक्षात्कर्तुं न शक्नुमः। बाह्या जनाः प्रायः अवस्थायाः समीचीनतरं तोलनं कर्तुं शक्नुवन्ति।

अद्भुतमिदं यदेष देशः एते जनाश्च,—ये अतिपुरातने काले प्ररूढ-मूलाः, यैश्च भूते काले वृत्तेषु परिवर्तेषु पर्यवस्थानशक्तिः प्रदर्शिता,—अद्य जवेन पुरः प्रयान्ति, व्यवसायपूर्वकैः पदक्रमैश्च प्रयान्ति। साश्चर्यमितिहासं भारते प्रतनुमः, यद्यपि न स्वयमेतच्चेतयामहे।

वर्तमानाया जनसन्ततेः प्रयासात् प्रक्षोभाच्च किमुत्पत्स्यते? श्वस्तनं भारतं कीदृशं भविष्यति?—इति नाहं वक्तुं प्रभवामि; केवलं मदीया आशाः अभीष्टानि चैव व्यञ्जयितुं शक्नोमि। आर्थिकदिशि भारतं पुरोगमनशीलं वाञ्छामि; स्वीयाया विस्तृताया जनतायाः जीवनप्रक्रियामात्रायाः उत्कर्षायं स्वपञ्चवार्षिकयोजनाः तेन पूरयितव्या इति च वाञ्छामि। मतमिति, जातिरिति, भाषेति, प्रान्त इति येऽद्यतनीयाः मतिसंकोचप्रवृत्ताः विग्रहाः तानवसितान् इच्छामि; इच्छामि च विगतजातिवर्गभेदं जनसमूहं निर्मितम्, यत्र एकैकस्य पुरुषस्य स्वार्हताशक्त्यनुसारेण वर्धितुं पूर्णः अवकाशो भवति। विशिष्यैतदा-शंसे जातिभेदरूपः शापः अवसितो भविष्यतीति, यतः जातिभेदमूलमादायं जनतन्त्रविधानं वा सामूहिकं विधानं वा भवितुं न पारयति।

चतुर्भिर्महद्भिर्मतैर्भारतोपरि स्वप्रभावः प्रदर्शितः—स्वमतिविलासादेव उत्पन्नाभ्यां हिन्दुबौद्धधर्माभ्यां द्वाभ्यां, देशाद्बहिष्ट आगत्य भारते कृतस्थिर-प्रतिष्ठाभ्यां ईशवीय-इस्लाम्-धर्माभ्यां द्वाभ्यां च। अद्य विज्ञानं प्राचीनस्य मत-सिद्धान्तस्य साधुतामाक्रोशति। यदि मतं हेतुविधुरैरेवादेशैः कर्मानुष्ठानैश्च न व्यवहरति, किन्तु जीवनस्य उदारतरैरंशैः, तदा तस्य विज्ञानेन, मिथो वा

## निकषोपलः

### गुरुवायुपुरेशाक्षरमालादिस्तवत्रयम्

*महामहोपाध्यायाः पैङ्गानाड् गणपतिशास्त्रिणः । प्राप्तिस्थानम् — जि. एस्. एल्. अय्यर् कम्पनि, पोस्ट् बाक्स् ३१५, मद्रास् २ । मूल्यं ५० न० पै० ।*

श्रीकाञ्चीकामकोटिपीठाधिष्ठितानां श्रीचन्द्रशेखरेन्द्रसरस्वतीसंयमीन्द्राणां श्रीचरणयोः समर्पितमिदं पावनं स्तोत्रकाव्यं प्रथितयशसां गणपतिशास्त्रिणां पाण्डित्यप्रकर्षं प्रकटयति । गणपतिशास्त्रिणः श्रीमतां मन्नार्गुडिराजुशास्त्रिणामन्तेवासिनः शब्दविद्यावेदान्तशास्त्रयोः पारंगताः अस्याः शताब्दया आरम्भे संस्कृतलोकमभूषयन् ।

ग्रन्थेऽस्मिन् गुरुवायुपुराक्षरमालास्तवः, श्रीवातपुरनाथाष्टकम्, गुरुवायुपुरनाथपञ्चरत्नम्—इतीदं स्तोत्रत्रयं प्रकाशितम् । केरलेषु गुरुवायुपुरक्षेत्रं 'गुरुवायूरु' शब्देनाभिधीयमानं प्रसिद्धम् । तदधिनायकस्य भगवतः प्रसादेन सहस्रशो जना समासादिताभीष्टसिद्धयः सम्पन्नाः । तस्मादस्य स्तोत्रत्रयस्य पठनं पुण्यं पापहरं चेत्याकलयामः । गणपतिशास्त्रिणः शताधिकग्रन्थप्रणेतारः श्रूयन्ते । तेषां ग्रन्थानां प्रकाशनं तच्छिष्यैः तदभिनन्दकैश्च प्रकाश्येरन्निति विश्वसिमः ।

### अष्टप्रासशतकत्रयम्

*श्रीगोमतीदास एलत्तूर् रामस्वामिशास्त्रिणः । प्रकाशकः—आर्. हरिहर सुब्रमणि, १४ ब्राह्मिन् स्ट्रीट्, सैदापेट्, मदरास् १५ । मूल्यं रू० २ ।*

अतीतायां शताब्दयां सुप्रसिद्धः पण्डित आसीत् श्रीमान् एलत्तूर् रामस्वामिशास्त्रिमहाभागः । शास्त्रेषु कवितामार्गे चाप्रतिहताऽभूत् तस्य नवनवोन्मेषशालिनी प्रज्ञा । असौ विशाखमहाराजस्य काले तिरुविताङ्कूरराजधान्यामास्थानपण्डितपदमलङ्कुर्वन् मूलकमहाराजस्य केरलवर्मदेवस्य

च विद्यागुरुरासीत्। अनेन बहवो ग्रन्थाः प्रणीताः। तेषां सर्वेषां प्रकाशनेन संस्कृतलोकः समुद्दीपितः स्यात्।

प्रकृते तदीयेऽष्टप्रासशतकत्रये देवीशतकं शिवशतकं विष्णुशतकं च प्रकाशितम्। प्रौढार्थबन्धा कवितासरणिः, द्राक्षापाकवती च। श्लोकेषु द्वितीयाक्षरप्रासः शोभते शब्दालङ्कारः। काव्येऽस्मिन् प्रतिपादं न केवलं द्वितीयाक्षरं किन्तु तदेव द्वितीयाक्षरं चतुर्दशाक्षरत्वेन संयोजितम्। इत्थं प्रतिश्लोकमष्टौ समानाक्षरप्रासाः सम्भवन्ति। तस्मादष्टप्रासः इति व्यपदेशः सङ्गच्छते। प्रासनिमित्तकः काव्यापकर्षः कुत्रापि नानुभूयते। नूनं विद्वत्कविकृतानां कृतीनां पङ्क्तौ परिगणनामर्हतीदं शतकत्रयम्।

श्रीबोधिसत्त्वचरितम्

*सत्यव्रतः शास्त्री व्याकरणतीर्थः, एम्.ए., एम्.ओ.एल्., पिएच्.डि., देहलीविश्वविद्यालये संस्कृताध्यापकः। प्राप्तिस्थानम् — मोतीलाल् बनारसीदास्, बङ्गलो रोड्, जवाहर्नगर्, दिल्लि। मूल्यं रू० ४।*

काव्यमिदं भव्यशब्दार्थभासुरमुत्कृष्टं च पालिजातकेषु निबद्धान् श्रीबुद्धदेवस्य पूर्वजन्मवृत्तान्तान् संस्कृतवाण्या वर्णयति। श्रीमतः सत्यव्रतस्य शब्दशास्त्रपाण्डित्यं काव्यादस्मादनुमीयते।

सहस्रश्लोकात्मकेऽस्मिन् काव्ये ११ सर्गाः सन्ति। अत्र प्रस्तुताः श्रीबोधिसत्त्वस्य सर्वे वृत्तान्ताः सरसाः सदुपदेशपराश्च सचेतसां चित्तमाददते। काव्यस्य प्रथमतृतीयसर्गौ संस्कृतप्रतिभायां प्रकाशितपूर्वौ प्रतिभावाचकानां विदितावेव।

कणः लुप्तः गृहं दहति

*के. कृष्णसोमयाजी, एम्.ए., एल्.टि. मन्त्री, संस्कृतसेवकसमाजः, रामेश्वरीपुरम्, गुण्टूरु, आन्ध्रप्रदेशः।*

सर्वजनसंस्कृतमालानाम्ना गुण्टूरुसंस्कृतसमाजः ललितललितया संस्कृतभाषया ग्रन्थान् प्रकाशयति। तद्गतमन्यतमं कुसुममुपरिनिर्दिष्टो ग्रन्थः।

अत्र रुश्यादेशीयेन 'टाल्स्टॉय्' नाम्ना कविना लिखितां कथा सरलया संस्कृतभाषया अनूदितः। सरसा कथा। पदानि प्रसिद्धानि। वाक्येषु न सन्धिः, नापि दीर्घाणि समस्तपदानि। देश्यभाषापण्डितैः संस्कृतभाषामजानद्भिरपि सुबोधोऽयं ग्रन्थः।

ग्रन्थस्यास्य प्रस्तावनायां महतां जनानामभिप्रायान् पुरस्कृत्य संस्कृतभाषायाः व्यावहारिकत्वविषये श्रीमता सोमयाजिना कोऽपि विचारः प्रवर्तितः।

मनुचरित्रम्

*श्रीमदान्ध्रकवितापितामहेन अल्लसानिपेद्दनार्येण प्रणीतस्य छायानुवादः प्रवराख्यः प्रथमो भागः। रचयिता-कोलाचलयज्ञनारायणदीक्षितः। प्राप्तिस्थानम् —मल्लिनाथगुरुकुलम्, राजेश्वरीपुरम्, गुण्टूरु, आन्ध्रप्रदेशः।*

सरसमिदं पद्यकाव्यम्। प्रथमभागेऽस्मिन् ४८ श्लोकाः सन्ति। उपजातिर्वृत्तम। अत्र प्रथमेषु पञ्चषेषु श्लोकेषु यद्यपि अतिशयोक्तिः परां कोटिमारूढा तथापि ततः परं स्वभावोक्तिरेवानुभूयते। अस्यापरे भागाः प्रकाशमर्हन्ति।

श्रीसरोजिनीसौरभं नाम नाटकम्

*महीधर वेङ्कटरामशास्त्री, वैयाकरणः साहित्यविद्याप्रवीणः, आयुर्वेदविशारदश्च, राजमहेन्द्रम्, आन्ध्रप्रदेशः। मूल्यं रू० २।*

नव्यमिदं नवाङ्कात्मकं नाटकं डा० वि. राघवन्-महाभागस्योपोद्घातेन भूषितमद्यतनान् सामाजिकान् विषयान् परामृशति। 'वरशुल्कप्रयुक्ता दोषाः, जातिकलहः, ग्रामोद्धारः' इत्यादयो विषयाः संविशेषं निरूपिताः सन्ति। ललितमधुरो गिरां विन्यासः। यथोचितं तत्र तत्र सुश्लिष्टा उपमालङ्काराः सङ्घटिताः। अथ तु क्वचित्क्वचित् यतिभङ्गादयो दोषाः, वैरल्येनापशब्दाश्चाप्युपलभ्यन्ते। एते दोषाः शोधनीयाः।

सौमित्रिसुन्दरीचरितम्

*श्रीभवानीदत्तशर्मा, एम्.ए., एम्.ओ.एल्., वेदव्याकरणमीमांसा-वेदान्ततीर्थः, साहित्याचार्यः, आयुर्वेदाचार्यः, साहित्यालङ्कारः। मुद्रकः—अध्यक्षः, गिरिजा प्रेस्, रमना, मुजफरपुर्। मूल्यं न निर्दिष्टम्।*

नवसर्गात्मकमिदं काव्यं लक्ष्मणस्य वनं प्रति प्रस्थानसमये ऊर्मिलया सह सम्भाषणं तस्याः शोकावेगं च वर्णयति। सरसमिदं काव्यमसंशयं सहृदयहृदयमार्द्रयितुं प्रभवति। तत्रापि रामादीनां प्रस्थानदिवसीयसन्ध्यावर्णनं वाचकानां नयनमप्यश्रुपरिप्लुतं करोति। ललितो वाक्यबन्धः व्यङ्ग्यार्थगर्भितश्च। परन्त्वत्र शब्दशास्त्रसम्बन्धिनः प्रमादाः सन्ति बहवः। तत्र प्रथमपद्यमेवोदाहरणमर्हति। तथा हि—

नमामि रामस्य पदारविन्दौ भवाम्बुधेः सन्तरणे तरण्यौ।
यावाश्रियेते जितकामरोषैर्महात्मभिस्त्यक्तसमस्तदोषैः॥

तत्र तत्र वृत्तभङ्गोऽपि दृश्यते। 'अभिलाषा, उच्छ्वसन्ती, वियोगदीर्घानि' इत्यादयोऽपशब्दाः।

निष्किञ्चनयशोधरं नाम नाटकम्

*डा० जतीन्द्रविमल चौधुरि, पि.एच्.डि., (लण्डन्), कार्यदर्शी, संस्कृतशिक्षापरिषत्, वेस्ट् बेङ्गाल्। मूल्यं न निर्दिष्टम्।*

निष्किञ्चनयशोधरं नाम नाटकमिदं सप्तभिरङ्कैर्घटितं बुद्धदेवस्य धर्मपत्न्याः यशोधरायाः पावनं चरितं कथावस्तुत्वेन निबध्नाति। बुद्धदेवस्य चरितं गवेषणवर्त्मना परिष्कृत्य नाटकेऽस्मिन् निबद्धम्। पाश्चात्याः खलु विमर्शकाः गोपां बुद्धदेवस्य कलत्रान्तरं मन्यन्ते। ग्रन्थकर्ता तु 'गोपा, सुभद्रका, बद्धकच्छा' इत्यादीनि यशोधराया एव नामान्तराणीति सप्रमाणं निरूपितवान्। एतन्निरूपणानुसारेणैव कथावस्तु नाटकेऽस्मिन् सङ्घटितम्।

अयं चौधुरिमहाभागः सम्प्रति संस्कृतप्रचाराय समर्पितात्मा संस्कृत-प्रणयिनां धन्यवादानर्हति । स्वप्रणीतानि नाटकानि भारतवर्षे तत्र तत्र स्वशिष्यमित्रमण्डलद्वारा अभिनयन् भारतीयजनतां संस्कृतभाषोन्मुखीं करोति ।

यशोधरायां जीवनचरितं करुणरसाप्लुतम् । तदनुरोधेन नाटकेऽस्मिन् करुणरसः प्रधानतयोपनिबद्धः । अथाप्यन्येऽपि रसाः यथोचितमङ्गतया विनिवेशिताः । सूर्य-चन्द्र-स्थूलोदरादीनां वचनानि हास्यरसमुद्गिरन्ति । तत्र तत्र सरसानि गीतानि, पद्यान्यपि यथास्थानं विनिवेशितानि । अभिनये सर्वमिदं शोभेततराम् । मनोहरं मुद्रणम् ।

काव्यावलिः

*शिरोमणिः सन्निधानं सूर्यनारायणशास्त्री, पि.ओ.एल्., संस्कृताध्यापकः, राजाबहदूर् वेङ्कटरामरेड्डि स्त्रीविद्यालयः, हैदराबाद् । मूल्यं रू० ३ ।*

अस्यां काव्यावलौ (१) विवेकानन्दम्, (२) पूर्णपात्रम्, (३) रामदासम्, (४) त्रिकम्—कीरसन्देशम्, विप्रवीरम्, मधुकोशः—इत्येतानि खण्डकाव्यानि सङ्कलितानि । तत्र रामदासं पूर्णपात्रं च संस्कृतप्रतिभायां निरूपितपूर्वम् । इदानीमवशिष्टा भागा अत्र विचार्यन्ते ।

(१) विवेकानन्दनाम्नि काव्ये वर्ण्यः पुरुषः सुगृहीतनामा श्रीमान् विवेकानन्दः भारतमातुः यशस्कराणां पुत्राणामन्यतमः । तस्य विश्वविश्रुतं चरितममरवाण्या वर्णयता शास्त्रिणा अमरतां नीतम् । ललितमधुरा कवेः शैली । असमस्तपदा वाक्यरचना । रसवती च वाग्धारा । तथापि तत्र तत्र विसन्धिदूषितानि पादानि ।

(२) कीरसन्देशः—विद्युल्लता नाम रमायाः सखी शापेन कीरत्वमापन्ना रुक्मिण्याः सन्देशं श्रीकृष्णायार्पयतिं । अत्र कवेः कल्पनाशक्तिरभिव्यज्यते । खण्डकाव्येऽस्मिन् विविधानि वृत्तान्युपयुक्तानि कविना । अत्राप्यार्यावृत्ते प्रथमतृतीयपादयोः क्वचित् क्वचित् ह्रस्वान्तत्वं दृश्यते । पादान्तस्थो किंकलपेनेति वचनं न सार्वत्रिकम् । किञ्च—

श्रुतिपेयानि शृण्वन्नधस्तलं प्राप चूतवृक्षस्य ।

इत्यत्र प्रथमपादे वृत्तभङ्गः। श्रुधातोः शत्रन्तं रूपं शृण्वन्निति, न तु श्रुण्वन्निति।

(३) विप्रवरनामके काव्ये विप्रवरस्य खड्गतिलकस्य तदश्वस्य च सङ्ग्रामाङ्गणदर्शितपौरुषस्य चरितं रसवत्तरया गिरा वर्ण्यते। काव्यमिदं स्वकृतस्य आन्ध्रभाषामयस्य काव्यस्य स्वकृतोऽनुवादः। अत्र वीररसानुगुण ओजस्वी बन्धः।

(४) मधुकोशाभिधं काव्यं नामानुरूपं शृङ्गाररसप्रधानं भवति। उपोद्घाते कविना कृतेरस्य यद् भाणत्वं, अथवा श्रव्यभाणत्वमित्यश्रुतं किमपि समर्थयितुमिष्यते स वृथा प्रयास इति भाति।

कविरयं संस्कृतभाषायामिव आन्ध्रभाषायामपि प्रवीणः अभिनन्दनमर्हति।

श्रीजवाहरवसन्तसाम्राज्यम्

*साहित्याचार्यः पण्डितश्रीजयरामशास्त्री, पाहडि, धीरजबाजार्, दिल्लि। मूल्यं न निर्दिष्टम्।*

काव्येऽस्मिन् सप्त सर्गाः सन्ति। कविरयं श्लेषालङ्कारप्रियो दृश्यते। तत्र तत्र क्लेशेन श्लेषालङ्कारः सङ्घटितः। नन्दनशब्दस्य लण्डनरूपोऽप्यर्थो विवक्षितः। शब्दरचना न सरला सर्वत्र। सर्वथा व्याख्यासव्यपेक्षमिदं काव्यम्।

काव्येऽस्मिन् जवाहरवसन्तसाम्राज्यस्योत्कर्षः प्रतीयमानोऽपि बन्धपारुष्येण तिरोहितशोभो नातीवात्मानं प्रकाशयति। श्रीजवाहरस्य नाम ज्वाहर इति वैरूप्यं प्रापितम्। असेम्बलि, चेम्बर, मेम्बर, गवर्नरादयः शब्दाः काव्येऽस्मिन् लब्धप्रवेशाः संस्कृतभाषायां शब्ददारिद्र्यमिव सूचयन्ति।

प्रथमसर्गे अष्टपञ्चाशत्तमे श्लोके 'आगम' शब्दः वृक्षवाचकत्वेन प्रयुक्तः। तत्र प्रयोगः कोशश्च मृग्यः। वंशस्थशिखरिण्यादौ प्रथमतृतीयपादयोः ह्रस्वान्तत्वं श्राव्यत्वभङ्गहेतुर्भवति।

कविरयं देशभक्तः सत्याग्रहव्यवसायमनुप्रविष्टो महान्तं क्लेशमनुभूतवानिति, अमुद्रितास्वस्य कृतिषु 'गान्धिकल्पद्रुमः' कवेरिमं मनोभावं व्यनक्तीति च ज्ञायते।

**आत्मदानम्**

*श्रीभाष्यं विजयसारथिः, बि.ओ.एल्., विश्वेश्वरसंस्कृतान्ध्रकलाशाला, एकशिला (वारङ्गल्, आन्ध्रप्रदेशः)। मू० रू० ? ।*

मधुरमिदं गीतकाव्यं विश्वेश्वरसंस्कृतान्ध्रकलाशालाव्यवस्थापकस्य श्री के. शे. आकारपु नरसिंगुप्तस्य धर्मपत्न्या श्रीमत्या अनन्तलक्ष्मीदेव्या कृतेन धनसाहाय्येन नव्यसंस्कृतपरिषद् आश्रये मित्रपञ्चकेन प्रकाशितम्। यद्येवमेव धनिनः सर्वे दानशौण्डा भवेयुस्तर्हि संस्कृतसाहित्यलोकः प्रतिनवैः ग्रन्थजातैः समुत्तेजितो भविष्यति।

आत्मदानं नाम गीतकाव्यमिदं शब्दार्थसुन्दरं नव्यकल्पनामेदुरं च विलसति। निरङ्कुशाः कवयः, तत्रापि विशेषतो गीतकवयः। संस्कृतभाषानिबन्धेषु प्रगतिमिच्छता कविना व्याकरणविरोधाः छन्दश्शास्त्रविरोधाश्च न गणिताः। एतादृशी प्रगतिस्तु प्रायो नाभीष्टा भवेद्विदुषाम्। प्रतिभाशालिनः कर्तुरस्य ज्ञायते सन्त्यन्या दश संस्कृतकृतय इति।

**श्रीशौरिराजस्तवः**

*पण्डितरत्नं ति. एस्. श्रीनिवासाचार्यः। प्राप्तिस्थानम्—एस्. शौरिराजय्यङ्गार्, 'श्रीरामप्रसादः', सर्दार् रोड्, उडुमलप्पेट्टै, मद्रास्-प्रदेशः।*

प्रबन्धार एते मदनगरस्थिताया श्रीभाष्यकारसंवर्धिनीसंस्कृतपाठशालायाः भूतपूर्वाध्यक्षाः। चोलदेशविराजमानतिरुक्कण्णपुरग्रामाभिजनानामेतेषां तत्र ग्रामे कृतालये शौरिराजे महती भक्तिः या तदा तदा तद्दैवतविषयकस्तोत्राभिष्यन्दरूपेण प्रवहति स्म। पुस्तकेऽस्मिन् एतैः श्रीनिवासाचार्यैः कृतानि शौरिराजसुप्रभातम्, तत्प्रपत्तिः, तन्मङ्गलमिति स्तोत्राणि प्रकाशितानि। २४१-श्लोकात्मके पूर्वोत्तरभागद्वयघटिते मुख्यभूते प्रथमस्तोत्रे न केवलं क्षेत्रमाहात्म्यंविषयाः परं तु नूतना उत्प्रेक्षाः, वेदान्ताभिप्रायाश्च तत्र तत्र स्तोत्ररीत्या संवलिता दृश्यन्ते। प्रायः प्रसादसुभगा शैली। अन्ते विशिष्यावधेयोऽयं विषयः, यदेतैः द्राविडाम्नायभूतदिव्यप्रबन्धतः काश्चिद् गाथा अनूद्य

संस्कृतश्लोकरूपेण दत्ताः। ग्रन्थोऽयं ग्रन्थलिप्या द्राविड्यनुवादेन च सुष्ठु मुद्रितः।

शबरीचरितम्

*महाकवि श्रीसुन्दरेशशर्मा, वेस्ट् मैन् स्ट्रीट्, तञ्जापुरम्*। मूल्यं ७५ न० पै०।

चतुर्दशपुटात्मकमिदं काव्यं रामायणप्रसिद्धायाः शबर्याः पावनं चरितं वर्णयति। मधुराक्षरैर्गीतैः मनोहरं रामायणश्लोकैरुपगूढं च चरितमिदं शबर्या श्रीरामाय दत्तं फलमिव स्वदते। द्राविडभाषागीतान्यप्यत्र संयोजितानि। अनेकेषां ग्रन्थानां रचयिता श्रीमान् सुन्दरेशशर्मा रामचन्द्रभक्तश्च रचनामेतां हरिकथाकालक्षेपकृते भागवतानां यथा उपयुक्तं स्यात्, तथा तत्कलासंप्रदायानुसारेण सन्दब्धवान्।

भारतीयसांस्कृतिकनिधिः

*डा० रामजी उपाध्यायः एम्.ए., डि. फिल्., सागरविश्वविद्यालये संस्कृतविभागाध्यक्षः। प्राप्तिस्थानम्—१. गान्धिविश्वपरिषत्, टाना, सागर, म० प्र०। २. चौखाम्बासंस्कृतसीरीज्, पो० बा० नं० ८, वाराणसी, ९। मूल्यं, रू० १०।*

विपुलमगाधं च संस्कृतग्रन्थाम्भोराशिं भारतीयमितिहासं च निर्मथ्य सम्पादितोऽयं ग्रन्थः सर्वान् संस्कृतिविशेषान् क्रोडीकृत्य दर्शयति।

अत्र हि पूर्वे षोडशसंस्काराः, आश्रमधर्माः, सामाजिकसंस्थानम्, उपभोग्यानि, व्यवसायाः, मनोविनोदाः, राजनीतिकजीवनम्, दार्शनिकप्रवृत्तयः, धार्मिकप्रवृत्तयः, शिल्पकलाः, विज्ञानम्, काव्यसाधनानि, वैदेशिकप्रसारः इत्येते विषयाः महता प्रबन्धेन निरूपिताः। क्वचित् क्वचित् विमर्शक्रमार्गमवलम्ब्य विषयो विचारितः। केषाञ्चित् संस्काराणां वैज्ञानिकदृष्ट्या वैद्यकदृष्ट्या च समर्थनं कृतम्। अपारे संस्कृतग्रन्थसमुदायपारावारे सञ्चरतां जनानां ग्रन्थोऽयं नूनमुपकाराय कल्पेत। सुगमा भाषारीतिः। प्रायः आङ्ग्ल-

वाण्यामेतादृशा ग्रन्था उपलभ्यन्ते ; तदिदंप्रथमतया संस्कृतवाण्यामीदृशं ग्रन्थमवतारितवते ग्रन्थकृते धन्यवादा देयाः ।

**जीवनज्योतिः, प्रबन्धप्रकाशः (प्रथमद्वितीयौ भागौ)**

*डा० श्रीमङ्गलदेवशास्त्री, एम्.ए., एम्.ओ.एल्., डि. फिल् (आक्सफोर्ड्) प्रकाशकः—के. मित्र, इण्डियन् प्रेस् लिमिटड्, प्रयाग्, मूल्यं (जीवनज्योति :) रू० २ न० पै० ५०, (प्रबन्धप्रकाश :) प्रतिभागं रू० ३ ।*

ग्रन्थकर्तुरस्य परिचयः पूर्वस्यां सञ्चिकायां कृत एव, यत्र तदीयः अमृतमन्थननामको ग्रन्थः समालोचितः ।

जीवनज्योतिर्नामकः तस्य प्रकृतो ग्रन्थः रश्मिनामकैः एकविंशत्या भागैः समुल्लसन् वेदकालिकीं संस्कृतिं प्रकाशयन् जनजीवनस्य मार्गे नव्यं ज्योतिः प्रसारयति । जीवनसङ्गीतम्, दुःखमीमांसा, भावसंशुद्धिः, वैदिकसुधासन्दोहः, वैदिकोदात्तभावनाः, वैदिकं राष्ट्रियसङ्घटनम्, इत्यादयोऽनेके विषयाः श्रुतिवचनोदाहरणपूर्वकं साधु निरूपिताः ।

ग्रन्थकृता वेदानुशिष्टां संस्कृतिमुपपाद्य जनानां जीवनविषये नूतना दृष्टिरुपस्थापिता । ग्रन्थस्यास्य परिशीलनेन आविर्भूतनूतनज्योतिरुत्साहसम्पन्ना भविष्यति भारतीया जनता ।

प्रबन्धप्रकाशस्य प्रथमभागे विविधविषयका उपन्यासाः प्रकाशिताः । ग्रन्थेऽस्मिन् प्रथमतः प्रबन्धरचनाप्रकारः सविस्तरं निरूपितः प्रबन्धान् चिकीर्षतामवधानमर्हति । शिक्षायाः प्रधानमुद्देश्यम्, भारतीयसंस्कृतौ स्त्रीजातेः स्थानम्, गीतायाः कर्मणो यज्ञस्य च स्वरूपम्—इत्यादयो विषयाः जनानां हृदये प्रतिनवमुद्बोधं जनयिष्यन्ति ।

प्रबन्धप्रकाशस्य द्वितीयभागे भारतवर्षीयेषु बहुषु विश्वविद्यालयेषु ग्रन्थकर्त्रा कृतानि दीक्षान्तभाषणानि प्रकाशितानि वर्तन्ते । अभिनवभारते संस्कृतज्ञानां स्थानम्, पाठ्यपद्धतेः परिष्कारः, देववाण्या अवनतिरस्माकं कर्तव्यं च इत्यादयो विषयाः सविशेषं विमृष्टाः । वैदिकवासनोद्भासिता एव दृश्यन्ते श्रीशास्त्रिमहाभागस्य सर्वे प्रबन्धाः ।

दीक्षान्तभाषणम्—

*वाराणसेयसंस्कृतविश्वविद्यालय-द्वितीयतृतीय-दीक्षान्तमहोत्सवे कुलपतेः उत्तरप्रदेशराज्यपालस्य श्रीरामकृष्णराव्-महोदयस्य दीक्षान्तभाषणम् ।*

सरसमृदुलया वाण्या श्रीरामकृष्णराव्-महोदयः संस्कृतविश्वविद्यालयस्य कर्तव्यं, संस्कृताध्ययनस्योपयोगः, संस्कृताध्ययनं कथं कर्तव्यम् इत्यादिकान् विषयान् सोपपत्तिकं विचारयति । संस्कृतज्ञैरवश्यं विज्ञानशास्त्रमपि परिशीलनीयम्, अन्यथा ते लोकबाह्या भविष्यन्तीत्यभिप्रैति । तच्च विज्ञानशास्त्रं संस्कृतभाषयैव परिशीलनीयमित्यप्याशेते । इरान्देशे प्राचीनां हिब्रूभाषां व्यवहारभाषापदमारोप्य यथा राज्यकार्यनिर्वाहः क्रियते, तथैव संस्कृतभाषाऽपि राष्ट्रभाषापदमारोपयितुं शक्येति राव्महाभागस्याभिप्रायं श्लाघामहे । संस्कृतभाषाविषये विवदमानैः भाषणमिदमवश्यं पठितव्यम् ।

शारदा—गणराज्यदिनविशेषाङ्कः

*सम्पादकः पण्डितवसन्त अनन्त गाडगीळ । प्रकाशनस्थलम्—सचिन अँण्ड् कं०, २५ बाङ्क् स्ट्रीट्, फोर्ट्, मुम्बई १, अथवा श्री. म० म० दत्तोवामनपोद्दार, ७७ शनिवार पुणें २ । अस्य विशेषाङ्कस्य मूल्यं रू० १ । शारदाया वार्षिकं मूल्यं रू० ५ ।*

संस्कृतभाषापत्रिकाणामन्यतमैषा शारदानाम्नी शब्दतोऽर्थतश्च सहृदयानां हृदयमाकर्षति । प्रतिपाद्या विषयाश्च मनोहरा नवीनच्छायाहारिणश्च । तथाहि—क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ जवाहर, धाता धत्ते धियं कवेः, भारतीयत्वविमर्शः, परिशील्यतां भारतीयत्वबुद्धिः समर्थयन्ती संस्कृतभाषा, समस्यापूर्तयः, बुद्धेः फलमनाग्रहः, श्रीरामचन्द्रस्तोत्रम्, सप्तदशः प्रजापतिः, श्रीगीतासमन्वयः, मध्यमोऽपि स्मृतस्तेषामुत्तमः प्रथमश्च सः, एतत्तस्य तरोर्बीजम्, विद्यावतां सकलमेव गिरां दवीयः, इवमीमांसा, इत्येतच्छीर्षका विषया अत्र प्रतिपाद्यमानाः सहृदयानां सादरमवलोकनमर्हन्ति । भाषारीतिश्च गुणवती शोभतेतराम् ।

**मालवमयूरः (मासिकं पत्रम्)—**

*सम्पादकः—शास्त्री पं० रुद्रदेवत्रिपाठी एम्.ए. । सम्पादको व्यवस्थापकश्च—शास्त्री पं. जयदेवत्रिपाठी, शङ्करवेदान्ताचार्यः । प्राप्तिस्थानम्—मालवमयूरकार्यालयः, मन्दसौर, (म. प्र.) वार्षिकं मूल्यं रू० ५१, एकाङ्कस्य मूल्यं० ५० न० पै० ।*

अतीते कार्तिके मासि शुक्लपक्षे प्रकाशितमिदं पत्रम् । अत्र ईश्वरस्मरणपूर्वकं चित्रपञ्चामृतम्, कालिदासं प्रति, कविकुलतिलकवन्दनम्, भारतीयकलायाः प्रेरकः कालिदासः, संस्कृतसुखशिक्षा, साहित्यसमीक्षणम्, नवग्रहचरितं नाम लघुनाटकम्,—एते प्रबन्धाः प्रकाशिताः, अनेकेऽवधेया विषयाश्च विचारिताः । अन्ते सम्पादकीयमपि प्रकटितम् ।

**गुरुकुलपत्रिका (मासिकी)**

*सम्पादकः श्रीधर्मदेवविद्यामार्तण्डः । प्रकाशकः—धर्मपालविद्यालङ्कारः, गुरुकुल, कांगडी विश्वविद्यालयः, हरिद्वारम् । वार्षिकं मूल्यं देशे रू० ४, विदेशे रू० ६ ।*

अस्याः पत्रिकायाः सम्पादको धर्मदेवविद्यामार्तण्डः प्रसिद्धः पण्डितः । त्रयोदशवर्षदेशीया तेन सम्पाद्यमानैषा पत्रिका प्राधान्येन वैदिकधर्मान् व्याख्यातुं प्रवृत्ताप्युच्चावचान् विषयान् विचारपदमारोपयति । अत्र लेखकाः सर्वे प्रख्याता विद्वांसः । न केवलं वैदिकाः, नापि केवलं लौकिकाः, किन्तु ख्यातिवादादयो गहनाः शास्त्रीया विषया अपि सुगमया सरण्या निरूप्यन्ते । संस्कृतप्रणयिनः सर्वे पत्रिकामिमां पठेयुरिति विश्वसिमः ।

**चद्मातृदशाननम्**

*रचयिता—श्री य. महालिङ्गशास्त्री, एम्.ए.बि.एल्., साहित्यचन्द्रशाला, तिरुवालङ्गाडु, तञ्जापुर डिस्ट्रिक्ट् ।*

प्रथितधवलयशसां श्रीमदप्पय्यदीक्षितानां वंशे समुत्पन्नोऽयं प्रकृतस्योद्गातृदशाननस्य रचयिता श्रीमान् महालिङ्गशास्त्री । प्रसिद्ध एवासौ

संस्कृतकविः, यस्य कृतयः काश्चित् प्रकाशिताः काश्चित्समालोचिताश्च संस्कृत-प्रतिभायाम् ।

सप्ताङ्कात्मकमिदमुद्भातदशाननं नाम नाटकं रावणकृतस्य कैलास-शैलोत्तम्भनस्य कथां प्रस्तौति ।

नाटकमिदं व्यङ्ग्यार्थानुविधायिना मनोहारिणा शब्दसन्दर्भेण विराज़-मानमुत्कृष्टानां नाटकानां पङ्क्तौ परिगणनमर्हति । नाटकेऽस्मिन् कथावस्तु-घटनेऽपि महन्नैपुण्यमाविष्कृतं कविना ।

कविरयं गद्यानां पद्यानां नाटकानां गीतानां च रचने प्रख्यापितात्म-प्रभावः प्रथते ।

## आदर्शराघवः पुष्पाञ्जलिः

*श्रीसोमनाथशर्मा, प्रधानपण्डितः, ठमेल, नेपाल् । 'मूल्यममूल्यं प्रेम' ।*

वेदान्ततत्त्वोद्भासितमिदं स्तोत्राणामुत्तमं स्तोत्रं रघुकुलतिलकस्य श्रीरामस्य चरणयोः समर्पितः पुष्पाञ्जलिः श्रीरामस्य महिमानमनुवर्णयति । आध्यात्मिककाण्डः आधिदैविककाण्डः आधिभौतिककाण्ड इति त्रेधा वि-भक्तोऽयं ग्रन्थः त्रिंशता स्तबकैः समुल्लसति । रमणीयः शब्दार्थसन्दर्भः । कमनीयः कवितविलासः । शालिनीमालिनीमन्दाक्रान्तादिवृत्तेषु प्रथमतृतीय-पादयोः ह्रस्वन्तत्वं यदि परिहृतं तदा अनवद्यं स्यात् ।

नेपालदेशे काष्ठमण्डपनगरे सुप्रसिद्धा इमे वयोवृद्धा ज्ञानवृद्धाः पण्डित-प्रवराः । एतेषां कृतिषु अन्यतमं सिद्धान्तकौमुद्याः संग्रहेण प्रतिसंस्करणं, यदद्य मुद्रयमाणं वर्तते ।

## सङ्गीतत्सौभद्रम्

*कर्ता—श्री. भि. वेलणकर् । प्राप्तिस्थानम्—गीर्वाणसुधा-प्रकाशनम्, झांवडा वाडी, मुंबई २ । मू० २ रू० ।*

श्रीमतो वेलणकरस्य द्वे कृती प्रतिभायां निरूपितपूर्वे । तस्येयं तृतीया कृतिः यापि मराठीसाहित्यादनूदिता । मराठीरङ्गे किर्लोस्करुपज्ञं सङ्गीतसौभद्रं

नाम नाटकमजानानो नास्त्येव। अनेन संस्कृतानुवादेन अनुवादकाभीष्टे द्वे कार्ये साधयितुं शक्येते—प्रथमं महाराष्ट्रप्रदेशतो बहिर्वर्तमानानां नानाप्रान्तीयानां मराठीसौभद्रस्य सुभुद्रां लक्ष्मीमास्वादयितुमवकाशः; द्वितीयं संस्कृतरङ्गं तत्र तत्र प्रवर्धयितुमुत्सुकानां सुप्रसिद्धप्रयोगवस्तुलाभश्च। अण्णासाहेब्-किर्लोस्कर् आधुनिकयुगे महाराष्ट्ररङ्गस्य प्रोज्जीवयितासीत्। संस्कृतनाटकेभ्यः पुराणकथाभ्यश्च उद्धृत्य तेन यानि महाराष्ट्रनाटकानि निबद्धानि तेषां प्रधानः जनावर्जकश्च अंशः तत्र योजितानि गीतानि। बहवः कर्णाटसंगीतरागाः तेन आदृताः। एतादृशस्य गीतानुविद्धस्य नाटकस्य संस्कृतानुवादे अनुवादकस्य गीतज्ञा सहधर्मचारिणी परं साह्यकरी आसीत्। एष च अनुवादः मुम्बई-ब्राह्मणमहासभया गते मासे रङ्गे प्रयोजितः सहृदयैस्तत्रत्यैस्सर्वैः श्लाघित इति ज्ञात्वा प्रमोदामहे। मुद्रणं सचित्रं सुन्दरं च भाति।

**आह्निकस्तवः**

*श्रीकपालिशास्त्रिभिः प्रणीतः। प्रकाशकः—मा. पु. पण्डितः, अरविन्दाश्रमः। पाण्डिचेरि। मूल्यं रू० ? ।*

स्तोत्रग्रन्थेऽस्मिन् अष्टौ स्तवाः सन्ति। तत्र प्रथमः आह्निकस्तवः नूतनवर्षारम्भे पठनीयः। ततः अरविन्दत्रिपादीस्तवः। अत्र त्रयो भागाः सन्ति, एकैकस्मिन् भागे चतुर्विंशतिः श्लोकाः। तत्र अरविन्दयोगिदृष्टस्य नूतनस्य गायत्रीमन्त्रस्याक्षराणि क्रमशः प्रथमाक्षरत्वेन निबध्य विरचितैः श्लोकैः विलसत्येकैकोऽपि भागः। अरविन्दयोगिना दृष्टो गायत्रीमन्त्रः—

तत्सवितुर्वरं रूपं ज्योतिः परस्य धीमहि।
तन्नः सत्येन दीपयेत् ॥ इति।

अत्रत्याः श्लोकाः सर्वे निरर्गलं गलिता अयत्नसिद्धाश्च। तृतीयः सूक्तस्तवः। अत्र ऋग्वेदीयप्रथममण्डलस्य नवमेऽनुवाके अग्निदेवताकानि नव सूक्तानि श्रीमदरविन्ददर्शनानुरोधेन सरसैः संस्कृतश्लोकैरनूदितानि। ग्रन्थेऽस्मिन् विराजमानाः सर्वे स्तवाः सुश्लिष्टैः श्लोकैरुपनिबद्धाः श्रीकपालिशास्त्रिणां सर्वाभिनन्द्यं वैदुष्यं प्रकटयन्ति।

साम्राज्यलहरी

*बुद्धिसागरः पराजुलिः, मीमांसाचार्यः, प्राप्तिस्थानम्—अनन्त-विजय, टंगाल दरबार, पूर्वद्वार, काठमाडौँ, नेपाल । मूल्यं न निर्दिष्टम् ।*

बुद्धिसागरोत्पन्ना लहरीयं गर्भीकृतविविधशास्त्रार्था कर्तुः शास्त्राभिज्ञतां व्यनक्ति । लहर्यामस्यां १०१ श्लोकाः सन्ति । प्रतिश्लोकमन्तिमः पादः—'ऋते त्वत् कः क्षाम्येत् सततमपराधाञ्जनिन मे', इत्येवं सङ्घटितः ।

इयं मानसपूजारूपेण प्रवृत्ता स्तुतिः । अस्य ग्रन्थस्य प्रस्तावनायां पूजान्तरापेक्षया मानसपूजायाः प्राशस्त्यं निरूपितम् । शिखरिणीवृत्तम् । प्रथमतृतीयपादयोर्बहुत्र ह्रस्वान्तत्वं दृश्यते । 'मीमांसन्तः' इत्यादयः शोधनापेक्षिणः शब्दा वैरल्येनोपलभ्यन्ते ।

ग्रन्थकर्तायं नेपाले काट्मण्डु (काष्ठमण्डप) नगरे वीरपुस्तकालयेऽधिकृतः । अनेन 'संस्कृतसन्देशः' इति काचन संस्कृतपत्रिकापि काष्ठमण्डपतः प्रकाश्यमानासीत्, या पुनरपि अनुस्यूततया प्रकाशीभविष्यतीति आशंसामहे ।

धर्मरक्षणम्

*भूपतिलक्ष्मीनारायणः । श्रीवेङ्कटेश्वरविश्वविद्यालयः । प्राप्तिस्थानम्—त्रिलिङ्गग्रन्थालयः, तिरुप्पति । मूल्यं न निर्दिष्टम् ।*

नवीनां रीतिमनुसृत्य रचितमिदं नाटकं नातिदीर्घैः षड्भिरङ्कैर्घटितमभिनययोग्यं च भवति ।

नाटकीयं कथावस्त्वत्र महाभारतादुद्धृतम् । भगवतः श्रीकृष्णस्य सन्धिप्रयत्नः विफलो जातः । ततः स भीष्मं द्रोणं कर्णं च विदुरस्य गृहमानाय्य तान् समरविमुखान् कर्तुं यतते । सोऽपि यत्नः विफलतामगात् । स्वधर्मं रक्षितुकामास्ते श्रीकृष्णस्य वचनं न कर्णे चक्रुः । ततः श्रीकृष्णकृतेन एकलव्यवधेन सह नाटकमवसितम् । अयमन्तिमः कथांशः न सर्वैरप्यभिनन्द्येत । ग्रन्थकर्तुः सरला शैली अभिनन्दनमर्हति । नात्र श्लोकाः सन्ति । नापि विष्कम्भादिविभागः । केवलं गद्यमयं नाटकम् ।

दुर्गास्तोत्रम्

- *श्रीमता अरविन्देन वङ्गभाषायां निबद्धस्य स्तोत्रस्य संस्कृतानुवादः; अनुवादकः—श्रीजगन्नाथः, अरविन्दाश्रमः, पाण्डिचेरि। मूल्यं न निर्दिष्टम्।*

- तत्रभवता अरविन्दयोगिना एकत्रिंशता स्तोत्रैर्घटितं देशभक्तिपरिप्लुतमिदं स्तोत्रं रामणीयकस्य परं भागमाश्रयति। एकतमं स्तोत्रमिहोदाहियते—

मातर्दुर्गे विभूतिस्ते पुण्यभारतभूरसौ।
श्यामला सर्वसौन्दर्यराशिना सुविभूषिता॥
ज्ञानशक्त्योस्तथा प्रेम्णः प्रतिष्ठा परमा च या।
शक्तिसम्भृतयेऽकार्षीदात्मसंवरणं चिरम्।
आगतं तद्युगं मातरागतं तद्दिनं तथा।
यदोढविश्वभारासौ भवत्युत्थानतत्परा।
एहि मातः प्रकाशस्व त्वमाविर्भव भारते।

स्तोत्रेणानेन तस्य परमा देशभक्तिः महाकवित्वं च प्रकटीभवति। अत्र स्तोत्राणि पद्यैः गद्येन च दत्तानि। जगन्नाथकृतः संस्कृतानुवादोऽपि निरवद्यः।

कथामञ्जरी

*अरविन्दाश्रमवासिन्याः श्रीमातुः कृतिः। अरविन्दाश्रमः, पाण्डिचेरि। मूल्यं रू० ३।*

'बेल्-हिस्तायुस्' समाख्यस्य फ्रेञ्चभाषाग्रन्थस्य संस्कृतानुवादरूपा मञ्जरीयं समाकर्षति सहृदयानां चेतः। 'आत्मसंयमः, सत्साहसम्, प्रफुल्लता, स्वावलम्बनम्, धैर्यमध्यवसायश्च, सरलजीवनम्, दूरदर्शिता, सत्यनिष्ठा, यथार्थनिर्णयः, व्यवस्था, विरचनं च विनाशनं च', इत्येते चेतस्संस्काराधायका विषयाः तत्तत्कथोदाहरणपूर्वकं मधुस्यन्दिन्या वाण्या प्रतिपाद्यन्ते। यत्सत्यं श्रीमातुरियं वाणी बालानामुद्बोधाय भविष्यति। ग्रन्थस्यान्ते प्रकाशितं शब्दार्थविवरणमत्यन्तोपयोगि भवति।

सन्मार्गः

*चिदम्बरं श्री. के. एस्. नरसिंहशास्त्री । प्रकाशकः—के. वै. रामशर्मा, प्रधानाध्यापकः, मे. चे. विद्याशाला, चिदम्बरम् , दक्षिणभारतम् । मूल्यं २५ न० पै० ।*

तत्रभवती 'औवै' नाम्नी द्राविडविदुषी भक्तिभरितानामुपदेशपराणां च काव्यानां प्रणेत्री द्रविडेष्वद्यापि धवलेन यशसा जीवति । तया कृतानां द्राविडभाषासूक्तीनामद्यापि बालैः पठ्यमानानां संस्कृतानुवादोऽयं 'सन्मार्गो' नाम । एतस्यानुवादकः श्रीमान् शास्त्री द्राविड्यां गैर्वाण्यां च परमं वैदुष्यं भजते, व्याकरणादिशास्त्राभिज्ञश्च । अयमनेकेषां लघुग्रन्थानां प्रणेतृत्वेन प्रसिद्धः । एतदीयः 'तिरुक्कुरल्' नामकस्य प्रसिद्धस्य द्राविडग्रन्थस्य संस्कृतानुवादः संस्कृतप्रतिभायां प्रकाश्यमानो वाचकानां विदितचर एव ।

'सन्मार्गे'ऽस्मिन् ४० श्लोकाः सन्ति । एषां श्लोकानां सम्मुखे मूलभूतानि द्राविडपद्यान्यपि मुद्रितानि ।

श्रीमातृमुक्तावलिः

*श्रीमाता, अरविन्दाश्रमः, पाण्डिचेरि । मूल्यं ०-८-० ।*

सूक्तिमुक्तावलिरियं वर्षारम्भदिनात् यावदब्दान्तं पठनीयैः श्लोकैः सन्दब्धा अरविन्दाश्रमवासिन्याः श्रीमातुर्मुखान्निर्गलितानां वाचामनुवाद इति ज्ञायते । कृतिरियं गभीरभावा जनेषु नवजीवनमुद्बोधयति चेतश्च विकासयति ।

अनुवादकाः श्रीमन्तः कीर्तिशेषाः कपालिशास्त्रिणः, यैरन्तेऽत्र स्वकृतं स्तोत्रद्वयमप्यायोजितम् ।

## Our Contributors :

### अस्यां सञ्चिकायां दृश्यमाना नूतना लेखकाः

VIJAYA ŚANKARA KANAJI PATTANI, B.A., (Late), 1888-1957. Mss. of his compositions with his son Sri M. V. Parasarya, 1194, Vasant Kunj, Krishnanagar, Bhavnagar.

विजयशङ्कर कानजि पट्टानि, बि.ए., १८८८-१९५७ ।
कीर्तिशेषस्यास्य निबन्धाः तत्पुत्रेण भवनगरनिवासिना एम. वि. पाराशर्येण प्रेषिताः ।

JAGGU VENKATACHARYA (Late). See *Samskrita Pratibhā*, II. i., p. 137.

जग्गु वेङ्कटाचार्याः । कीर्तिशेषमेनमधिकृत्य सं० प्रतिभा २. १. सञ्चिकायां १३७-पृष्ठे द्रष्टव्यम् ।

SRIKANTA PANDEYA, Rangalakshmi Adarsh Samskrita Vidyalaya, Brindavan, Mathura.

श्रीकान्त पाण्डेयः । रङ्गलक्ष्मी आदर्श संस्कृतविद्यालयः, बृन्दावनम्, मथुरा ।

T. A. SARASVATI, M.A., Lecturer in Sanskrit, Women's College, Ranchi; now Government of India Humanities Research Scholar, Sanskrit Department, Madras University, Madras - 5.

टि. ए. सरस्वती, एम.ए., संस्कृताध्यापिका, महिलामहाविद्यालयः, राञ्ची; संप्रति केन्द्रशासनानुग्रहेण मद्रपुरीविश्वविद्यालयसंस्कृतविभागे प्राचीन-भारतीयगणितविषये विमर्शं करोति ।

HARIHARA TRIVEDI, PH.D., Director of Archaeology & Museums, M.P., Bhopal.

हरिहरत्रिवेदी, पिएच्.डि., मध्यप्रदेशे पुरातत्त्वविभागस्य अध्यक्षः ।

KAVI 'KANTA' MANISANKAR RATNAJI BHAT, (Late). Wellknown Gujarathi Poet. 1887-1923.

कवि 'कान्त' मणिशङ्कररत्नजिभट् । प्रसिद्धः कीर्तिशेषः गूर्जरभाषाकविः ; १८८७-१९२३ ।

GAURIPRASAD C. JHALA, M.A., Professor of Sanskrit, St. Xaviers, Bombay.

गौरीप्रसाद चु. झाला, एम्.ए., संस्कृताध्यापकः, सेण्ट् सेवियर्स्, मुम्बापुरी ।

## साहित्य-अकादेमी-परिषदा प्रकाशिताः संस्कृतग्रन्थाः

१. मेघदूतम्—सु. कु. दे.
मुद्रितामुद्रितबहुमातृकापरीक्षणेन नूतनतया सोपोद्घातं सटिप्पणं परिष्कृतम् रू. २.५०

२. विक्रमोर्वशीयम्—ह. दा. वेलण्करः (संप्रति मुद्रयमाणम्)

३. पुराणेतिहाससङ्ग्रहः—सु. कु. दे—रा. च. हज़रा
(पुराणेतिहासेभ्यः समु तः कोशः) रू. ७.५०

४. कुमारसम्भवः—सूर्यकान्तः (संप्रति मुद्रयमाणः)

## अन्ये मुद्रणार्थमुपात्ता ग्रन्थाः

कालिदासग्रन्थावलिः—

१. अभिज्ञानशाकुन्तलम्—श्री. कृ. वेल्वेलकरः
२. मालविकाग्निमित्रम्—के. ए. एस. अय्यर्
३. रघुवंशः—वे. राघवः
४. ऋतुसंहारः—पि. एम्. लाड्—वे. राघवः

कोशावलिः—

१. वेदाः—विश्वबन्धुशास्त्री—सूर्यकान्तः
२. काव्यनाटकादि—वा. श. अग्रवालः—वे. राघवः
३. बौद्ध-जैन-शिलाशासनानि—न. दत्तः, ही. जैनः, ब. च. छाब्रा
४. सुभाषितानि—के. ए. एस्. अय्यर्—वे. राघवः

## सांप्रतिकं भारतीयसाहित्यम्

(आङ्ग्लवाण्यां, हिन्द्यां च मुद्रितम्)

अत्र आधुनिकसंस्कृतसाहित्यमधिकृत्य विपुलो लेखः अन्तर्भूतः।

भारतीयलेखकसूची :—अत्र अद्यतनीयसंस्कृतग्रन्थकर्तृणां सूची अन्तर्भूता।

भारतीयसाहित्यसूची :—अत्र मुद्रितसंस्कृतग्रन्थानां सूची अन्तर्भूता।

(मुद्रयमाणा)

संस्कृतसाहित्यस्य संक्षिप्तचरित्रम् (संपाद्यमानम्)

भारतीयकविता—अत्र नूतनसंस्कृतकवितानिबन्धाः अन्तर्भूताः। १९५४-५५-मुद्रिता —१९५६-५७ मुद्रणाय सज्जा।

## 'संस्कृतप्रतिभा'

वदन्ती विविधां वाचमेका भारतसाहिती ।
द्राविड्यामथ वङ्ग्यां वा भात्येको भारतो गुणः ॥

समानं मूलमेतस्याः संप्रदायास्समास्तथा ।
वासनाः प्रेरका भावा बाह्या आभ्यन्तरास्समाः ॥

एकैव भारती संविद् अध्यात्मगुणवासिता ।
ऐकात्म्यं नयति ह्येता विचित्रप्रसरा गिरः ॥

मधुच्छन्दा रवीन्द्रश्च बुद्धो गान्धिश्च यज्जगौ ।
तस्य भाषा मनाग् भिन्ना परिभाषा न भिद्यते ॥

देशतः कालतः प्राप्तचित्रप्रसरशालिनः ।
साहित्यस्यास्य दृश्येते बीजमैक्यं च संस्कृते ॥

अर्थतः शब्दतश्चापि सर्वं भारतवाङ्मयम् ।
ओतप्रोततया व्याप्य संस्कृतब्रह्म राजते ॥

मनुं व्यासं च वाल्मीकिं कालिदासं च शङ्करम् ।
कवींश्च शास्त्रकारांश्च व्याख्यातॄन्मतदेशिकान् ॥

उत्पाद्य नैव विरता संस्कृतप्रतिभाखनिः ।
अद्यापि नवरत्नानां प्रसवित्री प्रकाशते ॥

धर्मो ब्रह्म रसो नाम शिवं सत्यं च सुन्दरम् ।
या त्रिधा तत्त्वमूचे तां संस्कृतप्रतिभां नुमः ॥

संपादकः

वे. राघवः